श्रीः ।

भगवद्धर्मदर्पणे

श्रीवेङ्कटाचलस्थ श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यो
भयवेदान्ताचार्य श्रीमदनतपूरुषाचार्य
सिंहासनासीन श्रीरङ्गाचार्य स्वा-
मिविरचिते षष्ठसप्तमा-
ष्टमपरिच्छेदत्रयं

स्वाम्याज्ञया

श्रीकृष्णदासात्मजाभ्यां
गङ्गाविष्णु खेमराजाभ्यां
स्वकीये श्रीवेङ्कटेश्वरमुद्रालये-
मुद्रितम्

संवत् १९५१ शके १८१६ सन १८९४

भगवद्धर्मदर्पणषष्ठसप्तमाष्टम
परिच्छेदविषयसूचिका

षष्ठ परिच्छेदे—तप्तचक्राङ्कनविषयेप्रतिवादिनांप्रमाणासद्भाववादप्रतिषेधवचनसद्भाववादयोस्सप्रपञ्चनिरूपणपूर्वकखण्डनम्

सप्तम परिच्छेदे—त्रिषुवेदेषुपठ्यमानायाः—पवित्रंतेविततमित्यादिश्रुतेःप्रतिवादिभिःक्रियमाणस्यतप्तचक्राङ्कनपरत्वापलापपूर्वकान्यार्थपरत्ववादस्य खण्डनम्

अष्टम परिच्छेदे—१वाक्यप्रभृति२७वाक्यपर्यन्तग्रन्थे
यजुषितैत्तिरीयब्राह्मणेकाठके पठ्यमानस्य—चरणं
त्रमित्यादिमन्त्रद्वयस्यप्रतिवादिभिःक्रियमाणस्यत
काङ्कनपरत्वापलापपूर्वकाविपरीतार्थान्तरपरत्व
सप्रपञ्चनिरूपणपूर्वकखण्डनम्—ततः—ऋक्स
स्यचमूषन्मन्त्रस्यचक्रादिधारणपरत्वापला
रीतार्थान्तरपरत्ववादस्यसप्रपञ्चनिरूप

अथ भगवद्धर्मदर्पणे

षष्ठपरिच्छेदः

श्रियःकान्तायनमः ॥ श्रीमतेविष्वक्सेनायनमः ॥
श्रीमतेरामानुजायनमः ॥ श्रीमदनन्तार्यमहागुरवेनमः ॥
श्रीमतेवरवरमुनयेनमः ॥

अथ प्रतिवादिजनकोलाहलःपरिह्रियते॥ १ ॥यद्यपि
प्रकृतप्रतिवादिनः कान्दिशीकतामुपगतस्यनपरिहर्तव्यः
कश्चिदस्तिकोलाहलः॥ २ ॥तथाप्याधुनिककतिपयमुग्ध
जनानांतप्तचक्राद्यङ्कनविप्रतिपत्तिमूलभूतःश्रीवैष्णववै
भवासहिष्णुकलिबलकलुषितहृदयार्वाचीनकतिपयकु
दृष्टिजनकोलाहलोऽस्ति॥ ३ ॥प्रसङ्गात्सोऽत्रपरिजिहीर्षि
तः॥ ४ ॥तेतावदित्थंवदन्ति—तप्तचक्राद्यङ्कनेप्रमाणंनकि
ञ्चिदुपलभामहे-१ प्रत्युतनिषेधशास्त्राणिसन्ति--२ तत्प्र
माणतयावादिभिरुदाह्रियमाणाःप्रत्यक्षश्रुतयश्चान्यार्थाः
-३ खिलश्रुतयश्चाविश्वसनीयाः-४ स्मृतीतिहासपुराणादी
नांवेदमूलकतयैवप्रामाण्याद्वेदाविहितार्थेप्रामाण्यंदुर्लभम्

-५ आचारश्चयावत्प्रमाणोपलम्भं भ्रान्तिमूलत्वसम्भाव
नार्हः-६ तस्मात्केनापि प्रमाणेन धर्मत्वानिश्चयात्प्रत्युत
न्निषेधशास्त्रैरधर्मत्वनिश्चयाच्चतप्तचक्राद्यङ्कनंनानुष्ठेयमि
ति॥५॥कथयन्ति चक्रानिचिन्निषेधवचनानि॥६॥सएषक
श्चन:कोलाहलस्सकलेतरधर्मनिष्ठेभ्यस्तप्तचक्राद्यङ्कनादि
लक्षणभगवद्धर्मनिष्ठानांश्रीवैष्णवानामनुदिनमभिवर्ध
मानंवैभवातिशयमसहमानैः प्रत्यक्षंप्रतिपक्षक्षपणाक्ष
मैरर्वाचीनैः कतिपयशठजनैर्निर्मूलमेवगूढंप्रकल्प्यप्रक
टीकृतोमुग्धजनमोहनमात्रफलोनपारमार्थिकप्रमाणश
रणविदग्धविबुधगणविचारणार्हः ॥ ७ ॥ तथाहि-
तप्तचक्राद्यङ्कनेप्रमाणाभावोपन्यासपूर्वकंनिषेधशास्त्रस
द्भाववर्णनंतावदत्यन्ताविवेकविलसितम्-प्रागुदाहृता
नांप्रबलतरबहुप्रमाणानांसद्भावात्-प्रसक्तस्यैवप्रतिषे
द्धव्यत्वेननिषेधशास्त्रस्यप्रसक्तिसापेक्षत्वात् -तप्तचक्रा
द्यङ्कनस्येष्टसाधनतायालोकसिद्धताविरहेणतत्प्रसक्ते
श्शास्त्रैकनिबन्धनतयानिषेधशास्त्रसद्भाववादिभिरप्य
कामेनापिवक्तव्यत्वात्-विधिशास्त्रसद्भावेनिषेधशास्त्रो
द्भवासम्भवाच्च ॥ ८ ॥ इदमत्रावधेयम्-शास्त्रंहिव

स्मिंश्चिदनिष्टसाधनेकर्मणिप्रसक्तामेवप्रवृत्तिंप्रतिषेध
ति–कलञ्जभक्षणादौतथादर्शनात्--१कलञ्जभक्षणसुरा
पानपरदारगमनपरद्रव्यापहारादिषुचलोकसिद्धेष्टसाध
नताज्ञानमूलोरागोहिप्रवृत्तिंप्रसञ्जयति--२ अतस्तांप्र
तिषेधतिशास्त्रम्--३ तस्यचक्रान्यद्क्नेतुप्रत्युतप्रत्यक्षंदुःख
रूपतयैवानुभूयमानेलोकासिद्धेष्टसाधनताज्ञानाधीनरा
गमूलप्रवृत्तिप्रसङ्गस्यदुर्वचतयाकथंतत्रनिषेधशास्त्रावता
रस्सम्भवति--४ नहिखलुक्कांचित्प्रसङ्गलेशविधुरांप्रवृ
त्तिमुन्मत्तवत्प्रतिषेद्धुमर्हतिशास्त्रम्–प्रतिषेध्यप्रतियो
गिप्रसिद्धिमन्तरेणप्रतिषेधस्यकर्तुमशक्यत्वात्–निष्प्र
योजनत्वात्–अतिप्रसङ्गाच्च--५ यदिपुनरेतद्दोषपरिहा
रायशास्त्रमूलैवतत्रप्रवृत्तिरितिमन्यते--६ कथंनुनामत
र्हिप्रवृत्तिमूलेप्रमाणभूतेशास्त्रेप्रजाग्रतिप्रतिषेधशास्त्राव
तारसम्भवः--७कथन्तरांवाप्रमाणाभाववर्णनंसङ्घटी
ति--८ तस्माल्लोकसिद्धेष्टसाधनताज्ञानमूलरागानधी
नप्रवृत्तिविषयेकर्मणिप्रतिषेधशास्त्रसद्भावप्रवर्तकशास्त्रा
सद्भावौनानुन्मत्तःकश्चिद्ब्रूयादिति ॥९॥ अतएवह्यप्राप्ते
प्रतिषेधशास्त्रोदयसम्भवलक्षणाद्धेतोः–अपूर्वेविषयेसा

क्षात्प्रतिषेधकरूपेणैवप्रवृत्तस्यापिशास्त्रस्यप्रतिषेधपर
तामनङ्गीकृत्यार्थवादरूपतानिर्णीता—पूर्वतन्त्रेदशमा
ध्यायाष्टमपादे=अपूर्वेचार्थवादस्स्यात्·१०-८-५-इति
सूत्रे॥१०॥अत्रहि—दर्शपूर्णमासप्रकरणआज्यभागौप्रकृ
त्याम्नातस्य—नतौपशौकरोतिनसोमइत्यस्यवाक्यस्या
पूर्वेसोमेचोदकेनाप्राप्तयोराज्यभागयोःप्रतिषेधासम्भवे
नार्थवादरूपतासंस्थापिता ॥ ११ ॥ नचैवंसतिकेशोलु
ञ्छनादिष्वपिलोकसिद्धेष्टसाधनताज्ञानाधीनरागमूलं
प्रवृत्तिप्रसङ्गविरहेणानिषेधशास्त्रोदयानुपपत्तिर्दुर्वारेतित
दनुष्ठानमपिदुर्निरोधमेवस्यादितिवाच्यम्—केशोलुञ्छ
नादीनांक्षपणकाद्यसच्छास्त्रमूलतायाअतिप्रसिद्धतया
तन्निषेधस्यपरसच्छास्त्रोदयेबाधकाभावेनतन्निरोधस्य
निरपवादत्वात्॥१२॥अथपञ्चरात्रादिशास्त्रप्राप्तस्यैवतप्त
चक्राद्यङ्कनस्यनिषेधपराणिनिषेधशास्त्राणिसम्भवन्ती
तिचेद्धन्ततर्हि—परमाप्ततमभगवत्प्रणीतपरमप्रमाण
भूतश्रीपञ्चरात्रशास्त्रविरोधेनैवतन्निषेधपरसच्छास्त्रोदयो
नसम्भवति·१ तादृशासच्छास्त्रोदयश्चाकिञ्चित्करः-२ प
ञ्चरात्रशास्त्रस्यप्रमाणसार्वभौमत्वंचभारतादिषुभगवद्धा

द्वैपायनादिभिरेवसुप्रतिष्ठापितमितिनतस्यासच्छास्त्र कोटिनिवेशाशक्यशङ्कः३ तथाचनिषेधशास्त्रसद्भाववा दिनामपिस्वमुखेनैवयथाप्रापकशास्त्रमविचाल्यमभ्युप गन्तव्यंभवति--४ नतथानिषेधशास्त्रम्–स्वाभ्युपगतप्रा पकप्रमाणविरोधादेव--५ सन्तिचास्मदुदाहृतान्यपिप्रा पकप्रमाणान्यनन्तानितद्विरोधीनिदुरपन्हवानि--६ त स्मान्निषेधशास्त्राण्येवासद्भावमासादयितुमर्हन्ति-७ न प्रापकशास्त्राणीतिपश्यन्तुपण्डिताः ॥ १३॥ यानेवोद्दि ष्टतप्तचक्राद्यङ्कनाविधानपराणिशास्त्राणिप्रवृत्तानि–त द्विषयाण्येवचनिषेधशास्त्राणिनिषेधशास्त्रसद्भाववादिनो क्तानीतिविषयभेदेनापिनिर्वाहोनतेषांकर्तुंशक्यः--१४ एपरस्परंविरुद्धानिसच्छास्त्राणिसम्भवितुमर्हन्ति

५ ॥तस्मान्निषेधवचनानिकानिचिदर्वाचीनैश्शठैर भुवनमनुदिनमभिवर्धमानश्रीवैष्णववैभवासहिष्णु गूढंप्रकल्प्यप्रचारितानीत्येवतुतत्त्वविद्भिर्निश्चीयते॥ ६॥नचाविपर्ययेणप्रापकशास्त्राण्येवकैश्चित्प्रकल्प्यप्रक कृतानिकिंनस्युरितिवाच्यम्–प्रतिपक्षेप्रदर्शितस्यवै ष्णवासहिष्णुत्वादिलक्षणकारणस्यास्मिन्पक्षेदुर्वचत्वा

त्-लोकतश्शास्त्रतोवातप्तचक्राद्यङ्कनस्येष्टसाधनत्वाप
रिज्ञानेसतिनानेतिकर्तव्यताकतद्विधायकशास्त्रकल्पने
प्रवृत्तेःकस्यापिसम्भावयितुमशक्यत्वात्-निषेधवचना
नांकतिपयानांकल्पितत्वस्यसुवचत्वेपिनानेतिकर्तव्य
ताकतप्तचक्राद्यङ्कनविधायकस्यवेदपञ्चरात्रस्मृतीतिहा
सपुराणादिलक्षणस्यमहतोमहतश्शास्त्रौघस्याद्ययावद
विच्छिन्नशिष्टगोष्ठ्यनुष्ठानगोचरस्यप्रतिपाद्यार्थजात
स्यकल्पितत्वसम्भावनायाअपिदुष्करत्वात्-निषेधशा
स्त्रसद्भाववादिभिरप्यवर्जनीयप्रापकशास्त्रापेक्षैरपह्नवा
योगाच्च ॥ १७ ॥ नचकेषांचित्तप्तचक्राद्यङ्कनानु
ष्ठानवत्केषांचिदननुष्ठानमपिदृश्यतइतिनिषेधशास्त्रमन्त
पिनापह्नवमर्हतीतिवाच्यम्-शास्त्रोक्तानांसर्वेषांधर्मा
णांसर्वैरनुष्ठानादर्शनेनकेषांचिद्धर्माणांकैश्चिदननुष्ठान
मात्रेणतन्निषेधशास्त्रसद्भावनिर्णयासम्भवात् ॥ १८ ।
एवंतत्तद्धर्माणामननुष्ठानस्यतत्तद्धर्मस्वरूपाज्ञानेनवा
तत्साध्यफलरुच्यभावेनवानिषेधकशास्त्रमन्तरेणैवनि
र्वाहसम्भवादनुष्ठानस्यैवशास्त्रैकनिर्वाह्यत्वाच्चपरस्पर
विरोधेनिषेधकशास्त्रमेवापह्नवार्हंनविधायकशास्त्रमित्य

वधीयताम् ॥ ११ ॥ अथ–दर्शपूर्णमासप्रकरणे–आ
ज्यभागौप्रकृत्यसमाम्नातस्य–नतौपशौकरोतिनसोम
इतिवाक्यस्य–अपूर्वेचार्थवादस्स्यात्–१०–८–५–इ
तिपूर्वतन्त्रदशमाध्यायाष्टमपादसूत्रेणार्थवादरूपतया
निर्णीतस्यापिनात्यन्तमसदर्थकतासुवचा–वेदस्याखि
लजगद्धितानुशासनैकप्रवृत्तपरमप्रमाणभूतशास्त्ररूप
स्याप्रमात्मकबोधजनकत्वेप्रतारकत्वापत्तेः–असतागुणे
नोपपादितेनस्तुत्यनुपपत्त्याविध्युपयोगिप्ररोचनायाअ
सिद्ध्याऽर्थवादस्वरूपस्याप्यसिद्धिप्रसङ्गाच्च–१ अतएव
युक्तंद्रमिडभाष्ये–नासतास्तुतिरुपपद्यतइति–२ गुण
कृतोत्कर्षोपपादनेनस्तुतिंकृत्वाकर्मणिप्राशस्त्यबुद्ध्यु
त्पादनस्यैवार्थवादकृत्यतयागुणानामसद्भावेस्तावकत्व
भवनसम्भवतीत्यर्थवादानांस्वार्थेतात्पर्यमवश्यमभ्युप
गन्तव्यमितिहितदभिप्रायः–३ उक्तंचोत्तरमीमांसाप्रथ
माध्यायतृतीयपादस्थदेवताधिकरणश्रीभाष्ये–गुणक
थनेनहिस्तुतित्वम्–गुणानामसद्भावेस्तुतित्वमेवहीये
त–नचासतागुणेनकथितेनप्ररोचनाजायते–अतःकर्म
प्ररोचयन्तोगुणसद्भावंबोधयन्त्येवार्थवादाइति–४ न

चगुणप्रतिपादकवाक्यत्वमेवस्तुतित्वम्—नतुपारमार्थि
कोगुणसद्भावोपितत्रापेक्षितः—अतएवचासतस्सतोवागु
णस्यवर्णनमात्रेणप्ररोचनालोकेस्पष्टमुत्पद्यमानादृश्य
ते—तत्कथमसतागुणेननप्ररोचनाजायतइत्युच्यतइति
वाच्यम्—असद्गुणवर्णनस्याविवेकिजनप्ररोचकत्वेपिनि
रूपकजनाप्ररोचकतयावास्तवस्तुतिरूपत्वासम्भवात्—
तत्रापिगुणसद्भावभ्रमोत्पादनेनैवप्ररोचनाजनकत्वात्
तदभावेनिश्चितेतज्जनकत्वादर्शनात्—लौकिकभ्रामक
जनवाक्यवदखिलजगद्धितानुशासनापौरुषेयनित्यनि
र्दोषवेदवाक्यस्याप्यविवेकिजनव्यामोहनमात्ररूपता
स्यानिरूपकजनानांवैदिककर्मस्वप्रवृत्त्यापत्त्याचप्रती
मानार्थपारमार्थिकत्वाश्रयणेनैवप्ररोचनाजनकताया
अवश्याभ्युपगन्तव्यत्वाच्च—५ किञ्च—विधिमन्त्रार्थव
दरूपस्यत्रिविधस्यापिवैदिकवाक्यजातस्याखिलज
तानुशासनापौरुषेयनित्यनिर्दोषशास्त्ररूपतयास्वतःप्र
मस्यप्रामाण्यस्याविशिष्टतयातत्रकतिपयवाक्यान
दर्थवादितानकथञ्चिदापिवक्तुंशक्या—६ लौकिकभ्रामव
जनवाक्यसाजात्यानुसन्धानेनासदर्थवादिताशङ्काकर

णेच—पयःपिबकषायंपिबशिखावार्धिष्यते—पांसुषुलुठ
सिचेन्नदन्ताउद्भिद्यन्ते—इत्यादिप्रवृत्तिनिवृत्तिपरबाला
द्युपच्छन्दनवाक्यसाजात्यानुसन्धानेन—स्वर्गकामोय
जेत—नकलञ्जंभक्षयेत्—इत्यादिविधिनिषेधपरशास्त्रेष्व
पिताद्दशीशङ्कादुर्वारा—७अखिलजगद्धितानुशासनापौ
रुषेयनित्यनिर्दोषवेदवाक्यानांविप्रलिप्सामूलपौरुषेय
वाक्यसाजात्यानुसन्धानंनन्याय्यमितिस्वतःप्राप्तंवेदवा
क्यप्रामाण्यंनकेनापिव्याहन्तुंशक्यमितिचेदयंन्यायस्स
र्वेष्ववेदवाक्येष्वप्रतिहतप्रचारः— ८ तथाच—नतौ
पशौकरोतिनसोमइतिवाक्यस्यार्थवादरूपस्यापिस्वार्थे
प्रामाण्यंदुर्वारम्— ९ इदंहिवाक्यंचोदकादप्राप्ताज्य
भागप्रसङ्गत्वेनापूर्वेसोमेतत्प्रतिषेधमकुर्वत्—आदित्यो
यूपइतिवाक्यवत्प्रशंसापरार्थवादरूपंसत्सोमतुल्यतया
पशुंप्रशंसति—यथासोमेनाज्यभागौक्रियेतेएवंपशावपि
नक्रियेयातामिति— १० पशावप्यौपदेशिकचोदकप्राप्त
योराज्यभागयोरिहप्रतिषेधात्प्राप्तप्रतिषिद्धस्यविकल्पा
वश्यकत्वात्तद्विकल्पएवासिद्धोभवति— ११ एवमेवतस
चक्राद्यङ्कनस्यापिविधिनिषेधशास्त्रयोर्द्वयोस्सत्त्वेपिवि

कल्पएवकामंन्यायतःप्राप्तोभवतु–१२ कथंकारंनिषेध
शास्त्रस्यमूलतोऽपलापःक्रियतइतिचेदत्रोच्यते–नता
वदत्रविकल्पस्सम्भवति–प्रशंसापरस्यार्थवादस्यविधि
वाक्यसमबलत्वाभावेनतद्विरोधेनाकिञ्चिदर्थप्रतिपादन
क्षमत्वाभावात्–तुल्यबलविरोधेसत्येवविकल्पस्यन्था
य्यत्वाच्च–१ उक्तंहिगौतमेन–तुल्यबलविरोधेविकल्पइ
ति–२ प्रशंसापराणामर्थवादानांसतिप्रमाणान्तरविरो
धेवृत्त्यन्तरेणाविरुद्धार्थान्तरप्रतिपादनयोग्यानांवृत्त्य
न्तरासहिष्णुविधिवाक्यापेक्षयादुर्बलत्वंहिदुर्वारम्–३
नाविधौपरश्शब्दार्थइतिहिन्यायविदः–४ उत्तरमीमांसा
प्रथमाध्यायतृतीयपादस्थदेवताधिकरणश्रीभाष्येचम
न्त्रार्थवादान्प्रस्तुत्योक्तम्–तत्रप्रमाणान्तराप्राप्तान्गुणा
न्स्वयमेवबोधयित्वातैःकर्मप्ररोचयन्तिगुणविशिष्टंवाप्र
काशयन्ति–प्राप्तांश्चानूद्यतैःप्ररोचनप्रकाशनेकुर्वन्ति–
विरुद्धत्वेतुतद्वाचिभिश्शब्दैरविरुद्धान्गुणान्लक्षयित्वा
कुर्वन्तीति–५ अत्रहिप्रमाणान्तरविरोधेऽर्थवादानांवृ
त्त्यन्तरेणाविरुद्धार्थान्तरपरत्वमाश्रयणीयमितिदर्शित
म्–६ सूत्रितंच–गुणवादस्तु–इतिपूर्वतन्त्रप्रथमाध्य

यद्द्वितीयपादस्थार्थवादाधिकरणेऽर्थवादघटकशब्दानां
गौणत्वम्—७इत्थंचैष्टिकचोदकशास्त्रेणपशावप्यवश्यक
र्तव्यतयाप्राप्तावाज्यभागौहिसोमसमतयापशुप्रशंसाप
रंदुर्बलमर्थवादवाक्यंनप्रतिषेद्धुंप्रभवति-नापिचाविकल्पं
प्रसञ्जयितुम्—आज्यभागाकरणातिवादेनपशोस्सोमव
त्प्रशस्तत्वप्रतिपादनमात्रएववाक्यतात्पर्यविश्रमसम्भ
वात्—अगतिकस्थलएवाश्रयणीयस्याष्टदोषदुष्टस्यविक
ल्पस्यसर्वत्रान्याय्यत्वाच्च—८ एतेन—नतौपशौकरोती
तिनिरवकाशनिषेधवचनोपस्थितनिषेधस्य—आज्यभा
गव्यतिरिक्ताङ्गविषयेषुसावकाशतयादुर्बलैष्टिकचोदक
प्रापितेनाज्यभागेनसहविकल्पोनयुक्तः—तथाच—प्रब
लेननिषेधवचनेनाज्यभागविषयऐष्टिकचोदकबाधएव
युक्तइत्यर्वाचीनभास्करोक्तंनिरस्तम्—अपूर्वेचार्थवाद
स्स्यात्—१०—८—५—इतिसूत्रेणवाक्यस्यार्थवादतायां
निश्चीयमानायामैष्टिकचोदकवाक्येनास्यार्थवादवाक्य
स्योत्सर्गापवादन्यायानवतारात्—प्रशंसापरतयाऽर्थवाद
वाक्यस्यसावकाशत्वसम्भवेननिरवकाशत्वायोगादैष्टि
कचोदकवाक्यात्प्रबलत्वासम्भवात्—प्रत्युतार्थवादचोद

कवाक्ययोःप्रशंसालक्षणान्यपरत्वार्हत्वतदनर्हत्वाभ्यां
विपरीतस्यैवप्रबलदुर्बलभावस्यप्रागावेदितत्वाच्च—९
प्रशंसापराणिचार्थवादवाक्यानिनसर्वत्रयथाश्रुतप्रती
यमानार्थपारमार्थिकत्वतात्पर्यकाणि—१० परन्तु—स
तिप्रमाणान्तरविरोधेतदविरोधेनपर्यवसानतोबुबोधयि
षितयत्किञ्चिदर्थविशेषपारमार्थिकत्वतात्पर्यकाण्येवभ
वन्तीतिप्रकृतेपि—नतौपशौकरोतिनसोमइतिवाक्येप्र
तीयमानस्यपशावाज्यभागाकरणरूपस्यार्थस्यपारमा
र्थिकत्वतात्पर्याभावेपिपर्यवसानतोबुबोधयिषितस्यप
शौसोमवत्प्रशस्तत्वलक्षणार्थमात्रस्यपारमार्थिकत्वता
त्पर्यस्वीकारेपिवनक्षतिः—११ प्रजापतिर्वाएकआसी
त्—सआत्मनोवपामुदखिददित्यर्थवादवाक्येहिप्रजाप
तिकर्तृकात्मीयवपोत्खेदनस्यप्रतीयमानस्यपारमार्थि
कतायाअसम्भावितत्वेनतत्रतात्पर्यासम्भवेन—यतः
पशुलाभेपिप्रजापतिरात्मनोपिवपामुदखिदत्—ततोऽ
न्येनापिवपोत्खेदनमवश्यंकर्तव्यमित्यतिवादमुखेनवपो
त्खेदनावश्यकर्तव्यत्वप्रतिपादनमात्रेतात्पर्यंस्वीक्रिय
ते—१२ लौकिकेपि—लोकाविदितस्याविप्रस्यनैवाशिखा

ऽपेक्षिता–नापियज्ञोपवीतमितिवाक्येप्रतीयमानाशि
खायज्ञोपवीतानावश्यकत्वलक्षणार्थैर्विधिविरोधेनतात्प
र्यस्वीकारासम्भवात्प्रसिद्धविप्रकुलजत्वाविज्ञानमात्रेता
त्पर्यंस्वीक्रियते--१३ एवमन्यान्यपिवैदिकानिलौकिका
निचैवंजातीयकानिवाक्यान्युदाहर्तव्यानि--१४ यथो
क्तवैदिकलौकिकवाक्यानामप्रामाण्यंवाताद्दशवाक्यप्र
योक्तॄणामनाप्तत्वंवानक्वचित्कैश्चिदुच्यते--१५ तस्मात्प्र
कृतेऽपि–नतौपशौकरोतिनसोमइतिवाक्यस्यस्वार्थेप्रा
माण्यंनपरित्यक्तंभवति–वाचनिकार्थस्यपारमार्थिक
त्वासम्भवेपितात्पर्यविषयार्थस्यपारमार्थिकत्वसम्भवा
त्--१६ तस्मान्नात्रविकल्पः--१७ अपूर्वेचार्थवादस्स्या
त् -१०–८–५– इतिसूत्रशाबरभाष्येऽपि–विकल्पस्या
न्याय्यतामुक्त्वा–नतौपशौकरोतिनसोमइतिवाक्येप्रति
षेधवचनस्यनशब्दस्यप्रतिषेधमुखेनाविकल्पपर्यवसायि
त्वमस्वीकृत्यप्रशंसापरार्थवादत्वेनैवोपपत्तिस्समार्थिता
१८ यथोक्तंतत्र–विकल्पश्चान्याय्यइत्युक्तम्–तस्मादस
म्भवत्यस्मिन्विकल्पोभविष्यति-सम्भवतिचायं–तौन
पशौकरोतीत्यस्यार्थवादत्वेनेति १९ किंबहुना–एवम

स्वीकारेसूत्रकारेणास्यवाक्यस्यार्थवादताज्ञापनंनिरर्थ
कमेवस्यादितिसुधियोविदांकुर्वन्तु-२०नच-उक्तरीत्या
स्यार्थवादवाक्यस्यापारमार्थिकार्थबोधकत्वेप्यसदर्थवा
दित्वमेवाङ्गीकृतंभवति--अर्थवादानामसदर्थवादित्वं
चकेषांचिदेवसम्मतम्--नपुनस्सर्वेषाम्--एवंसत्यर्थवा
दानामप्रामाण्यमपिदुर्वारमेवभवति=अयथार्थबोधज
नकत्वयथार्थबोधाजनकत्वयोरन्यतरस्यैवाप्रमाणत्वरू
पत्वात्--तात्पर्यविषयीभूतस्यकस्यचिदर्थविशेषस्यपा
रमार्थिकत्वेपिवाक्यजन्यशाब्दबोधविषयस्यार्थस्यापा
रमार्थिकत्वेनतद्विषयकशाब्दबोधस्यायथार्थतायादुरप
ह्नवत्वात्- अतएवच-शारीरकमीमांसाभाष्यकर्तृद्रमिड
भाष्यकारश्रीभाष्यकारादीनामीदृशासदर्थवादित्वमर्थ
वादानांनानुमतम्-द्रमिडभाष्यकारेणहि--नासतास्तु
तिरुपपद्यतइत्युक्तम्-श्रीभाष्यकारेणापिप्रागुदाहृतश्री
भाष्यग्रन्थे-नचासतागुणेनप्ररोचनाजायते-अतःकर्म
प्ररोचयन्तोगणसद्भावंबोधयन्त्येवार्थवादाइति--प्रमा
णान्तराप्राप्तान्गुणान्स्वयमेवबोधयित्वातैःकर्मप्ररोच
यन्तीति=विरुद्धत्वेतुतद्वाचिभिःशब्दैरविरुद्धान्गुणान्

लक्षयित्वाकुर्वन्तीतिचोक्तम्---अत्रोभयत्राप्यसदर्थस्य
शब्दजन्यबोधविषयत्वमस्वीकृत्यपारमार्थिकार्थविषय
कबोधजनकत्वमेवार्थवादवाक्यानामङ्गीकृतमितीतिहि
स्पष्टम्-अतएवहिक्वचिच्छब्दतःप्रतीयमानार्थस्यविरु
द्धत्वेपिलक्षणयाशब्दानामविरुद्धार्थबोधकत्वमुपदर्शित
म्-इत्थंचनतौपशौकरोतिनसोमइत्यर्थवादवाक्यस्या
पिपशावाज्यभागकरणाभावस्यपारमार्थिकस्यैवबोध्य
तयास्वीकार्यत्वेनैष्टिकचोदकप्राप्ताज्यभागेनसहास्या
र्थस्यविकल्पउत्सर्गापवादभावोवाऽवश्याश्रयणीयएव-
प्रजापतिर्वैत्याद्यर्थवादवाक्यस्यापि-ज्ञानीत्वात्मैवमेम
तमितिगीताप्रयोगानुरोधेनात्मशब्दस्यात्मीयाभिमत
तमपरत्वस्वीकारेणवा-सौभर्यादिवत्तपःप्रभाववशेनप
रिगृहीतनानादेहस्यप्रजापतेरेकदेहवपोत्खेदनस्यस्वेनै
वकर्तुंशक्यतयातत्परत्वस्वीकारेणवा-गुणवादस्तु-१-
१-१०-इतिपूर्वतन्त्रप्रथमाध्यायद्वितीयपादस्थार्थवा
दाधिकरणसूत्रशाबरभाष्योक्तरीत्याप्रजापतिवपादिश
ब्दस्यगौणवृत्त्यावाय्वादिवृष्ट्यादिपरतास्वीकारेणवानि
र्वाहसम्भवेननावश्यमसदर्थवादितास्वीकार्या--लोक

विदितस्येत्यादिलौकिकवाक्यस्यापिशिखायज्ञोपवीत
योरब्राह्मणत्वशङ्कापरिहारायानपेक्षितत्वपरत्वसम्भवेन
नासदर्थवादिताऽवश्यंवक्तव्या–एवमेवसर्वत्रार्थवादानां
यथासम्भवमविरुद्धार्थबोधकत्वंसुवचमेवेतिनार्थवादा
नांवाचनिकार्थप्रामाण्यपरित्यागउचितइतिवाच्यम्–
एवमपि–नतौपशौकरोतिनसोमइत्यर्थवादवाक्यस्या
पिकथञ्चिदविरुद्धार्थकत्वसम्भवेनविकल्पादिस्वीकारा
नावश्यकत्वात्– २१ यथास्वतःप्रशस्तस्यसोमस्याप्रश
स्तत्वपरिहारायाज्यभागौनानुष्ठेयौ–तथैवपशावपिस्व
तःप्रशस्तेनाप्रशस्तत्वपरिहारायतावनुष्ठेयावित्यर्थस्वी
कारेहिनकापिक्षतिः–आज्यभागसाध्यसंस्कारसजाती
यविलक्षणसंस्कारवत्त्वरूपंप्रशस्तत्वंस्वतःसिद्धंकिंचित्प
शुसोमयोरस्ति– २३ अतस्तादृशसंस्कारसामान्याभा
वपरिहारकतयाऽऽज्यभागानुष्ठानाभावतौल्यम्– २४
यथालोकाविदितविप्रस्याब्राह्मणत्वशङ्कापरिहारार्थंशि
खायज्ञोपवीतयोरनावश्यकत्वेपिविधिबलेनशुद्धिविशेष
सिद्धयेतदावश्यकता–तद्वदैष्टिकचोदकशास्त्रबलेनप्रकृ
तकार्यसिद्धयेपशोराज्यभागसाध्यमपिसंस्कारान्तरम

वश्यापेक्षितामितिस्वीक्रियते--२५ यथान्यत्रप्रशस्तत्वा
त्यन्ताभावपरिहारकत्वेनाज्यभागयोरावश्यकता--नत
थापशौतथोरावश्यकतेतिविशेषइतिनकाश्चिद्विरोधः--२६
तथाचपशावैष्टिकचोदकशास्त्रचोदितावाज्यभागावर्थ
वादवाक्येनापह्नवासम्भवेनानुष्ठेयतयैवप्राप्ताविति नात्र
विकल्पउत्सर्गापवादभावोवासम्भवतीत्येवसूत्रकारता
त्पर्यमवगम्यते--सूत्रेऽर्थवादशब्दप्रयोगस्वारस्यात्-- २७
अतएवयाज्ञिकसम्प्रदायपरिशीलनेपशावाज्यभागानु
ष्ठानमेवदृश्यतेसम्प्रतिशिष्टगोष्ठ्याम्--२८ किंबहुना--
क्वापिवाशास्त्राणांपरस्पराविरोधेनविकल्पेवाप्रतिषेधेवा
पर्यवसानंकामंसम्भवतुनाम--अपरिहार्यविरोधयोर्द्वयो
श्शास्त्रयोस्तुप्रमाणतासम्भवोनैवसम्भावितः--तयोरेक
तरस्याप्रमाणतायादुर्वारत्वात्--अतएवचनतत्रविकल्पे
वाप्रतिषेधेवापर्यवसानंसम्भवदुक्तिकम्--परन्तुतादृशस्थ
लेद्वयोरेकस्यन्यायसञ्चारतोऽपह्नवार्हस्यापह्नवएवन्याय
विद्भिःकर्तव्योभवति--तस्मात्परस्परात्यन्तविरुद्धयोरत
प्तचक्राद्यङ्कनशास्त्रनिषेधशास्त्रयोर्द्वयोरेकस्यापह्नवेऽव
श्यंकर्तव्येनिषेधशास्त्रस्यैवप्रागुक्ताभिर्वक्ष्यमाणाभिश्च

युक्तिभिरपह्नवार्हतयातस्यैवापह्नवोऽस्माभिःक्रियतइ
ति ॥ २० ॥ अथैवमपिनतौपशौकरोतिनसोमइतिवा
क्येनतौपशौकरोतीत्यंशस्यनिषेधपरत्वंदुर्वारम्--ऐष्टिक
चोदकप्राप्तविषयत्वात्--अपूर्वेचार्थवादइतिसूत्रस्यापि--
आज्यभागप्रसङ्गविधुरेसोमेतन्निषेधासम्भवेनतस्मिंस्त
न्निषेधवचनस्यनसोमइत्यंशस्यार्थवादतापरत्वौचित्या
त्--अर्थवादस्यविधिसापेक्षतयापि-- नतौपशौकरोतीत्य
स्यनिषेधविधिपरतायाआवश्यकत्वाच्च-१इत्थंचपशावा
ज्यभागयोःप्राप्तप्रतिषिद्धयोर्विकल्पोदुर्वारः--२ अपूर्वेचा
र्थवादइतिसूत्रशाबरभाष्येविकल्पस्यान्याय्यत्ववर्णन
मपिसोमशब्दस्यसौमिकदीक्षणीयादीष्टिलाक्षणिकत्व
स्वीकारेविकल्पपरत्वलक्षणंदूषणान्तरमपिप्रसज्यतइत्य
भिप्रायेणैवोक्तंदृश्यते--३नतुपशावाज्यभागविकल्पदू
षणाभिप्रायेण--४अतएवापस्तम्बेनश्रौतसूत्रेसप्तमप्र
श्नेपशुबन्धयागप्रकरणेविंशकण्डिकायाम्-आज्यभागौ
यजतीतिसप्तमसूत्रेणपशावपिस्वमतेनाज्यभागानुष्ठा
नमेवविधाय-तौनपशौकरोतिनसोमइत्येकइतिपक्षान्त
रस्याभिधानाद्विकल्पएवोक्तोभवति--५किञ्च--अतिरात्रे

गृह्णातिषोडशिनम्--नातिरात्रेगृह्णातिषोडशिनमित्यत्र षोडशिग्रहणशास्त्रतन्निषेधशास्त्रेपरस्परविरुद्धेकथंसंभवतः--६ कथंवातत्रविकल्पस्स्वीकृतः--७ कथंपुनर्वा तयोर्द्वयोरपिप्रयोगभेदेनप्रामाण्यमप्रामाण्यंचस्वीकृतम्--८ तदिदंसर्वं--शिष्टात्तुप्रतिषेधस्स्यात्--१०-८--६-- इतिपूर्वतन्त्रदशमाध्यायाष्टमपादसूत्रशावरभाष्येनिरूपितम्--९ तत्रह्युक्तम्--ननुपरस्परंविरुद्धौविधिप्रतिषेधौनसम्भवतः--उच्यते--वचनप्रामाण्यात्प्रतिषेधोविधिंवाधित्वाभविष्यति--विधिरपिप्रतिषेधम्--नान्यागतिरस्तीतिपक्षेमिथ्याप्रत्ययःकल्पयिष्यतइति--वचनप्रामाण्याद्विरोधाच्चमिथ्याप्रत्ययःप्रयोगवचनएकंकल्पं गृहीत्वानद्वितीयमपिगृह्णातीति--तस्मादन्यतरेणकल्पेनासिध्यतीतिच--१० एवमाधानप्रकरणेसमामनन्ति-- यएवंविद्वान्वारवन्तीयंगायति-यएवंविद्वान्यज्ञायज्ञीयं गायति--यएवंविद्वान्वामदेव्यंगायतीति--११ तत्र--उपवीतावाएतस्याग्नयोभवन्तियस्याग्न्याधेयेनब्रह्मासामानिगायतीत्याम्नातम्--१२ तत्रापिशास्त्रतोब्रह्मणस्सामगानप्राप्त्यभावेतत्प्रतिषेधायोगेनप्रापकशास्त्रासिद्धौप्राप

कप्रतिषेधकशास्त्रयोःप्रयोगभेदेनकथंप्रामाण्यमप्रामा
ण्यंचस्वीकृत्यविकल्पःस्थापितः--१३ उक्तंहितदपिपूर्वत
न्त्रदशमाध्यायाष्टमपादे--उपवादश्चतद्वत्-१०--८--९--
इत्यधिकरणे--नशब्दपूर्वत्वात्--१०--८--११--इतिसूत्र
भाष्ये--यथैवाग्निनिन्दयानकर्तव्यमितिगम्यते-एवमुपादे
यतयाकर्तव्यमितिगम्यतइति=तस्मादनुष्ठातुंविधिः--व
र्जयितुमुपवादइतीतिचवदताशावरभाष्यकारेण-- १४
यादृशीगतिस्तत्र--तादृशीगतिरत्रापिसम्भविष्यत्ये
वेतिकथंद्वयोर्विरुद्धयोश्शास्त्रयोरुदयासम्भवः---कथंवा
विकल्पासम्भवश्चोच्यतइतिचेदत्रोच्यते--अयथार्थबो
धजनकत्वरूपमप्रमाणत्वंतावद्वेदस्यनकथञ्चिदपिक्व
चिदङ्गीकर्तुंशक्यम्--१ अवर्जनीयंचद्वयोःपरस्परविरुद्ध
योश्शास्त्रयोस्स्वीकारएकतरस्याप्रामाण्यम्--२ द्वयोस्त
योर्ज्ञातयोश्चकेनापिप्रकारेणान्यथासिद्धौकस्याप्यसम्भ
वन्त्यांतद्विरोधेनैतदप्रमाणंवाएतद्विरोधेनतदप्रमाणंवे
त्युभयत्राप्रामाण्यसन्देहेनुष्ठापकत्वासिद्धेरुन्मत्तजल्पि
तवदुपेक्षार्हत्वप्रसङ्गोहिदुर्वारः--३ तस्माद्विरुद्धवदवभा
समानयोश्शास्त्रयोस्तुल्यबलत्वेन्यायसञ्चारतःकथञ्चि

द्विरुद्धार्थकत्वमुपपाद्याविकल्पेपर्यवसानंकार्यम्--४ अ
तुल्यबलत्वेतुन्यायसञ्चारतःकथञ्चिद्दुर्बलस्यप्रबलावि
रुद्धार्थकत्वमुपपादनीयम्--५ इदंचतुल्यप्रामाण्यकत्वे
ननिश्चितशास्त्रद्वयाविषयम्--६ पौरुषेयत्वापौरुषेयत्व
वैषम्यतःप्रामाण्यस्यातुल्यत्वेतुपौरुषेयमप्रमाणत्वेनैव
व्यवस्थापनीयम्--७ उक्तंहिपूर्वतन्त्रेप्रथमाध्यायतृती
यपादे--विरोधेत्वनपेक्ष्यंस्यादसतिह्यनुमानम्--१-३-३-
इति--८ एवमिदंसर्वंसर्वात्मनाकल्पितत्वसन्देहानर्हशा
स्त्रविषयमेव--९ सत्यांतुस्वार्थपरैःकतिपयवञ्चकजनैःक
ल्पितमिदंस्यादितिसन्देहार्हतायांन्यायसञ्चारतोविरुद्ध
मुपलभ्यमानस्यकथञ्चित्समाधेयाविरोधस्याप्यपन्हवए
वकर्तव्योन्यायाविद्भिः--१० नपुनरविरुद्धार्थत्वकल्पनप्र
यासोप्यादरणीयः--११ एवंचतप्तचक्राद्यङ्कनशास्त्रैस्सहा
समाधेयात्यन्तविरोधस्यतन्निषेधशास्त्रस्यानेकहेतुभिः
कल्पितत्वसन्देहार्हस्यापन्हवस्सुतरामेवकर्तुमुचितः२१
तप्तचक्राद्यङ्कनानिषेधशास्त्रस्यतद्विधायकशास्त्रैस्सहास
माधेयात्यन्तविरोधत्वंकल्पितत्वसन्देहार्हत्वंचव्यक्तीभ
विष्यत्युपरिष्टात्--१३ अतिरात्रेगृह्णातिषोडशिनम्

नातिरात्रेगृह्णातिषोडशिनमित्यादौ--उपवीतावाएतस्या
ग्नयोभवन्तियस्याग्न्याधेयेनब्रह्मासामानिगायतीत्यादौ
चप्रापकप्रतिषेधकशास्त्रयोस्सर्वात्मनातुल्यबलयोर्यथो
क्तान्यथासिद्धिलेशानर्हयोरापाततस्स्फुरद्विरोधयोरवि
रोधनिर्वाहेणैवविकल्पेपर्यवसानमितिनतत्रापितयोर्वि
रुद्धार्थपरयोरेवसतोःप्रामाण्यमभ्युपगम्यते--१४अतिरा
त्रइत्यादेः— कश्चिदतिरात्रेषोडशिनंगृह्णाति—कश्चिन्नगृह्णा
ति---अतोऽत्रकामचारः---नपुनरकरणेप्रत्यवायइत्यर्थे
पर्यवसानेन---उपवीतावाइत्यादेः---अग्नीनामुपवीतत्व
लक्षणसंस्कारकामस्याग्न्याधेयेब्रह्मासामानिनगायति-
अन्यत्रतुगायतीत्यर्थपर्यवसानेनचाविरोधोह्युभयत्रनिर्व
हति-- १५ नचषोडशिग्रहणाग्रहणयोर्विकल्पस्वीकारो
नयुक्तः-भावाभावरूपयोस्तयोर्व्रीहियवयोरिवैककार्यका
रित्वासम्भवात्—तथासत्यग्रहणेपिक्षत्यभावेग्रहणंकिम
र्थंप्रतिपादयतिशास्त्रम्--ग्रहणस्यावश्यकत्वेचकथमग्रह
णंप्रतिपादयतीतिविरोधोदुरुद्धरएवेतिवाच्यम्--शास्त्रसा
मर्थ्यादेवार्थवत्तासिद्धेः --- तत्साध्यफलकामनातदभा
वयोरेवशास्त्रेणग्रहणाग्रहणप्रतिपादनेनाविरोधाभावात्

--१६नच--षोडशिनंगृह्णातिनगृह्णातीत्यादेरनुवादस्वरूप
त्वेप्यप्रामार्थकत्वेनकथनवैयर्थ्यापत्त्याचविधिनिषेधप
र्यवसानस्यावश्यकतयाअतिरात्रेषोडशिनंगृह्णीयात्--अ
तिरात्रेषोडशिनंनगृह्णीयादित्येवंहिविधिनिषेधौस्याता
म्-तत्रगृह्णीयादित्यनेनग्रहणस्यकर्तव्यत्वंबोध्यते-नगृ
ह्णीयादित्यनेनचतस्याकर्तव्यत्वंबोध्यतइतिकथमत्रावि
रोधइतिवाच्यम्-धात्वर्थान्वितनञर्थेविधिप्रत्ययार्थकर्त
व्यत्वबोधने--गृह्णीयादितिविधिसिद्धषोडशिग्रहणेनसह
तदभावस्य---नगृह्णीयादित्यनेनाविकल्पतःकर्तव्यत्वबो
धसिद्ध्याविरोधाभावात्---विधिनिमन्त्रणामन्त्रणाधीष्ट
संप्रश्नप्रार्थनेषुलिङ्--३--३-१६१इत्यनुशासनेनलिङो
ऽनानाविधार्थपरत्वावगमनादत्राविरुद्धार्थपरत्वस्वीका
रसम्भवाच्च--१७ तथाहि--धात्वर्थस्यकर्त्रास्वव्यापारेण
साधनीयतारूपाकर्तव्यताहिलिङर्थः--१८ कर्तुर्योग्यता
चकर्तव्यता--१९ साचयोग्यताविध्यादिशब्दवाच्याना
नाप्रकारा-२०तत्रविधिस्तावदवश्यकर्तव्यता-२१ आम
न्त्रणंतुविकल्पकर्तव्यता--२२ नित्यनैमित्तिकस्थलेष्व
वश्यकर्तव्यताविधिप्रत्ययार्थः--२३ काम्यस्थलेविकल्प

कर्तव्यताविधिप्रत्ययार्थः--२४ विधिप्रत्ययेनासतिबाधकेऽवश्यकर्तव्यत्वंसतिबाधकेविकल्पकर्तव्यत्वंचबोध्यते--२५इत्थंच--अहरहस्सन्ध्यामुपासीतेत्यादौबाधकाभावेनसन्ध्योपासनादिरूपेधात्वर्थेऽवश्यकर्तव्यत्वभानादास्तिकस्यनियमतःप्रवृत्तिः--ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादौकामाधिकारत्वश्रवणेनविकल्पकर्तव्यत्वभानात्कामचारानुरोधेनप्रवृत्तिरप्रवृत्तिश्चभवतीतिविशेषः--२६ एवंच--अतिरात्रेषोडशिनंगृह्णीयादित्यत्रधात्वर्थेषोडशिग्रहणे--अतिरात्रेषोडशिनंनगृह्णीयादित्यत्रधात्वर्थान्वितनञर्थेषोडशिग्रहणाभावेचपरस्परविरोधवशाद्विधिप्रत्ययेनविकल्पकर्तव्यतायाएवबोधनाङ्गीकाराद्यथाकामंषोडशिग्रहणेप्रवृत्तिर्निवृत्तिश्चोपपद्यतइतिनकश्चिद्विरोधः-- २७ नचैकतरवाक्यस्याप्रमाणत्वप्रसङ्गः--द्वाभ्यामपिवाक्याभ्यांयथार्थस्यैवबोधस्यजननात्--२८ इदंवाकुर्यान्नद्वाकुर्यादित्यादिस्थलेविकल्पकर्तव्यतैवविहिलिङर्थः--२९ क्वचित्फलेकामनातदभावाभ्यांक्वचित्फलस्यान्यार्थीनत्वसम्भवाच्चेतीयानेवाविशेषः--३० उपवीतावाएतस्याग्नयोभवन्तियस्याग्न्याधेये

नब्रह्मासामानिगायतीत्यत्रच---अग्नीनामुपवीतत्वलक्ष
णसंस्कारविशेषकामस्याऽऽध्याधेयेसामानिनगायेत्--अ
न्यत्रतुगायेदित्येवार्थसिद्ध्यानविरोधइतियथायथंसर्वत्रै
वफलभेदेनप्रयोगकालभेदेनाधिकारिभेदेनचाविरोधस्स
म्भवति ॥ ३१ ॥ विकल्पस्थलएककल्पशास्त्रानु
ष्ठानदशायांकल्पान्तरशास्त्रस्यरुचिभेदेनानुष्ठानपर्यव
सायिज्ञानाजनकत्वमात्रसम्भवेप्ययथार्थबोधजनकत्व
रूपमप्रामाण्यंनकथंचिदपिसम्भवति-- ३२ प्रागुदा
हृतशाबरभाष्येपक्षेमिथ्याप्रत्ययःकल्पयिष्यते-- त
दाविधिर्यदानप्रतिषेधः-- तदाप्रतिषेधोयदानविधिरि
त्यादौविधिशास्त्रानुष्ठानदशायांनिषेधशास्त्रजन्यप्रत्यय
स्य-- निषेधशास्त्रानुष्ठानदशायांविधिशास्त्रजन्यप्रत्य
यस्यचकथ्यमानम्मिथ्यात्वमपिनायथार्थत्वरूपम्-- अ
पित्वनुष्ठानापर्यवसायित्वरूपमेव-- अन्यथावाक्यत
एकरूपमेवोत्पद्यमानस्यबोधस्यकदाचिद्यथार्थतायाः
कदाचिदयथार्थतायाश्चासम्भवात्-- ३३ इत्थं
चार्थवादानांप्रमाणान्तराविरुद्धप्रतीयमानयावदर्थपार
मार्थिकतापरत्वपक्षे----नतौपशौकरोतिनसोमइत्य

त्राप्याज्यभागविकल्परूपत्वस्यतन्निषेधपरापवादरूपत्व
स्यवास्वीकारेपिकथञ्चिदविरुद्धार्थपरत्वसम्भवेनननःक्ष
तिः--परस्परविरुद्धार्थयोर्द्वयोःप्रमाणयोस्सद्भावासम्भव
स्यैवास्माभिरसकृदावेद्यमानत्वात्-३४तस्मात्परस्परवि
रुद्धयोर्द्वयोःप्रमाणभूतशास्त्रयोस्सद्भावस्यसर्वथैवासम्भा
वितत्वात्--तप्तचक्राद्यङ्कनविधिनिषेधशास्त्रयोरसमाधेय
विरोधयोःकथञ्चिदपिविकल्पासम्भवाच्चद्वयोरेकतरस्यान्य
थासिद्धेरवश्यवक्तव्यत्वेनोपपत्तिवाहुल्येनचनिषेधशास्त्र
स्यैवनिह्नवःक्रियतइति ॥ २१ ॥ तथाच--अपूर्वेचार्थवा
दस्स्यात्--१०--८--५--इतिसूत्रेण-- अप्राप्तेक्वचिदपिवि
षयेप्रतिषेधशास्त्रोदयासम्भवस्य-शिष्टातुप्रतिषेधस्स्यात्-
१०--८--६-- इतिसूत्रेण--विहितस्यैवार्थस्यचविधायक
शास्त्राविरोधेनप्रतिषेधकशास्त्रोदयसम्भवस्यचप्रतिपन्न
तयातप्तचक्राद्यङ्कननिषेधशास्त्रसद्भाववादिभिरपितप्तच
क्राद्यङ्कनविधायकशास्त्रंनापलपितुंशक्यमिति--प्रतिषेध
कशास्त्रसत्त्वेतदप्यधिकारिभेदादिव्यवस्थयातदविरोधेन
नेतव्यमितिचासिद्धंभवति ॥ २२ ॥ इदमपिचपुनरत्राव
धेयम्-- लोकतश्शास्त्रतोवाप्राप्तामेवप्रवृत्तिंप्रतिषेधतिशा

स्त्रम्-१ नान्यथा-अन्यथाचन्द्रादादित्यंप्रतिनोत्प्लावितव्य
म्--कण्ठेप्रस्तरंबध्वासमुद्रेनप्लावितव्यम्---इत्येवमादिरू
पेणाप्यप्रसक्तप्रवृत्तिप्रतिषेधार्थंशास्त्रोदयप्रसङ्गात्-२ अत्र
हिस्थलद्वयेप्यशक्यत्वप्रबलानिष्टसाधनत्वबुद्धिभ्यांलो
कसिद्धाभ्यांनिषेधशास्त्रनिरपेक्षास्वतस्सिद्धैवाप्रवृत्तिः ३
अतोलोकतश्शास्त्रतोवाप्राप्तामेवप्रवृत्तिंप्रतिषेद्धुंप्रवर्तते
शास्त्रम् ४ तत्रलोकतःप्राप्तांकलञ्जभक्षणादिप्रवृत्तिंसर्व
थाप्रतिषेधत्येवशास्त्रम्-प्रवृत्त्यप्रवृत्तिलक्षणकोटिद्वयव्य
वस्थापकतुल्यबलप्रमाणद्वयाभावेनानिष्टसाधनताबो
धकस्यशास्त्रस्यकेनापिबाधाभावात् ५ शास्त्रतःप्राप्तां
तुप्रवृत्तिंनसर्वथाप्रतिषेद्धुंशक्नोतिशास्त्रम्--- प्रापकप्रति
षेधकयोश्शास्त्रयोस्तुल्यबलत्वात्---प्रवृत्त्यत्यन्ताभाव
स्यैवशास्त्रतात्पर्यविषयत्वेलोकतोऽप्राप्तेविषयेप्रवृत्त्यत्य
न्ताभावस्यस्वतस्सिद्धत्वेनप्रथमंतत्रप्रवृत्तिंविधायपश्चा
त्तत्प्रतिषेधस्य--प्रक्षालनाद्धीत्यादिन्यायेनायुक्ततयावि
धिनिषेधशास्त्रयोर्द्वयोरप्युदयानावश्यकत्वप्रसङ्गाच्च ६
तस्माच्छास्त्रेणैवप्राप्तेप्रतिषिद्धेचविषयेऽधिकारिभेदफल
भेदकालभेदादिकमाश्रित्यकथञ्चिदविरोधंसमर्थ्यांग

त्याद्वयोरपिशास्त्रार्थयोरादरणीयतादुर्वारेति ॥ २३ ॥
इत्थंचेदमिदानींतमचक्राद्यङ्कनप्रतिवादिनःप्रष्टव्याः-किं
भवन्तस्तमचक्राद्यङ्कनविधायकशास्त्रंतत्प्रतिषेधकशा
स्त्रंतथ्यंमत्वाऽपलपितुमुद्युञ्जते-आहोस्विदतथ्यम्मत्वे
ति ॥ २४॥ नतावदाद्यःपक्षस्सम्भवति--प्रतिषेधस्यप्रस
क्तिसापेक्षत्वेन---रागाप्राप्तविषयस्यास्यप्रतिषेधकशास्त्र
स्यप्रागुक्तनयेनप्रापकशास्त्रमन्तरेणोदयासम्भवेनतदस
त्वेस्यतथ्यतायाएवासम्भवात् ॥ २५ ॥ नापिद्वितीयः—
प्रतिषेधकशास्त्रस्यापारमार्थिकत्वेप्रापकशास्त्रस्यानादि
कालतश्शिष्टगोष्ठ्यनुष्ठीयमानस्वार्थस्यकरणाभावेनसु
तरामेवापलापायोगात्—वस्तुतोविपर्ययस्यैवदुष्परिहर
त्वाच्च ॥२६ ॥ किंबहुना—प्रागुदाहृतानिनानोपबृंहणो
पबृंहितानिश्रुत्यादिप्रमाणानिनकथञ्चिदपिप्रत्याख्यातुं
शक्यानीतिप्रागेवावोचाम-वक्ष्यामश्चयथावसरंपश्चादपी
तिनकिञ्चिदेतत् ॥२७॥ तस्मात्प्रतिषेधकशास्त्रंपारमार्थि
कम्मत्वाप्रापकशास्त्रापलपनमिदंप्रमाणपदवीदवीयएवे
तिप्रमाणन्यायविदांपरिहासस्थानपदमिदंभविष्यति २८
तथाचप्रतिषेधकशास्त्रसद्भाववादिभिःप्रतिषेधकशास्त्रस्य

तथ्यत्वेवामिथ्यात्वेवाकल्पद्वयेपिप्रापकशास्त्रापलापस्य कर्तुमशक्यत्वेनतदीयपारमार्थिकतायामविचाल्यतया सिद्धायांमिथोविरुद्धार्थयोर्द्वयोःप्रमाणभूतयोश्शास्त्रयो स्सद्भावस्यासम्भावितताया असकृदुक्ततयातयोरेकतर स्यप्रत्याख्यातव्यत्वेसिद्धेप्रापकशास्त्रस्यतदसम्भवेनप्र तिषेधकशास्त्रमेवप्रत्याख्यातव्यंभवतीतितदेवप्रत्याच क्ष्महेबहुप्रकारैः॥२९॥अथास्तुप्रापकप्रतिषेधकशास्त्रयो र्द्वयोरपितथ्यत्वम्--अतिरात्रेषोडशिनंगृह्णाति-नातिरात्रे षोडशिनंगृह्णाति=उदितेजुहोति-अनुदितेजुहोति=व्री हिभिर्यजेत-यवैर्यजेत=इत्यादिस्थलेषु--मिथोविरुद्धवद वभासमानयोर्द्वयोश्शास्त्रयोरधिकारिभेदफलभेदकालभे दादिभिरविरोधमुपपाद्ययथाविकल्पपरत्वमाश्रीयते-त थेहापिकथञ्चिद्विरोधपरिहारोभविष्यतीतिनावश्यमेत योरन्यतरत्प्रत्याख्यातव्यंभवतीतिचेन्नतादृशस्थलेषुवि रोधपरिहारसम्भवेनविकल्पपरत्वसम्भवेपितप्तचक्राद्य ङ्कनप्रापकप्रतिषेधकशास्त्रयोर्दुष्परिहरपरस्परविरोधयोः कथंचिदपिविकल्पपरत्वासम्भवेनैकतरप्रत्याख्यानस्या वर्जनीयत्वात् ॥ ३० ॥ तप्तचक्राद्यङ्कनविधायकप्रतिषे

धकशास्त्रयोःपरस्पराविरोधोहिदुष्परिहरएवदृश्यते॥ ३१॥
तथाहि—पवित्रंतइत्यादिश्रुत्यातावदन्वयव्यतिरेकसह
चाराभ्यांतप्तचक्राङ्कनस्यब्रह्मप्राप्तिलक्षणमोक्षसाधनत्व
प्रदर्शनेन—मुमुक्षुणातप्तचक्राङ्कनमवश्यंधार्यमितिवि
धिःफलितोभवति ॥ ३२ ॥ एवम्--चरणंपवित्रमित्या
दिश्रुतिद्वये--तस्यपापनिवृत्तिंमोक्षंचप्रतिसाधनत्वप्रदर्श
नेन--पापनिवृत्तिकामस्तप्तचक्रधारणलक्षणसंस्कारवि
शेषंसंपादयेदिति --- परमपदप्राप्तिलक्षणमोक्षकामस्ता
दृशसंस्कारविशेषंसंपादयेदितिचविधिःफलितोभवति
॥ ३३ ॥ चमूषच्छ्येनश्शकुनइत्यादिश्रुत्यासंसारनिवृ
त्तिपूर्वकपरमपदप्राप्तिकामोगोविन्दस्यायुधानिविभृया
दितिविधिःफलितोभवति ॥३४॥ देवासःपितरइत्यादि
श्रुतौतप्तचक्रधारणस्यस्वर्गापवर्गादिलक्षणनानाविधश्रे
यस्साधनत्वप्रदर्शनपूर्वकंतद्विहितम् ॥ ३५ ॥ एवमन्य
त्रापिश्रुतिस्मृत्यादिषुनानाविधैहिकामुष्मिकश्रेयस्साध
नत्वप्रतिपादनपूर्वकंतप्तचक्रादिधारणंविहितम्॥ ३६ ॥त
प्तचक्रादिधारणस्यनानाविधश्रेयस्साधनतयासमन्तत
श्श्रुत्यादिषुप्रतिपन्नस्यापिसकलसांसारिकबन्धनिवृत्ति

पूर्वकपरब्रह्मप्राप्तिलक्षणपरमपुरुषार्थहेतुब्रह्मविद्याङ्गत्वे
नमोक्षलक्षणपरमनिश्श्रेयससाधनत्वमसाधारणम्मु
ख्यम् ॥ ३७ ॥ यतस्तप्तचक्रादिधारणंविनापरब्रह्मप्राप्ति
लक्षणंपरमनिश्श्रेयसंनकेनाप्युपायान्तरेणसिद्ध्यती
तिस्पष्टमुद्घोषयति श्रुतिरपि--अतप्ततनूर्नतदामोअश्नुते
शृतासइद्वहन्तस्तत्समाशतेति ३८अयमर्थोनानाविधो
पबृंहणोपन्यासपूर्वकंप्रागेवसुष्ठुनिरूपितः॥३९॥ नचैते
षांप्रमाणानामेषएवार्थइतिकथमुच्यते -अन्यैरन्यस्यार्थ
स्योच्यमानत्वादितिवाच्यम्-उक्तप्रमाणानामुक्तार्थपरत्व
स्यनानाविधोपबृंहणन्यायोपपादनेनसुदृढमुपपादित
त्वात्-प्रतिषेधकशास्त्राजीवनप्रसङ्गेनप्रापकशास्त्रापला
पदुर्वादादवरुद्धशास्त्रद्वयंतथ्यंस्वीकृत्यसमाधित्सोस्तवै
दृशदुर्वादकरणेऽनधिकारात्-ईदृशदुर्वादस्यापियथावस
रमुत्तरत्रदूरीकरिष्यमाणत्वाच्च ॥४०॥इत्थंतप्तचक्राद्यङ्क
नस्यनानाविधश्रेयस्साधनत्वेमुख्यतयासंसारबन्धनि
वृत्तिपूर्वकपरब्रह्मप्राप्तिलक्षणमोक्षाख्यपरमनिश्श्रेयस
साधनत्वेचानन्तैश्श्रुतिपञ्चरात्रस्मृतीतिहासपुराणादि
लक्षणैर्विधायकशास्त्रैःप्रतिपाद्यमानेतदत्यन्तविरुद्धानि

कतिपयप्रतिषेधकवचनानिकेचिदर्वाचीनाःप्रतिवादिन
उदाहरन्ति ॥ ४१ ॥ तानिवचनानिवैष्णववैभवास
हिष्णुभिस्तैस्तैःप्रतिवादिभिस्तत्तत्कालोदितद्वेषपरिपा
कानुगुण्येनपरिकल्पितानिसर्वाणिनैककण्ठानिचदृश्य
न्ते ॥ ४२ ॥ किञ्च--यानियानिवचनानियद्यद्ग्रन्थगता
नीत्युदाह्रियन्तेतानितानिवचनानितत्तद्ग्रन्थमूलकोशेषु
परिशीलनेनोपलभ्यन्ते ॥ ४३ ॥ प्रत्युतविरुद्धार्थकैस्तत्त
द्ग्रन्थगतैरेवतप्तचक्राद्यङ्कनविधिपरतत्तन्निबन्धनकारोदा
हृतैर्वचनैर्बाहितार्थकानिचतानिदृश्यन्ते ॥ ४४ ॥ प्रति
वादिगोष्ठ्यामपिप्राचीनैःप्राप्ततदुदाहरणप्रसङ्गैरप्यनुदा
हृतत्वेनार्वाचीनैरेवपरमुदाहृतत्वेनश्रुत्यादिप्रमाणात्य
न्तविरुद्धत्वेनचदुर्बरिकल्पितत्वशङ्कास्पदानिचतानिवर्त
न्ते ॥ ४५ ॥ तत्रविष्णुस्मृतिवचनानीतितावदिमानिव
चनान्युदाहरन्ति-शङ्खचक्राद्यङ्कनंचनृत्तगीतादिकंतथा।
एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः । यथाश्मशान
जंकाष्ठमनर्हंसर्वकर्मसु । तथाचक्राङ्कितोविप्रस्सर्वकर्म
सुगर्हितः । शङ्खचक्रेमृदायस्तुकुर्यात्तप्तायसेनवा । सशू
द्रवद्बहिष्कार्यस्सर्वस्माद्द्विजकर्मणइति ॥ ४६ ॥ पूर्वो

दाहृतश्रुत्यादिषुचक्राद्यङ्कनस्यमोक्षाख्यपरमनिश्श्रेय
संप्रत्यसाधारणमुख्यसाधनतायाअन्यादृशनानाविध
श्रेयस्साधनतायाश्चप्रतिपन्नत्वात्–एषुवचनेषु–जातुन
धर्मस्स्यादितिश्रेयस्साधनस्वरूपधर्मत्वसामान्याभाव
स्यप्रतिपन्नत्वाच्चतदत्यन्तविरुद्धानीमानिवचनानीति
हिस्फुटमवगम्यते ॥ ४७ ॥ नच–एतेषुवचनेषुचक्रा
द्यङ्कनस्यद्विजातिधर्मत्वाभावएवप्रतिपाद्यते–तेषुतुमो
क्षादिसाधनत्वमात्रम्–एतयोश्चनावश्यंविरोधेनभावित
व्यम्–धर्मत्वसामान्याभावस्यवामोक्षसाधनत्वाभाव
स्यवाप्रतिपादनेसत्येवहिमोक्षसाधनत्वतत्तच्छ्रेयोन्तर
साधनत्वप्रतिपादकश्रुत्यादिविरोधप्रसङ्गः–नान्यथा–
उक्तश्रुत्यादीनांशूद्रविषयत्वेनापिनिर्वाहसम्भवादिति
वाच्यम्–वेदोक्तधर्मेषुवेदाधिकारितयाप्रत्यासन्नानांद्वि
जातीनामेवान्तरङ्गाधिकारितायाः–तत्रापिमोक्षधर्मेषु
ब्राह्मणानामेवमुख्याधिकारितायाश्चस्वतःप्राप्तत्वेनता
न्विहायवेदश्रवणाद्यनर्हशूद्रादिमात्रविषयत्वकल्पनस्य
कथञ्चिदप्यसम्भवात् ॥ ४८ ॥ वेदोक्तधर्मेषुविशिष्यवच
नस्थलेवचनप्रामाण्येनक्वचिच्छूद्रविषयत्वसम्भवेपित

स्मादन्यत्र सर्वत्र वेदाधिकारितया प्रत्यासन्नाद्विजातिविष
यत्वासिद्धिन्यायोह्यत्राप्यप्रतिहतप्रचारः ॥ ४९ ॥ त
त्रापि मोक्षधर्मेषु मुख्याधिकारिणो ब्राह्मणा एव—जडभर
तमुचुकुन्दादिचरितेषु विप्रजन्मन एव मोक्षार्थमनुवर्तनप्र
तिपादनात्-किंपुनर्ब्राह्मणा भक्ता इति भगवतापि गीतत्वा
च्च ॥ ५० ॥ तप्तचक्राद्यङ्कनलक्षणधर्मस्य मोक्षसाध
नत्वमेव च मुख्यं सर्वत्रोपलभ्यते स्पष्टम् ॥ ५१ ॥ तथा
चाधिकारिविशेषमनिर्दिश्य विहितेष्वपि वेदोक्त धर्मेषु सर्व
त्र वेदाधिकारितया प्रत्यासन्नाद्विजातिधर्मत्वाविवक्षायाम
वर्जनीयतया चक्राद्यङ्कनस्य मोक्षादिश्रेयस्साधनताबोध
कपागुहाहतश्रुत्यादिभिस्साहितस्याद्विजातिधर्मत्वाभा
वबोधकदर्शितवचनानां विरोधो दुर्वार एव ॥५२॥ किञ्च-
पवित्रं त इत्यादिश्रुतौ—अतप्ततनूर्न तदामो अश्नुत इति त
प्तचक्राङ्कनाविधुराणां मोक्षाभावप्रतिपादनान्मोक्षसाध
नोद्यतानां द्विजातीनां तद्धर्मप्राप्तेरवर्जनीयतया तस्य द्वि
जातिधर्मत्वमवर्जनीयमेव भवतीति तदभावप्रतिपादका
नाममीषां वचनानां दर्शितश्रुतिविरोधो दुरुद्धर एव ॥५३॥
न चैभिरेव वचनैरुक्तश्रुतेर्द्विजातीतरविषयत्वं सुवचम्-

श्रुतिमूलतयैवप्रामाण्याद्दैस्स्मृतिवचनैश्श्रुतिसङ्कोचा
योगात् ॥ ५४ ॥ किंबहुना--प्रागुदाहृतायाम्--देवास:
पितरोयेनविधृतेनबाहुनासुदर्शनेनप्रयतास्स्वर्गंलोकमा
यन् । येनाङ्कितामनवोलोकसृष्टिंवितन्वन्तिब्राह्मणास्त
द्वहन्तीत्यादिश्रुतौदेवानांपितृणाम्मनूनांब्राह्मणानांच
चक्राङ्कनलक्षणधर्मानुष्ठातृत्वंस्पष्टमेवश्रूयतइतिनचक्रा
ङ्कनस्यद्विजातिधर्मतान्यायसञ्चारेणोपपादनीया॥५५॥
एषाचश्रुतिःकिञ्चिदानुपूर्वीभेदेनाथर्वपरिशिष्टगतनयारा
मनाममाहात्म्यनामानिस्मार्तनिबन्धनेपञ्चमप्रकरणे
द्वारकाशङ्करमठपतिपरम्पराघटकेनाच्युताश्रमसन्न्या
सिनाप्युदाहृता ॥ ५६ ॥ एवम्--दक्षिणेतुभुजेविप्रोबि
भृयाद्वैसुदर्शनम् ॥ सव्येतुशङ्खंबिभृयादितिब्रह्मवि
दोविदुरितिप्रागुदाहृतश्रुतावपिब्राह्मणस्यानित्यतयाच
क्राद्यङ्कनंविहितम् ॥ ५७ ॥ एषापिश्रुतिरच्युताश्रमस
न्न्यासिनारामनाममाहात्म्येपञ्चमप्रकरणएवोदाहृता॥
॥ ५८ ॥ एवंस्मार्तनिबन्धनयोरामार्चनचन्द्रिकारा
मनाममाहात्म्ययोरानन्दवनाच्युताश्रमनामस्मार्तस
न्न्यासिभ्यामेवोदाहृतेन--अग्निहोत्रंयथानित्यंवेदस्या

ध्ययनंयथा । ब्राह्मणस्यतथैवेदंतप्तचक्रादिधारणमि
तिपाद्मवचनेन—एवंतत्रैव तदुदाहृततप्तचक्राद्यङ्कनवि
धिपरशौनककल्पान्तगताभ्याम्—य एवं कुरुतेविद्वा
न् ब्राह्मणश्श्रोत्रियश्शुचिः । सर्वपापैःप्रमुच्येत विष्णु
लोकंच गच्छति । शयन्यांचैवबोधन्यां चक्रतीर्थे तथै
वच । शङ्खचक्रविधानेन वह्निपूतो भवेन्नर इतिवचना
भ्यांच—तप्तचक्राद्यङ्कनस्य ब्राह्मणान् प्रत्यग्निहोत्रादि
वन्नित्यत्वं सर्वपापनिवृत्तिपूर्वकवैष्णवपरमपदप्राप्ति हे
तुत्वंच स्पष्टमभिधीयते ॥ ५९ ॥ एवमत्र—सर्वपापैः
प्रमुच्येतेति—वह्निपूतो भवेन्नर इतिच—सर्वपापविमु
क्तिपरिशुद्ध्यतिशययोस्तप्तचक्राद्यङ्कनसंस्कारायत्तत्व
कथनादुक्तवचनेषु——यथाश्मशानजंकाष्ठमित्यादिनो
क्तमशुद्धिहेतुत्वमपिदर्शितवचनाविरुद्धम् ॥ ६० ॥
बहुतरवैष्णवनिबन्धकारोदाहृतेन—ब्राह्मणःक्षत्रियोवै
श्यश्शूद्रश्चश्रद्धयान्वितः । चक्रंचपाञ्चजन्यंच बिभृयाद
ग्निसंयुतमितिविष्णुवचनेनापि द्विजातिधर्मत्वंतप्तच
क्राद्यङ्कनस्यस्पष्टमवगम्यतइतितद्विरुद्धान्यपीमानिव
चनानि ॥६१॥ ब्राह्मणानामेववर्णान्तरापेक्षयाशास्त्रो

क्तसर्वकर्मस्वनुष्ठातृतायाः प्रथमंप्राप्तत्वात्तत्रापिमोक्षध
र्मेषुमुख्याधिकारितायाः प्राप्तत्वाच्चमोक्षधर्मप्रधानभू
ततप्तचक्राद्यङ्कनलक्षणसंस्कारविशेषेतेषामेवप्रथमंप्रा
प्तोतिमुख्यतयाधिकारोनान्येषामितितस्याद्विजातिधर्म
त्वाभाववर्णनमत्यन्तविरुद्धम् ॥६२॥ अतएवोक्तंशङ्खेन
उपवीतादिवद्धार्याःशङ्खचक्रगदादयः। ब्राह्मणस्यविशे
षणवैष्णवस्यविशेषतइति ॥ ६३ ॥ यमेनाप्युक्तम्—उ
पवीतीशिखीविप्रश्चक्रलाञ्छनसंयुतः। चक्रलाञ्छन
हीनस्यविप्रस्यविफलाःक्रियाइति ॥ ६४ ॥ पराशरस्मृ
तौविशिष्टधर्मशास्त्रेद्वितीयाध्यायेप्युक्तम्—विनायज्ञोप
वीतेनविनाचक्रस्यधारणम्। विनाद्वयेनवैविप्रश्चण्डाल
त्वमवाप्नुयात्। विधिनाशंखचक्रादिधारणंचोर्ध्वपुण्ड्र
कम्। उपवीतंशिखाबन्धंविप्रस्यसततंस्मृतम्। चक्रला
ञ्छनहीनस्यविप्रत्वंनिष्फलंभवेत्। अचक्रधारिणंवि
प्रंयश्श्राद्धेभोजयेन्नरः। रेतोमूत्रपुरीषादिसपितृभ्यःप्र
यच्छतीति ॥ ६५ ॥ एषुवचनेषुब्राह्मणपर्यायशब्दग्र
हणम्—तप्तचक्राद्यङ्कनस्यमुमुक्षूणामितरेषामप्यपेक्षित
त्वेपि—तदकरणेब्राह्मणानामितरापेक्षयादोषभूयस्त्वं

ज्ञापयति--तस्मादाहिताग्निर्नानृतंवदेदित्यत्राहिताग्नि
शब्दआहिताग्नेरनृतवादित्वनिबन्धनंदोषभूयस्त्वमिव
॥६६॥यद्वा-कानिचित्प्रमाणानि-वैदिकमन्त्रहोमसंस्कृ
ताग्निसन्तप्तैरेवचक्रादिभिरङ्कनस्यकर्तव्यतयातादृश
तप्तचक्राद्यङ्कनेवेदाधिकारिणामेवाधिकारःतत्रापिचवि
प्राणामेवमुख्योऽधिकारः-वेदाधिकारविधुराणांस्त्रीशूद्रा
दीनांतुचन्दनादिलिप्तचक्राद्यङ्कनएवाधिकारइतिप्रति
पादयन्ति--तमेवन्यायमनुसृत्येमान्यपिवचनानिप्रवृ
त्तानीतिबोध्यम् ॥ ६७ ॥ तथोक्तंहिपाद्मोत्तरखण्डेद्वि
तीयाध्याये--प्रकृतिस्पर्शरहितोवासुदेवोजनार्दनः । त
थैवब्राह्मणोदेविविष्णुचक्रेणचिह्नितः । तस्मात्प्रकृतिसं
सर्गपापौघदहनंहरेः । प्रतप्तंबिभृयाच्चक्रंशंखञ्चभुजमूल
योः।स्त्रीशूद्राणांसदाधार्यंचन्दनेनसुगन्धिना । बाहुमूले
लिखेच्चक्रंतप्तंतुब्राह्मणस्यवै । तप्तेनैवाङ्कनंकुर्याद्ब्राह्मण
स्य विधानतः । श्रौतस्मार्तादिसिद्ध्यर्थंमन्त्रासिद्ध्यैत
थैवचेति ॥ ६८ ॥ तथाच सर्वथाब्राह्मणानामेवतप्तच
क्राद्यङ्कनेमुख्यतयाधिकारः--तेषामेवचतदत्यन्तावश्य
कमितरवर्णापेक्षयेतिसिद्ध्यति ॥ ६९ ॥ एवंब्राह्मणाना

मेवतप्तचक्राद्यङ्कनविधायिप्रमाणानिपरश्शतानिप्रागेवो
दाहृतानीतितेषांसर्वेषांविरुद्धानीमानिवचनानि॥७०॥
एवम्--यथाश्मशानजंकाष्ठमित्यादिना तप्तचक्राङ्कित
स्याशुचित्ववर्णनंपुनरतीवविरुद्धंप्रमाणानाम्--पवित्र
मित्यादिश्रुतौ--अतप्ततनोरदग्धपापत्वलक्षणस्यामत्व
स्य-तप्तचक्राङ्कधारिणां दग्धपापस्यलक्षणस्यशृतत्वस्य
चश्रवणात्--चरणंपवित्रमित्यादिश्रुतौ-येनपूतस्तरति
दुष्कृतानि--तेनपवित्रेणशुद्धेनपूताः । अतिपाप्मान
मरातिंतरेमेतितप्तचक्राङ्कनसंस्कारपूतानांपापतरणश्र
वणात्--देवासःपितरोयेनाविधृतेनबाहुनासुदर्शनेनप्रय
ताइत्याद्युदाहृतश्रुतौसुदर्शनेनप्रयताइतितप्तचक्रधार
णेनपूतत्वस्यैवाभिधानात्--प्रायशस्सर्वास्वेवतप्तचक्रा
ङ्कनपरासुश्रुतिषुसर्वपापनिवृत्तिपूर्वकमोक्षप्राप्तेरेवमुख्य
फलतयाश्रवणाच्चनिरतिशयशुद्धेरेवसर्वतः प्रतिपन्नत्वा
त्॥७१॥एवंबृहद्ब्रह्मसंहितावचनेषुप्रागुदाहृतेषु--श्रद्धया
धारयिष्यन्तिममचक्रंसुदर्शनम् । ज्ञात्वासर्वपदार्थैं
षुशुद्धिस्तेषांपदेपदे। शालायांभाजनेवस्त्रेगृहोपकरणेषु
च। चमसोलूखलेपीठेपक्वान्नेचक्रमुल्लिखेत्। पशुपुत्रक

छत्रेषुयानवाहनभूमिषु । सुदर्शनतत्वाङ्केनप्राकृतत्वंप्र
णश्यतीतिवचनैः—द्वादशारेणतप्तेनवलयत्रयशोभिना
ज्वालाचतुष्कयुक्तेनपूतायान्तिममालयमितिवचने
न=भगवन्देहशुद्धिर्हिकीदृशीकेनजायतइतिश्रीवत्स
प्रश्नसमाधानग्रन्थस्थाभ्याम्-विरक्तोवागृहस्थोवासका
मोऽकामएवच । तापादिनाविशुध्येतपातकैःकोटिज
न्मजैः । एषावैष्णवसिद्धान्तेसंस्क्रियापरमामता । सुदर्श
नाग्निनातप्ताशरीरंयद्विशोध्यतइतिवचनाभ्यांचचक्रा
ङ्कनस्यनिरतिशयशुद्धिहेतुसंस्कारविशेषरूपतास्पष्टमुक्ता
॥७२॥एवंप्रागुदाहृतविहगेन्द्रसंहितावचनेषु—सर्वकर्मा
धिकारश्चशुचीनामेवचोदितः । शुचित्वंनियतंतस्ययो
विभर्त्यायुधानिमे । अश्वमेधसहस्रस्यवाजपेयायुतस्य
च । यत्फलंश्रूयतेतत्स्यान्मदीयायुधधारणात् । पर्व
ताग्रेनदीतीरेदेवतायतनेषुच । तपसायत्फलंतत्स्यान्म
दीयायुधधारणादितिवचनैश्चक्राङ्कनस्यकर्माधिकारहेतु
निरतिशयशुद्धिजनकत्वंसुकृतातिशयजनकत्वंचोक्तम्
॥ ७३ ॥ एतानिचवचनानिरामनाममाहात्म्यकारेणा
प्युदाहृतानि ॥ ७४ ॥ प्रागुदाहृतेन—विष्णुचक्राङ्कि

तंगात्रंपवित्रमितिवैश्रुतिरितिगारुडपुराणवचनेन—कृ
ष्णायुधाङ्कितंदेहंचेष्टतेयत्रकुत्रवै । श्मशानमपितच्छुद्धं
किंपुनःपुण्यभूमयइतिस्कान्दपुराणवचनेनचचक्राद्यङ्क
नस्यनिरतिशयशुद्धिहेतुत्वंदर्शितम् ॥ ७५ ॥ एवंप्राक्
पञ्चमपरिच्छेदोदाहृतप्रमाणगणेषु तप्तचक्राद्यङ्कनस्य
निरतिशयशुद्धिहेतुत्वंबहुलंप्रतिपादितंद्रष्टव्यम् ॥७६॥
एवंश्रौतस्मार्तसर्वकर्मसिद्धिविशेषहेतुत्वमपिचक्राद्यङ्क
नलक्षणसंस्कारस्यसर्वतःप्रतिपाद्यते ॥ ७७ ॥ प्राक्
पञ्चमपरिच्छेदेतृतीयवाक्याद्युदाहृतेषुभरद्वाजसंहिता
वचनेषु-सिद्ध्यर्थंकर्मणांचैवधार्यंचक्रादिलाञ्छनमिति
वचने —शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैःप्रियतमैर्हरेः । र
हितस्सर्वधर्मेभ्यःप्रच्युतोनैनमाप्नुयादितिवचनेन च क
र्मसिद्ध्यङ्गत्वंचक्राद्यङ्कनस्याभिहितम् ॥ ७८ ॥ एवंव
सिष्ठस्मृतौविशिष्टधर्मशास्त्रेप्रथमाध्याये--तस्मात्तुविधि
वच्छङ्खंधारयित्वासुदर्शनम् । पश्चात्सर्वाणिकर्माणिकु
र्वीतद्विजसत्तमाइतिवचनेन—अकृत्वाविधिवच्चक्रंयदि
कर्मसमाचरेत् । निष्फलंतुभवेत्सर्वमिष्टापूर्तंद्विजोत्त
माइतिवचनेन—द्वितीयाध्याये—विधिनावैष्णवंचक्रंधा

रयित्वाद्विजोत्तमः । कर्मकुर्यात्ततःपश्चाच्छ्रौतंस्मार्तं
विधानतइतिवचनेनचतस्यकर्माङ्गत्वंस्फुटमवगम्यते ॥
॥७९॥एवमन्यदप्येतद्विषयंप्रमाणजातंद्रष्टव्यम्॥८०॥
प्रत्युतचक्राद्यङ्कनरहितस्यैवात्यन्ताशुद्धत्वमकर्मण्यत्वं
चप्रमाणैरवगम्यते।८१।यथोक्तंनारदीये--श्रीकृष्णशस्त्रा
ङ्कविहीनगात्रश्श्मशानतुल्यःपुरुषोथनारी । दृष्ट्वानरंतं
नृपतेसवासास्स्नात्वासमर्चेद्धरिमङ्गनित्यमिति ॥८२॥
इदंवचनंरामनाममाहात्म्यकारेणाप्युदाहृतम् ॥८३॥
वृहद्धारीतस्मृतौद्वितीयाध्याये--चक्रंवैकर्मसिद्ध्यर्थंजा
तकर्मणिधारयेत् । अचक्रधारीविप्रस्तुसर्वकर्मसुगर्हि
तः। अवैष्णवत्वमापन्नोनरकंचाधिगच्छति । चक्रचि
ह्नादिरहितंप्राकृतंकलुषान्वितम् । अवैष्णवंतुतंदूराच्छ्व
पाकमिवसन्त्यजेदित्युक्तम् ॥ ८४ ॥ एवंजातीयकानि
वचनानिविशिष्टधर्मशास्त्रशब्दितासुवसिष्ठपराशरहारी
तशाण्डिल्यादिस्मृतिषुपञ्चरात्रसंहितासुपरस्सहस्राणि
सन्ति ॥ ८५ ॥ तस्मात्सर्वेषामीदृशप्रमाणानांस
र्वथाविरुद्धानीमानिवचनानि ॥ ८६ ॥ किञ्च--श्मशा
नजकाष्ठस्यसर्वकर्मानर्हतांनिदर्शनीकृत्यचक्राङ्किताव

ग्रस्यसर्वकर्मसुगर्हितत्वंवदतोऽस्यवचनस्य– यथाऽग्नि
दग्धस्यश्मशानकाष्ठस्याशुचित्वप्राप्त्यासर्वकर्मानर्हत्वं
तथा चक्राङ्कितस्यचक्राग्निदाहेनाशुचित्वप्राप्त्यासर्वक
र्मानर्हत्वमितिह्याशयोऽवगम्यते ॥ ८७ ॥ यतइ
ममेवाशयमाविष्कुर्वन्ति——नाङ्कनायदहेद्देहंदहेच्चेत्का
मकारतः । नाधिकुर्वन्तिदग्धाङ्गाःश्रौतस्मार्तेषुकर्म
स्वितिबोधायनवचनमिति–नाङ्कयेन्नदहेद्गात्रंदेवतायुध
लाञ्छनैः । दहनाल्लेखनाद्विप्रःपतत्येवनसंशयइति
यमवचनमिति–चैवमादीनिप्रतिवादिभिरुदाहृतप्रमा
णानिवचनान्तराण्यपि ॥८८॥ तत्रतदिदंनिदर्शनंताव
न्नितरांनसङ्गच्छते ॥ ८९ ॥ नतावत्तत्रश्मशानकाष्ठ
स्याग्निदाहतोऽशुचित्वम्–श्मशानेष्वपितेजस्वीपावको
नैवदुष्यतीतिमनुस्मृतिनवमाध्यायवचनेन–एवंजाती
यकैरन्यैश्चधर्मशास्त्रवचनैः–अग्नेस्स्वतश्शुद्धत्वेनतद्दाह
स्यकथञ्चिदप्यशुचित्वहेतुत्वासम्भवात्–प्रत्युततत्तद्व
स्तुशुचित्वहेतुतायाएवशास्त्रसिद्धत्वाच्च ॥ ९० ॥ प
रन्तु–श्मशानदेशशवाद्यशुचिद्रव्यसम्बन्धनिबन्धनमे
वश्मशानकाष्ठस्याशुचित्वमकर्मण्यत्वंचेतिनतद्दृष्टान्ते

नचक्राङ्कितस्याशुचित्वंसम्भवदुक्तिकम्—स्वतश्शुद्धेन नानाविधपवित्रमन्त्रकरणकहोमसंस्कृतेनाग्निनातप्तैः—स्वयंचपावनतमैर्निरतिशयपावनत्वनिबन्धनश्रुतिस्मृत्यादिप्रसिद्धपवित्रसञ्ज्ञासञ्ज्ञितसुदर्शनादिभगवद्दिव्यायुधैरङ्कनलक्षणस्यसंस्कारविशेषस्यनिरतिशयशुद्ध्यादिहेतोरशुद्धिकथागन्धासहिष्णोरशुचित्वहेतुतायाः अनेकजन्मार्जितापरिमितपापसञ्चयनिबन्धनदुर्वारबुद्धिमालिन्यानासुरप्रकृतीनन्तरेणकस्याप्यन्यस्यकथञ्चिदप्यस्फुरणात् ॥११॥ भृगूणामाङ्गिरसांघर्मस्यतपसातप्यध्वमितिकपालान्यग्नौसन्तापयन्तीतिप्रसिद्धंहि वैदिकगोष्ठ्यांशुद्ध्यर्थमेवाग्निसन्तापनम् ॥१२॥ अत्यन्ताशुद्धद्रव्यसम्पर्कदूषितानांपात्रादीनांशुद्ध्यर्थमग्नौसन्तापनंसुप्रसिद्धंचधर्मशास्त्रेषु ॥ १३ ॥ एवम्मोक्षादिश्रेयोविशेषसिद्ध्यर्थस्संस्कारविशेषएवायंपवित्रमन्त्रकरणकहोमाग्निसन्तप्तसुदर्शनादिभगवद्दिव्यायुधाङ्कनलक्षणइतिनात्रदोषकथागन्धावकाशः ॥ १४ ॥ यदिचाग्निसंयोगाग्निदाहादिमात्रमेवाशुचिताहेतुस्स्यात्—तदा—आज्यसंस्कारदर्वीतापनशारीरव्याधिभेषजाग्निदाहा

दीन्यप्यशुचितामापादयेयुः=किंबहुना—अग्निहोत्रादिकृत्येषुपाकादिकृत्येषुशीतवारणार्थाग्निप्रज्वलनदीपोद्द्योतनादिकृत्येषुचावर्जनीयप्राप्तप्रसङ्गानांप्रायशस्सर्वेषामेवाग्निसंयोगतद्दाहादिसंभवेनसर्वएवतेसर्वकर्मानर्हास्स्युरितिकेवलमविवेकिजनकोलाहलमात्रमिदमितिसुधियांसुज्ञानम् ॥१५॥अग्निदाहस्यदोषत्वेपिप्रामादिकस्यरोगनिवारणायावर्जनीयतयाप्राप्तस्यचाग्निदाहस्यनदोषत्वंन्याय्यमितिचेन्मन्दमतेहन्ततर्हिकिंवैधएवचाक्राग्निदाहेदोषत्वंवकुंशक्ष्यसि ॥ १६ ॥ प्रसिद्धंचसौराष्ट्रदेशेप्रायशस्सर्वेषांरोगविशेषभेषजतयाऽग्निसन्तप्तलोहशलाकादिभीरोगाधारदेहभागदहनम्—मैथिलदेशेवधूनांविवाहसमनन्तरप्राप्तश्रावण्यांपतिसौभाग्यादिसिद्ध्यर्थंतथाकुलाचारसिद्धंश्वश्रूप्रभृतिभिर्दीपशिखयाजानुभागदहनंच ॥ १७॥ तादृदंसर्वंदेव्यककुलाचाराभ्यांसिद्धमितिनदोषइतिचेद्दुर्मुखतर्हिनिश्श्रेयसादिसाधनपरमसंस्कारतयाश्रुतिस्मृत्यादिपरस्सहस्रप्रमाणगणविहितेलोकमान्यशिष्टगोष्ठीष्वनाद्याचारसिद्धेतप्तचक्राद्यङ्कनेकिम्मुधादुर्वादप्रलपनेनेतिरुद्धमुखस्तूष्णींभव ॥१८॥ तप्तच

काङ्क्षाविषयेविधिंविनानप्रतिषेधप्रसङ्गइतिप्रतिषेधक
शास्त्रसद्भावबलादिभिरपिप्रापकशास्त्रमकामेनाप्यभ्युपग
न्तव्यमितिचप्रागेवप्रावोचाम ॥ ९९ ॥ किञ्च—अग्नि
दाहमात्रस्यदोषतायाःप्रामाणिकत्वेपूर्वोक्तकृत्येषुप्रमाद
तःप्रसक्ताग्निदाहानामपिग्रामादिकाशुचिसंपर्काणामिव
शोधनप्रकारस्यविधानावश्यकत्वेनधर्मशास्त्रेषुतादृशवि
धानादर्शनादपितस्यदोषत्वमप्रामाणिकम् ॥ १०० ॥
किञ्च—शङ्खचक्रेमृदायस्तुकुर्यात्तप्तायसेनवा। सशूद्रवद्बहि
ष्कार्यस्सर्वस्माद्द्विजकर्मणइतिमृत्तिकालिप्तचक्राद्यङ्कन
स्यतप्तचक्राद्यङ्कनस्यचतुल्यतयासर्वद्विजकर्मानर्हत्वा
पादकत्ववर्णनंश्मशानकाष्ठनिदर्शनंचात्यन्तायुक्तम्—अ
शुचित्वबीजतयाभवदभिमतस्याग्निदाहस्योभयत्रास
त्वात्—मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतम्।त्वयाहतेन
पापेनजीवामिशरदश्शतम्—मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वं
प्रतिष्ठितमितितैत्तिरीयकोपनिषद्गतश्रुत्यास्वतःपापह
रत्वश्रेयःप्रदत्वादिशालितयाप्रतिपन्नमृत्तिकालेपनस्य
चक्राद्याकारस्यप्रत्युतशुद्धिविशेषहेतोःकेनापिप्रकारे
णाशुद्धिहेतुत्वकथागन्धानर्हत्वाच्च॥ १०१॥परन्त्वेभिर्वं

चनैर्वचनकल्पकस्यवञ्चनेच्छ्यचातुर्यगर्भमशाकदौर्जन्य
मेवाविष्कृतं भवति॥१०२॥एवंनृत्तगीतादिकस्यभगवद्भ
क्तेषु द्विजाग्र्येष्वपिसमन्ततोलोकतश्शास्त्रतश्चप्रतिपन्न
स्यद्विजातिधर्मत्वाभाववर्णनमपिविरुद्धमेव ॥ १०३॥
इदंपुनरत्रावधेयम्—विष्णुस्मृतिवचनसञ्ज्ञार्पितान्युदा
हृतवचनानि—कस्मिन्नंशेदोषसद्भावतात्पर्येणकमर्थंदू
षयितुंप्रवृत्तानीतितावद्विचारणीयम्—१नतावच्चक्राद्य
ङ्कनंदूषयितुंप्रवृत्तानीतिवक्तुंशक्यम्—तत्रदोषबीजाभा
वात्—२ चक्राद्यङ्कनंहिचक्राद्याकारचित्रमूर्तिकरणम्—
३ चक्रादयोनामभगवद्दिव्यायुधभूताःपरमपावनादेव
ताविशेषाः—४तच्चित्रकरणेकोदोषः—५ नखलुदेवतात
दायुधादिप्रतिमाचित्रकरणेक्वचिद्दोषताप्रसिद्धा—६ नाप्य
ग्नितप्तचक्राद्यङ्कनंदूषयितुंप्रवृत्तानि—अग्नेश्चक्रादिभगव
द्दिव्यायुधस्यचपरमपावनतयाप्रसिद्धत्वेनतयोस्तत्सं
योगेवादोषबीजस्यदुर्वचनत्वात्—तावन्मात्रस्यदूषणीय
त्वेमृत्तिकादिलिप्तचक्राद्यङ्कननृत्तगीतादिदूषणायोगाच्च-
७नचतान्यपिदूषयितुंप्रवृत्तानीतिवक्तुंशक्यम्-तत्रापिदो
षबीजस्यदुर्लभत्वात्८मृत्तिकादिलेपनंहिशुद्धिविशेषक

ल्याणादिहेतुतयैवशास्त्रसिद्धमितितत्कृतपरमपावनभ
गवद्दिव्यायुधचित्ररचनासुकःप्रद्वेषश्शास्त्रस्यसुवचः-९य
स्याहिकामिनीकामुकादिभिर्नानाविधमदकरतत्क्रव्यैः
क्रियमाणासुमकरिकादिपत्ररचनास्वपिद्वेषंनोपलभाम
हे—१० नृत्तगीतादिकमपिहिभगवद्भक्ताग्रेसरेषुतुम्बु
रुनारदादिष्वपिप्रसिद्धंशास्त्रैर्गीयतेविधीयतेचभक्तिशास्त्रे
षुबहुधा—अनुष्ठीयतेचाधुनिकैरपिद्विजातिप्रवरैर्भगवद्भ
क्तैरितिकैवकथातत्रदोषगन्धप्रसङ्गस्य—११किञ्चनैतानि
वचनानितप्तचक्राद्यङ्कनमात्रदूषणबद्धश्रद्धानि—१२अ
पितुसर्वप्रकारचक्राद्यङ्कननृत्तगीतादिसर्वाङ्गसहितंकृत्स्न
मेवभक्तिमार्गंदूषयितुंबद्धकच्छानिदृश्यन्ते—१३ ॥ अ
न्यथाभगवद्भक्त्यङ्गभूतान्यपितप्तचक्राद्यङ्कनमृत्तिकादि
लिप्तचक्राद्यङ्कननृत्तगीतादीनिसर्वाण्यविशेषेणकथंदूष
यितुंप्रवृत्तानि—१४ नचैतेषुसुसूक्ष्ममपिवादोषबीज
मीक्ष्यतेनिपुणनिरूपणेऽपि—१५नचपौरुषेयमपौरुषेयं
वापारमार्थिकंप्रमाणभूतंकिञ्चनशास्त्रमित्थंभक्तियोगंदू
षयितुंक्षमते-१६यतएवमाहगीतासु—सर्वेश्वरेश्वरोवेदवे
द्यस्सभगवान्वासुदेवएवसाक्षात्—नाहंवेदैर्नतपसानदा

नेननचेत्यथा ॥ शक्यएवंविधोद्रष्टुंदृष्टवानासिमांय
था । भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुन । ज्ञातुं
द्रष्टुंचतत्त्वेनप्रवेष्टुंचपरन्तपेति--१७आहचश्रुतिरपि--वे
दाहमेतमित्यारभ्य-तमेवंविद्वानमृतइहभवति-नान्यः
पन्थाअयनायविद्यतइति-१८तस्मान्नैतानिवचनानिम
हर्ष्यादिमूलपारमार्थिकस्मृत्यादिवचनरूपाणिप्रमाणश
रणामन्यन्ते-१९अपितु-कुदृष्टयः-मन्दमतीन्-यथावेदा
न्तवाक्यानांविपरीतार्थान्तरकल्पनयाव्याकुलयन्तित
था-- भक्तयङ्कभगवद्दिव्यायुधाङ्कनशास्त्राणांविरुद्धकतिप
यवचनकल्पनयापिव्याकुलयन्ति-कुदृष्टीनांशीलमेवैत
दितिनैतदपूर्वंकृत्यमितिमन्यन्ते।२०।तथाच--ब्राह्मणा
दीनामेवमुख्यतयातप्तचक्राद्यङ्कनविधायकश्रुतिस्मृत्या
दिप्रबलतरबहुतरप्रमाणान्तरविरोधात्-अग्नितापमृल्लेप
नादिषुशुचित्वैकहेतुतयावगम्यमानेषुकेनापिप्रकारेणक
थञ्चिदप्यशुचितालेशसंस्पर्शसम्भावनायाअप्यनवका
शाच्चाग्नितापमृल्लेपनादिनिबन्धनचक्रादिभगवद्दिव्यायु
धचिह्नशालिषुभगवद्भक्तद्विजातिष्वग्निदाहमृल्लेपनादि
कंनिमित्तीकृत्याशुचित्वसर्वकर्मानर्हत्वप्रतिपादनपरा

णिप्रतिवादिभिरुदाह्रियमाणानिवचनानिभगवद्भक्तवै
भवासहिष्णुभिरासुरप्रकृतिभिश्शठैर्गूढंप्रकल्प्यप्रकटीकृ
तान्येवेतिनिश्चेतव्यानीतिनैतानिप्रमाणतयोदाहरण
योग्यानीतिसिद्धंभवतीति ॥ १०४ ॥ नचवचन
सिद्धेर्थेयुक्तिसञ्चारतोनानुपपन्नत्वंशङ्कितुंयोग्यमितिवा
च्यम् अप्रतिपन्नप्रमाणान्तरविरोधवचनसिद्धार्थेतथात्व
स्यन्याय्यत्वेपिपरितःप्रस्फुटपरिस्फुरद्विरोधवचनप्रति
पन्नेष्वर्थेषुन्यायसञ्चारतउपपन्नत्वानुपपन्नत्वेनिरूप्यैव
तत्प्रतिपादकवचनानांप्रामाण्याप्रामाण्ययोर्व्यवस्थाप
नीयत्वेनतत्रयुक्तिसञ्चारस्यावश्यकत्वात् ---अन्यथाशा
रीरकमीमांसायांकपिलहिरण्यगर्भपशुपत्यादिस्मृतीनां
मन्वादिस्मृतीनांचपरस्परविरोधेश्रुत्यानुगुण्यतदभावा
भ्यांप्रामाण्याप्रामाण्यव्यवस्थापनस्यभगवद्बादरायण
कृतस्याप्यसङ्गतत्वापत्तेश्च ॥ १०५ ॥ तस्माद्धुष्प
रिहरविरोधानीमानिवचनानिदूरीकरणीयान्येवेतिनवि
कल्पप्रापणक्षमाणि ॥ १०६ ॥ यदपि—ताम्ररूप्य
सुवर्णादिकृतचक्रादिलाञ्छनम् । विधीयतेहिशूद्राणां
नाद्विजानांकथञ्चनेतिनारदवचनमिति—वेदेषुयज्ञभागे

षुयस्यनास्त्यधिकारिता ।सतापयित्वाचक्रादीन् धा
रयेत्स्वभुजद्वयम् इत्यादित्यपुराणवचनमितिचवचन
द्वयंप्राक्प्रदर्शितविष्णुस्मृतिसञ्ज्ञापितवचनानिचोदा
हृत्य-अग्नितापनानिबन्धनम्मृत्तिकादिलेपननिबन्धनं
चचक्राद्यङ्कनंकृत्स्नमपिशूद्रविषयम्-द्विजेष्वपिपातका
दिभिर्यैर्वेदेषुवैदिकेषुयज्ञादिकर्मसुचानधिकारितामाप
न्नाः-तद्विषयंचसम्भवति-अतोविधिनिषेधवचनानां
विषयविभागसम्भवेनविरोधपरिहारस्सम्भवतीतिज
ल्पन्ति ॥ १०७ ॥ तदपितुच्छम्-सामान्यतोवेदवि
हितेषुकर्मसुवेदाधिकारितयाप्रत्यासन्नानांत्रैवर्णिकाना
मेवाधिकारस्यप्रथमप्राप्तत्वात्-तथाश्रुतिप्राप्तस्यतस्य
स्मृतिवचनैःप्रतिषेधायोगस्यप्रागेवावेदितत्वात्- दक्षि
णेतुभुजेविप्रइत्याद्युदाहृतश्रुतौब्राह्मणान्प्रत्येवविहि
तस्यब्रह्मविद्याङ्गतयापिप्रतिपन्नस्य-देवासःपितरइ
त्याद्युदाहृतश्रुतौ-देवानांपितॄणांमनूनांब्राह्मणानांचा
नुष्ठानगोचरतया-मोक्षप्राप्तयेऽवश्यानुष्ठेयतयाच-प्र
तिपन्नस्य-पवित्रंतइत्यादिश्रुतौ-तप्तचक्राङ्कनरहिता
नाम्मोक्षासिद्धिप्रतिपादनेनसर्वेषामपिमुमुक्षूणामव

श्यानुष्ठेयतयाप्रतिपन्नस्यतप्तचक्राद्यङ्कनलक्षणधर्मस्य स्मृतिवचनैःप्रतिषेधायोगस्यकैमुत्यन्यायसिद्धत्वाच्चप्रा गुक्तविरोधस्यदुष्परिहरत्वात् ॥ १०८ ॥ किञ्च--सुवर्ण रूप्यताम्राद्यैःकृत्वाशङ्खंसुदर्शनम् । द्विजातिरेकजाति श्चबिभृयादग्निसंयुतमितिनारदवचनेनैवव्याहतार्थकंप्रा गुदाहृतंनारदवचनसंज्ञापितंवचनम्=चक्रादिधारयेद्वि प्रोललाटेमस्तकेभुजे । पातकादिविशुद्ध्यर्थंभवक्लेशवि नाशनमित्यादित्यपुराणवचनेनैवव्याहतार्थकंप्रागुदा हृतमादित्यपुराणसञ्ज्ञापितंवचनम्-- ब्राह्मणःक्षत्रियो वैश्यश्शूद्रश्चश्रद्धयाऽन्वितः । चक्रंचपाञ्चजन्यंचाबिभृया दग्निसंयुतमितिविष्णुवचनेनैवव्याहतार्थकानिप्रागुदा हृतविष्णुवचनसञ्ज्ञापितवचनानिचेत्यवर्जनीयकल्पि तत्वशङ्कास्पदत्वेनोक्तवचनान्यप्रमाणकोटावेवनिविशे रन् ॥१०९॥ एवमस्यवेदवैदिककर्मानधिकारिविप्राभा सविषयत्ववर्णनमप्यसाधु--वेदविहितकर्मणांप्रागुक्ता द्वेदाधिकारितयाप्रत्यासन्नाधिकारिविषयत्वावश्यकत्वा देवहेतोः--प्रागुदाहृततप्तचक्राद्यङ्कनविषयशौनककल्पा न्तगतात्--यएवंकुरुतेविद्वान्ब्राह्मणश्श्रोत्रियश्शुचिः ।

सर्वपापैः प्रमुच्येत विष्णुल्लोकं च गच्छतीति वचनात्--अ
ग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा । ब्राह्मणस्य तथै
वेदं तप्तचक्रादिधारणमिति पाद्मवचनाच्चाविशिष्टत्रैवर्णि
काधिकारिविषयत्वस्य-- तत्रापि ब्राह्मणविषयेऽग्निहोत्रवे
दाध्ययनवदेव नित्यत्वस्य चासिद्धेः ॥ ११० ॥ किञ्च
तप्तचक्राद्यङ्कनस्य त्रैवर्णिकविषये निषेधवचनसद्भावं शू
द्रादिविषये विधिवचनसद्भावं च ब्रुवाणाः प्रतिवादिनस्ता
वदिदं प्रष्टव्याः-- किं भवन्तस्तप्तचक्राद्यङ्कनं श्रेयस्साधन
म्मन्यन्ते-- उत पातित्यापादनमुखेनानिष्टसाधनम्मन्य
न्त इति ॥ १११ ॥ प्रथमपक्षे तस्य त्रैवर्णिकाधिकारिकत्वा
सम्भवो दुर्वचः--अर्थित्वसामर्थ्ययोरेवाधिकारप्रयोजक
त्वेन श्रेयस्साधने तस्मिन्त्रैवर्णिकानामपि तयोस्सम्भवा
त् ॥ ११२ ॥ अर्थित्वमपेक्षितश्रेयस्साधनत्वादेव सम्भ
वति ॥ ११३ ॥ शूद्रादीनामपि यत्र सामर्थ्यमस्ति--
न तत्र त्रैवर्णिकानां तदसम्भवस्सुवच इति सामर्थ्यमपि
हि निर्बाधम् ॥ ११४ ॥ तप्तचक्राद्यङ्कनलक्षणो हि धर्म
श्शूद्रादिषु यादृशं श्रेयस्साधयति--त्रैवर्णिकेषु न तत्साध
यितुं शक्नोतीत्यपि च न सुवचम् ॥ ११५ ॥ तस्मात्त्रैवर्णिक

विषयेतस्यनिषेधवचनावतारोनैवसम्भवति ॥ ११६ ॥ द्वितीयपक्षेशूद्रादिविषयेपिनतद्विधिवचनोदयस्सम्भवति ॥ ११७ ॥ यतोनहितस्यद्विजेषुपरंपातित्यापादनमुखेनानिष्टसाधनत्वम्—शूद्रादिषुतुश्रेयस्साधनत्वमेवेतिसुवचम्—स्थलभेदेनस्वभावभेदेकारणाभावात् ॥ ॥ ११८ ॥ नचवचनसिद्धेस्थैतर्कप्रचारोनानुपपत्तिसाधनक्षमइतिवाच्यम्—मिथोविरुद्धवचनस्थलेप्रामाण्याप्रामाण्यनिर्णयायन्यायसञ्चारावश्यकतायाःप्रागेवावेदितत्वात् ॥ ११९ ॥ किञ्च—तप्तचक्राद्यङ्कनविधिशास्त्राणांभवदुक्तरीत्याशूद्रादीनामेवतद्विधानपरत्वेत्रैवर्णिकेषुतत्प्रसङ्गस्यैवाभावेनतद्विषयेनिषेधवचनानिकिमर्थंप्रवृत्तानि ॥ १२० ॥ यदिपुनश्शास्त्राण्यधिकारिविशेषमनिर्दिश्यैवसामान्यतस्तप्तचक्राद्यङ्कनंव्यधास्यन्—तदात्रैवर्णिकेषुतत्प्रसङ्गपरिहारायतद्विषयेतन्निषेधवचनोदयोपिकथञ्चित्सम्भवदुक्तिकोऽभविष्यत् ॥ २२१ ॥ नचैवंदृश्यते ॥ १२२ ॥ सेतिकर्तव्यताकतप्तचक्राद्यङ्कनविधिप्रयोगपराणियावन्तिशास्त्राणिसन्ति—तेषुसर्वेषुहिब्राह्मणानामेवप्रथमंप्राधान्येनोद्देशोदृश्यते ॥ १२३ ॥

पश्चादेवचान्येषामपि ॥ १२४ ॥ तस्मात्ताद्दशशास्त्रप
र्यालोचनेनिषेधशास्त्रोदयस्यैवनावकाशोद्दश्यते। १२५॥
यानिपुनःप्रतिषेधैकप्रधानानिकानिचेद्देववचनानिभव
न्तउदाहरन्ति--तत्पर्यालोचनेपिनब्राह्मणादिविषयेप्र
तिषेधशास्त्रोदयावश्यकताद्दश्यते-तत्रशूद्रादीनामसाधा
रणनिर्देशेनैवोद्देशदर्शनेनब्राह्मणादिषुतत्प्रसङ्गाभावा
त् ॥ १२६ ॥ अपिच-तप्तचक्राद्यङ्कनस्यत्रैवर्णिकविष
येनिषेधपराणितदितरविषयेविधानपराणिचभवदुदाहृ
तानिवचनानिभवदीयानामपिनपारमार्थिकत्वेनसम्म
तानीतितावत्स्फुटमवगम्यते ॥ १२७ ॥ यदितेषांता
नितथासम्मतान्यभविष्यन्-तदा-तद्वचनानुरोधेनभ
वदीयैश्शूद्रादिषुवापारम्पर्यतस्तप्तचक्राद्यङ्कनंक्रियमाण
मद्रक्ष्यत ॥ १२८ ॥ नचैवंलोकेभवदीयेषुकेनचित्क्वा
पिकदाचित्कस्यचित्कृतंक्रियमाणंवातदुपलभामहे ॥
॥ १२९ ॥ प्रत्युतसर्वत्रतदसम्मतिमेवोपलभामहे ॥
॥ १३० ॥ अतइदमवगम्यते-स्वपक्षस्थापनाहीनपर
पक्षप्रतिक्षेपमात्रोयतकथालक्षणावितण्डावादमात्रेण
वैष्णवेषुप्रत्यवस्थातुमेवोक्तलक्षणानिकानिचिद्वचनानि

कल्पयित्वाजल्पन्तिभवन्तइति ॥ १३१ ॥ तस्मात्त
प्तचक्राद्यङ्कनस्यब्राह्मणादिविषयेनिषेधपराणिशूद्रादि
मात्रविषयेविधानपराणिचवचनानिनकथञ्चिदपिपार
मार्थिकत्वसम्भावनामप्यर्हन्तीति—तादृशानिकानिपय
वचनानिभगवद्भक्तवैभवासहिष्णुभिःपामरजनव्यामो
हनायकल्पितान्येवेतिच—निर्मत्सरविमर्शेऽवतीर्णानां
सुधियांसुज्ञानम् ॥ १३२ ॥ यदपि—स्वशरीरेन्यदेहेवा
भवेदत्रिकिणीद्विजइतिमनुवचनमितिकिञ्चिद्वचनमुदा
हृत्य—तत्रत्यद्विजशब्दस्यत्रैवर्णिकविषयत्वंस्वीकृत्य—न
ब्रह्मविष्णुरुद्राणांचिह्नमेकस्यधारयेदितिवचनान्तरंचो
दाहृत्यतदनुरोधेनात्रिकिणिशब्दस्यब्रह्मविष्णुरुद्रचिह्न
राहित्यपरत्वंचस्वीकृत्यदर्शितवचनेनसामान्यतश्चक्राद्य
ङ्कननिषेधसिद्धिरित्युच्यते ॥ १३३ ॥ तदप्यसत्—उ
क्तमनुवचनसञ्ज्ञापितवचनस्यमनुस्मृतिकोशेषुक्वाप्य
नुपलम्भात्—तदुपष्टम्भकतयामूलग्रन्थसञ्ज्ञानिर्देशम
प्यन्तरेणैवोदाहृतवचनान्तरस्यापिक्वापिस्मृतिष्वनुपल
म्भात्—प्रागुदाहृतश्रुतिस्मृतिपुराणादिप्रमाणगणविरो
धाच्चतयोरपिवचनयोःप्रागुदाहृतवचनान्तरवदेवकल्पि

तत्त्वावगमेनताभ्यामपितदसिद्धेः ॥ १३४ ॥ एवम्—ऊ
र्ध्वपुण्ड्रंतथाचक्रंनित्यंधारयतेनरः । तेनतस्याशुभंनश्ये
च्छुभमस्याविवर्धतइतिवृद्धमनुवचनेनव्याहतार्थकत्वाद
प्युदाहृतमनुवचनसञ्ज्ञापितवचनंकल्पितमितिनिश्ची
यते॥१३५॥ इदंपुनरत्रावधेयम्—इदंवचनंकिणत्रयनिषे
धपरंदृश्यते—१वैष्णवधर्मप्रतिपादकशास्त्रेषुकिणत्रयंच
क्वापिनप्रतिपाद्यमानंपश्यामः—पञ्चायुधधारणपक्षेचि
ह्नपञ्चकस्यशङ्खचक्रमात्रधारणपक्षेचिह्नद्वयस्यचैवप्रतिपा
द्यमानत्वात्—२किन्तु—देवतान्तरसम्बन्धित्रिशूलाङ्कन
निषेधपरमेवेदंवचनंभवितुमर्हति—तत्पक्षेत्रिशूलाङ्कनमू
लचिह्नानांत्रित्वात्—देवतान्तरचिह्नानामकर्मण्यताहेतु
तायावैष्णवधर्मप्रतिपादकशास्त्रेषुबहुलमुपलम्भेनतन्नि
षेधस्ययुक्तत्वाच्च—३ एवम्—नब्रह्मविष्णुरुद्राणांचिह्नमे
कस्यधारयेदितिनिर्मूलनिर्देशवचनमपि—ब्रह्मविष्णुरु
द्ररूपदेवतात्रयचिह्नधारणमेकस्यप्रतिषेधाद्दृश्यते—४त
च्चोपपन्नमेव—राजसतामसदेवतान्तरचिन्हधारणस्य
स्वतएवनिषिद्धत्वात्—ऐकान्त्यभञ्जकत्वाच्च—५ अतए
वच—पूर्ववचनस्यैतदैककण्ठ्येनब्रह्मविष्णुरुद्ररूपदेव

तात्रयचिन्हधारणनिषेधपरत्वेपिनक्षतिः—६ तथाच-- पारमैकान्त्यादिफलकपरमसात्त्विकभगवद्दिव्यायुधमा त्रलाञ्छनधारणेकिञ्चिदपिविरोधोनानयोर्वचनयोर्दृ श्यतइतियद्यप्यविरोधस्सुवचः—७ ऋजुबुद्धयःकेचिदिदं वचनंतात्त्विकम्मन्वानाइत्थंव्याचक्रुश्च--८ तथापि--ने दंवचनद्वयंतात्त्विकमितिनिश्चेतुंशक्यम्--क्वाप्यनुपल म्भात्-अन्यैरनुदाहृतत्वात्-चतुरवञ्चकाग्रगण्येनार्वाची नभास्करेणैवकल्पितत्वावगमाच्च--९ अर्वाचीनभास्करे णैवेदंवचनद्वयंकल्पितमित्युपपादयामः--१० सावधानं तदवधार्यतामकुटिलापक्षपातिबुद्ध्या--११ इतःप्राग्वे दान्ताचार्यैर्भगवद्दिव्यायुधलाञ्छनादिधारणविप्रतिप न्नभवादृशकतिपयकुदृष्टिनिरसनायसच्चरित्ररक्षानाम कश्चनप्रबन्धोन्यबन्धि--१२ यत्रायमादौतृतीयश्लोको दृश्यते—सद्भिर्धृतेषुसततंविभातिंदधुर्यैपत्युस्समस्तजग तांपरमायुधेषु । तैरेवतान्निगमशाणनिघर्षदीप्तैस्तर्का त्मनापरिणतैःप्रहरामिमूर्खानिति--१३ तत्रप्रतिवादि पूर्वपक्षोपन्यासपरग्रन्थे—नचस्मरन्तिमन्वादयः--प्रत्यु तनिषेधन्त्येवस्वशरीरेन्यशरीरेवाव्रणकरणादिकम्--त

त्करणेचप्रायश्चित्तान्यनुशिष्यन्ते--यद्यपि--अकिणिन
इतिकिणित्वनिषेधोज्याघातास्फोटद्यूतासिलतादिज
न्यकिणविषयतयाभवस्वामिप्रभृतिभिर्व्याख्यातः- त
थापि--सामान्यतोव्रणकरणाङ्कनादिनिषेधोबाधकाभा
वेसत्यसङ्कुचितोऽवतिष्ठतइतिपाङ्क्तिर्दृश्यते-१४सिद्धा
न्तपरग्रन्थेच--नह्यस्यप्रत्यक्षश्रुतिविरोधतदभावलक्षणं
वैषम्यमस्ति--ब्राह्मणादिभिश्चक्रादिकंनधार्यमितिप्रति
पादयन्त्याश्श्रुतेरदर्शनात्-तद्दर्शनेपिप्रत्यक्षबहुश्रुत्यन्त
रतत्सदृशभगवच्छास्त्रमहाभारतादिविरोधेसत्यन्यपरत
यानिर्वाह्यत्वात्--नचात्रनिषेधसम्भवः--चक्रादिधारण
स्यदुःखैकरूपतयोपलभ्यमानस्यरागप्राप्तत्वायोगेननि
षेधाविषयत्वात्--विधिप्राप्तत्वेतुविधिरेवपरिपन्थी- ना
स्यात्रविकल्पोपिसम्भवति--एकस्मिन्नेवाधिकारिणिदुः
खतदभावरूपयोस्तदयोगात्--व्यवस्थापकस्यापिकल्प
कल्पनेगौरवादतिप्रसङ्गाच्च--स्मृतिविरोधतदभावाभ्यांवै
षम्यमितिचेत्-स्मृत्यन्तरसङ्गृहीतश्रुतिविरुद्धायास्स्मृ
तेरेवाप्रतमेष्वनुदयात्--उदितायाश्चयथाकथञ्चिदविरोधे
ननेयत्वात्--अत्यन्तविरोधेतुविरोधाधिकरणन्यायेनप

रित्याज्यत्वात्-नचात्यन्ताविरोधः--सामान्यतोव्रणकर
णादिनिषेधस्योत्सर्गापवादनयेनसमर्थयिष्यमाणैश्श्रु
तिस्मृतीतिहासपञ्चरात्रैरैककण्ठ्येनप्रतिपादितार्थव्य
तिरिक्तविषयत्वात्--अन्यथाऽग्नीषोमीयहिंसादेरपि-नहिं
स्यादित्यादिनानिषिद्धत्वेनाधर्मत्वप्रसङ्गादितिपङ्क्तिर्दृ
श्यते-- १५ तदेतद्ग्रन्थद्वयस्यार्वाचीनभास्करग्रन्थस्यच
पर्यालोचनेयथोक्तवचनद्वयंकल्पितमित्येवावगन्तुंश
क्यम् १६--अत्रपूर्वपक्षग्रन्थे--स्वशरीरेन्यशरीरेवाव्रणक
रणादिनिषेधसद्भावोक्तिम्--अकिणिनइतिसामान्यतः
क्वचित्किणनिषेधसद्भावोक्तिंचमूलीकृत्य--यथोक्तमनुव
चनसञ्ज्ञापितवचनंकल्पितम्--१७ वादिग्रन्थएवसामा
न्यतोव्रणकरणाकिणकरणादिनिषेधवचनसद्भावानुवाद
दर्शनेनतादृशार्थप्रतिपादनच्छायानुसारीदंवचनंतात्त्वि
कंस्याद्इतिमन्दमतिभिर्विश्वसनीयंस्यादितिहिपापी
यान्कल्पकस्याशयोवगम्यते-- १८ तावन्मात्रेणस्वाभि
मतार्थसिद्ध्यसम्भवेन--उक्तवचनोपबृंहणतयासम्भव
दुक्तिकत्वेनविश्वसनीयत्वसम्भवाभिमानेनचवचनान्त
रंकल्पितम्-- १९ अन्यथाक्वापिकथंनोपलभ्यतेदंव

चनम्-- केनाप्यन्येनवाकथंनोदाहृियेतेतिविमृशन्तो विमत्सराविद्वांसः--इदंप्रथममर्वाचीनभास्करेणैवक ल्पितमुदाहृतंचेतिसुखेनावगन्तुंशक्नुयुः-- २० किञ्चअ स्यवचनद्वयस्यवास्तविकत्वे--प्रतिवादिभिरेतद्बलेनैव-- अकिणिनइत्यस्यापिचक्राद्यङ्कननिषेधपरतायादुरपह्नव मुपपादयितुंशक्यतया--तद्विहाय--सामान्यतोव्रणकर णाङ्कनादिनिषेधोवाधकाभावेसत्यसङ्कुचितोवतिष्ठतइ तिसामान्यन्यायेनसमर्थनानावश्यकत्वात्--वेदान्ताचा र्यैरपि--नचात्यन्तविरोधः--सामान्यतोव्रणकरणादिनि षेधस्योत्सर्गापवादनयेनसमर्थयिष्यमाणैश्श्रुतिस्मृती तिहासपञ्चरात्रैरैककण्ठ्येनप्रतिपादितार्थव्यतिरिक्तवि षयत्वादित्यादिकथनायोगाच्च--भास्करेणैवकल्पितमिदं प्रथममितिसिद्धंभवति--२१ किंवहुना-ब्राह्मणादिभिश्च क्रादिकंनधार्यमितिप्रतिपादयन्त्याश्श्रुतेरदर्शनादित्यन न्तरम्--तद्दर्शनेपिप्रत्यक्षवहुश्रुत्यन्तरतत्सदृशभगवच्छा स्त्रमहाभारतादिविरोधेसत्यन्यपरतयानिर्वाह्यत्वादित्यु दाहृतवेदान्ताचार्यग्रन्थवाक्यखण्डमेवलोकवञ्चनार्थं मोहनपिञ्छिकामवलंब्यतथाविधश्रुतिवाक्यान्यपिस

न्तीतिकानिचिद्वाक्यानिकल्पयित्वोदाहृतवतः--द्राविडदेशेस्वपरगोष्ठीषूभयीष्वपिसुप्रसिद्धतादृशपरमसाहसिकप्रथाडिण्डिमस्यार्वाचीनभास्करस्यस्मृतिवाक्यकल्पनंहिनकिञ्चिदेतदितितच्छीलज्ञानान्नविस्मयन्ते २२ नचवेदान्ताचार्याणामपि--तादृशानिश्रुतिवाक्यानिकानिचित्सन्ति--तानिचप्रमाणान्तरानुरोधेननेयानीत्येवाभिप्रायःकिन्नस्यादितिवाच्यम्--वेदान्ताचार्यैः--तादृशश्रुतिवाक्यसत्त्वेपितान्यपिप्रमाणान्तराविरोधेनैवनेयानि-नतुतान्यप्येतन्निषेद्धुंक्षमन्तइतितत्सद्भावारोपेणकृत्वाचिन्तायाएवन्यायसञ्चारतःकृतत्वात्--वस्तुतस्तत्सद्भावाङ्गीकाराभावात्-अन्यथा-श्रुतेरदर्शनादिति--नचात्यन्तविरोधइतिचतैरेवकथनायोगात्--तप्तचक्राङ्कनदूषणप्रथमप्रवृत्तहेमाद्रिकारप्रभृतिभिरर्वाचीनभास्करात्प्राचीनैरर्वाचीनैश्चकैरप्यनुदाहरणेनतत्सद्भावसम्भावनाया अपिकर्तुमशक्यत्वाच्च--२३ एवमर्वाचीनैरुदाह्रियमाणानांप्रस्फुटनिषेधपरानेकवचनानामेकस्यापिप्रामाणिकत्वेवेदान्ताचार्यकालेप्रतिवादिभिस्तदनुदाहरणस्यवेदान्ताचार्यैस्तदसमाधानस्यप्रागुदाहृतग्रन्थोक्तरी

त्यासामान्यनिषेधवचनमात्रोपन्यासपुरस्कारेणपूर्वप
क्षोत्थानस्य—उत्सर्गापवादन्यायेनतत्समाधानस्यचो
पपत्तिलेशादर्शनादीदृशानिसर्वाण्येववचनान्यर्वाचीनैः
कल्पितानीतिसिद्धंभवति—२४ अतईदृशवचनानांके
श्चिदर्वाचीनैरस्मत्पक्षस्थैरेवकथञ्चिदविरुद्धार्थपरत्वोप
पादनेनसङ्कृत्युपपादनेपितादृशप्रयासोपिनात्रादरणीय
इत्यस्माकमाशयइति ॥ १३५ ॥ यान्यप्यर्वाचीनभा
स्करेणोदाहृतानि—महर्षिविशेषस्मृतिपुराणादिशास्त्र
विशेषसञ्ज्ञामनिर्दिश्यैव—चक्राङ्कितायदत्तानिहव्यक
व्यानियानिवै ॥ रक्षांसितानिगच्छन्तिनपितॄन्नचदेव
ताः । पाषण्डिनश्चपतितायेचचक्राङ्किताजनाः । पु
ण्यकर्मणितेषांवैसन्निधिर्नेष्यतेक्वचित् । तप्तचक्राङ्कितं
विप्रंनपश्येत्पुण्यकर्मणि । तंस्पृष्ट्वाचद्विजोभूमावशुद्धिं
सहसाप्नुयादितिवचनानि ॥ १३६ ॥ तान्यपिवचना
निस्वयमुदाहर्तृभिरेवानिर्मूलनिर्देशमुदाहरणात्प्रागुदाहृ
तप्रमाणगणविरोधात्साक्षात्प्रतिकोटिभूतार्थप्रतिपाद
कानांबहूनांप्रमाणानामुपलम्भाच्चाविद्वद्भिःकल्पिता
न्येवेतिनिश्चीयते॥१३७॥ तथाहि—बृहद्धारीतस्मृतावष्ट

माध्यायेप्रोक्तम्-शङ्खचक्रोर्ध्वपुण्ड्रादिरहितंब्राह्मणाधम
म्-पूजयिष्यतियश्श्राद्धेसर्वंकर्मास्यनिष्फलमिति-ऊ
र्ध्वपुण्ड्रधरंविप्रंचक्राङ्कितभुजंतथा। पूजयिष्यतियश्श्रा
द्धेगयाश्राद्धायुतंलभेत्। शङ्खचक्रोर्ध्वपुण्ड्राद्यैरन्वितंवै
ष्णवंद्विजम्। भक्त्यासंपूजयेद्यस्तुदैवेपित्र्येचकर्मणि।
कल्पकोटिसहस्राणिकल्पकोटिशतानिच। यास्यन्ति
पितरस्तस्यविष्णुलोकंसुनिर्मलम्। ऊर्ध्वपुण्ड्रधरं
विप्रंतप्तचक्राङ्कितांसकम्। श्राद्धेसंपूजयेद्यस्तुगयाश्रा
द्धायुतंलभेत्। तप्तचक्रेणविधिनाबाहुमूलेसुलाञ्छितः।
पुनातिसकलंलोकंनारायणइवाघभिदितिच ॥ १३८ ॥
अत्रहिदैवेपित्र्येचकर्मणितप्तचक्रादिचिह्नशालिनएववि
प्रस्यसंप्रदानतयास्वीकरणमनन्तफलदम्-तद्रहितस्य
तथास्वीकरणंनिष्फलमितिचस्पष्टमुक्तम् ॥ १३९ ॥
एवंतत्रैवद्वितीयाध्यायउक्तम्-अचक्रधारीविप्रस्तुसर्व
कर्मसुगर्हितः। अवैष्णवत्वमापन्नोनरकंचाधिगच्छ
ति॥ चक्रादिचिह्नरहितंप्राकृतंकलुषान्वितम्। अवै
ष्णवंतुतंदूराच्छ्वपाकमिवसन्त्यजेत्। अवैष्णवस्तुयोवि
प्रश्श्वपाकादधमस्स्मृतः। अश्राद्धेयोह्यपाङ्क्तेयोरौरवनं

रकंव्रजेदिति—शङ्खचक्रोर्ध्वपुंड्रादिरहितंब्राह्मणंनृप । य
श्श्राद्धेभोजयेद्विप्रःपितृणांतस्यदुर्गतिः । शंखचक्रोर्ध्वपु
ण्ड्रादिचिह्नैःप्रियतमैर्हरेः । रहितस्सर्वधर्मेभ्यश्च्युतोनर
कमाप्नुयादितिच ॥ १४० ॥ अत्रचाचक्रधारिणस्स
र्वकर्मसुगर्हितत्वंश्राद्धसम्प्रदानत्वेपितृदुर्गतिहेतुत्वम
न्ततश्चक्रधारणस्याकरणेप्रत्यवायप्रदर्शनमुखेननित्य
त्वंचोक्तम् ॥ १४१ ॥ एवंविशिष्टधर्मशास्त्ररूपपराशर
स्मृतिद्वितीयाध्यायेप्युक्तम्-अचक्रधारिणंविप्रंयश्श्राद्धे
भोजयेन्नरः—रेतोमूत्रपुरीषादिसपितृभ्यःप्रयच्छतीति ॥
॥ १४२ ॥ अत्राचक्रधारिणःकव्यसम्प्रदानत्वस्यमहाप्र
त्यवायकरमितिदर्शितम् ॥ १४३ ॥ एवंप्राक्पञ्चमप
रिच्छेदोदाहृतप्रमाणेषुचक्राङ्कितस्यैवपित्र्यादिकर्मणि
प्रशस्ततमत्वंवहुधाप्रतिपादितंद्रष्टव्यम् ॥ १४४ ॥ ए
वंरामनाममाहात्म्येप्रतिवादिपक्षस्थैरेवोदाहृतेन—चक्रा
ङ्कितस्यसान्निध्येयत्कर्मकुरुतेनरः । स्नानंदानंतपोहो
मंतत्सर्वंचाक्षयंभवेदितिनारदीयवचनेनचक्राङ्कितस्य
सन्निधौक्रियमाणस्यसर्वस्यैवशास्त्रीयकर्मणोऽक्षयफ
लदत्वप्रतिपादनेनप्रत्युताभ्युदयविशेषहेतुत्वावगमेनत

स्यपुण्यकर्मसुसान्निध्यप्रतिषेधवचनंद्वेषिकल्पितमित्य
त्रकस्सन्देहइतिनिर्मत्सरंपश्यन्तुपण्डिताः ॥ १४५ ॥
चक्राद्यङ्कनंनिमित्तीकृत्यपितृकर्मानर्हत्ववर्णनंपुनरतीव
तुच्छम्-पितृप्रीणनातिशयार्थमेवचक्राद्याङ्कितवृषोत्स
र्जनस्यसर्वत्रप्रसिद्धत्वात् ॥ १४६ ॥ विष्णुस्मृतौष
डशीतितमाध्याये-वृषमथस्काररस्त्वङ्कयेत्-एकस्मिन्
पार्श्वेचक्रेणेत्यादिनाचक्राद्यङ्कनादिसंस्कारपूर्वकंवृषोत्स
र्गमभिधाय-उत्सृष्टोवृषभोयस्मिन्पिबत्यथजलाशये
जलाशयंतत्सकलंपितॄंस्तस्योपतिष्ठति । शृङ्गेणोल्लिख
तेभूमिंयत्रक्कचनदर्पितः । पितॄणामन्नपानंतत्प्रभूतमुप
तिष्ठतीतितथोत्सृष्टस्यवृषभस्यनिरतिशयपितृप्रीणनहे
तुताप्रतिपादनेनतप्तचक्राद्यङ्कनस्यपितृकर्मणिप्रशस्तत
मत्वमेवह्यभिहितम् ॥ १४७ ॥ किंवहुना-श्रीगयाक्षे
त्रेतप्तचक्राद्याङ्कितभगवद्भक्ताविप्रानेवानिमन्त्र्यसर्वदेशस
र्वमतस्थशिष्टैश्श्राद्धंक्रियतइत्ययमाचारस्सनातनःप्रसि
द्धः-गयाश्राद्धस्यचाक्षयपितृतृप्त्यादिवहुफलहेतुत्वंसु
प्रसिद्धम्-तत्रत्यश्राद्धस्यतादृशनिरतिशयफलहेतुतायां
प्रागुदाहृतप्रमाणान्तरसंवादानुगुण्येनतत्रत्यानिमन्त्रित

विप्राणांतप्तचक्राद्यङ्कितभागवतायेसरत्वमपिप्रयोजकंभ
वितुमर्हति–अतस्तप्तचक्राद्यङ्कनस्यापितूत्प्त्यादिविरो
धित्वेपारमार्थिकेतदेतत्सर्वमसङ्गतंस्यादितिनिर्मत्सरंत
त्त्वपर्यालोचनेचक्राद्याङ्कितभगवद्भक्तजनवैभवासहिष्णु
कुदृष्टिजनैःकेवलदुराग्रहकल्पितान्येवेदृशवचनानीतिसु
धियांसुज्ञानम् ॥ १४८॥ यान्यपिचहेमाद्रिकारेणोदाहृ
तानि–ब्राह्मणोयदिमूढात्मातापयेद्बाहुमुद्रया । कर्मार्हो
नभवेदत्रसर्वपाषण्डसञ्ज्ञितइतिवामनपुराणवचनमि
ति–ब्राह्मणस्यतनुर्ज्ञेयासर्ववेदमयीयतः । साचेत्सन्तापि
तायेनकिंवक्ष्यामिमहैनसः । चक्राङ्कितततनुर्यत्रराजन्
लिङ्गाङ्कितोपिवा । जपेच्चपौरुषंसूक्तमन्यथारौरवंव्रजे
दितिनारदीयवचनानीति–चक्रंशङ्खंतापयित्वायस्यदेहः
प्रदह्यते । सजीवत्कुणपस्त्याज्यस्सर्वकर्मबहिष्कृतइति
लिङ्गपुराणवचनमिति–वेदेषुयज्ञभागेषुयस्यनास्त्यधि
कारिता । सतापयित्वाचक्रादीन्धारयेत्स्वभुजद्वये । ब्रा
ह्मणोयदिलोभेनधारयेद्दग्धमुद्रिकाः । तस्यदर्शनमात्रे
णकुर्यात्सूर्यावलोकनमित्यादित्यपुराणवचनानीति–
पूर्वजस्स्वतनुंदग्ध्वाशङ्खचक्रादिभिःपृथक् । एतस्यनि

ष्कृतिर्नास्तिस्नानदानजपादिभिः । तस्यनिष्कृतिरुत्प न्नापाराशर्येणभाषिता । केशानांवपनंकुर्यात्पुनःकर्मस माचरेत् । गर्भगोलात्समुद्धृत्यगर्भाधानादिपूर्वकम् । षो डावृत्त्यैवकृच्छ्राणांप्रायश्चित्तमुदीरितमितिवाह्निपुराणव चनानीति--अज्ञात्वामुखजोयन्त्रमुद्रादग्धेभ्यआदरात् । सुवर्णमात्रंसङ्गृह्यप्राजापत्यंसमाचरेत् । तदर्धंपुनःकृ त्वाह्यहर्मात्रमुपोषणम् । कृत्वाशुद्धिमवाप्नोतिशुद्धिर्ना न्यत्रदृश्यतइतिकूर्मपुराणवचनानीतिचकानिचित्पुरा णसञ्ज्ञापितानिवचनानि ॥ १४९ ॥ तान्यपिविद्वेषक ल्पितान्येवप्रायेणतत्तत्पुराणगतैरेवप्रागुदाहृतवचनैस्स हदुर्वारविरोधत्वात्--प्रागुदाहृतबहुश्रुतिविरोधात्--तस चक्राद्यङ्कनेऽशुद्धिबीजगन्धाभावस्यप्रागेवावेदितत्वेनवै दिककर्मानर्हताकथनस्यप्रायश्चित्तकथनस्यचदुराग्रहैक मूलात्यन्तासमञ्जसलोकवञ्चनैकफलफणितिरूपता याःप्रेक्षावतांस्वतएवस्फुटंप्रतीयमानत्वाच्च॥ १५०॥ ए वमेवंजातीयकमर्वाचीनोदाहृतंकृत्स्नमपितप्तचक्राद्य ङ्कनानिन्दानिषेधपरंवचनजातमुक्ताविरुद्धवचनजातस मानयोगक्षेममेवबोध्यम्॥१५१॥ इदमत्रावधेयम्--द्वा

विडदेशेवैष्णवैर्वैदिकक्रियाकलापेषुभोजनादिव्यवहारे
षुचस्वशास्त्रानुरोधेनक्रियमाणमवैष्णवजनदूरीकरणम
वैष्णवानांविप्राणांवैष्णवीकरणंचासहमानेनहेमाद्रिका
रेणैवेमानिवचनानिप्रचारबाहुल्यविधुरपुराणान्तर्भूता
निकल्पयित्वोदाहृतानि--१ततःपूर्वंतानिनस्थितानि--
२यदिस्थितानिस्युः--३तर्हि--वेदान्ताचार्यकालेप्रतिवा
दिभिरिमानिवचनानिकुतोनोदाहृतानिस्युः--४ततोपि
पूर्वंवेदाचार्याणांसुदर्शनमीमांसाकाराणांवल्लालक्षोणि
पालसदस्यप्रतिवादिभिस्सहवादप्रसङ्गेपितैरीदृशानिव
चनानिनोदाहृतानि--५ततोपिपूर्वंश्रीवत्साङ्कमिश्राणां
यादवप्रकाशादिभिर्वादप्रसङ्गेपितैरपिनोदाहृतानीदृशा
निवचनानि--६तत्कालस्थितानांतेषांसर्वशास्त्रपारदृ
श्वत्वमास्तिकत्वमधर्मभीरुत्वमप्रतिहतपाण्डित्यंचत
दीयतत्तद्ग्रन्थावलोकिनामद्यापिविदितम्--७अर्वाचीना
नांनास्तिकत्वमधर्मभीतिलेशरहितत्वमसर्वदर्शित्वम
तिसाहसिकत्वंचेत्येवमादिकमपितदीयग्रन्थावलोकनेनै
वसुगमंसुधियाम्--८अतःप्राचीनैरनुदाहृतान्यर्वाचीनै
रुदाहृतानीमानिवचनानिकल्पितान्येवेतिनिश्चीयते--

किञ्च--यानिहेमाद्रिकारादर्वाचीनैरुदाहृतानि--विष्णु
बोधायनयमादिस्मृतिवचनसञ्ज्ञापितानिवचनानि--
१०तानिकुतोनोदाहृतानिहेमाद्रिकारेण--११संप्रतिप
न्नस्मृतिगततयोदाहृतेषुप्रागुक्तवचनेषुपुराणवचनेभ्यः
प्रबलेषुजाग्रत्सुतानिविहायाप्रसिद्धासम्प्रतिपन्नपुराण
गततयादुर्बलानिकानिचिद्वचनानिकिमित्युदाजहारहे
माद्रिकारः--१२अर्वाचीनोदाहृतानिपुराणवचनान्यपि
चबहूनिनहेमाद्रिकारोदाहृतानिदृश्यन्ते--१३नचहेमा
द्रिकारस्यसर्वस्मृतीतिहासपुराणादिवचनोदाहरणपूर्व
कंसर्वप्रायश्चित्तनिबन्धनंप्रणयतःस्मृतिकोशालाभस्सुव
चः--१४ तस्मात्पूर्वोत्तरसर्वसन्दर्भपर्यालोचने--यदाय
दावैष्णवविद्वेषःकलिबलविलसितेनक्रूरतरपूर्वदुष्कर्मप
रिपाकेनचप्रवृद्धोजातः--तदातदातत्तत्कालस्थितैरेवशठैः
प्रतिवादिपक्षस्थैःकल्पितानीदृशानिवचनानि--नतुत
त्तत्पूर्वकालस्थितानीतिविज्ञायते--१५अतएवोत्तरोत्तर
कालोदाहृतवचनानांपूर्वपूर्वकालस्थितप्रतिवादिभिरनु
दाहरणंचसंगच्छते--१६तस्मात्प्रतिवादिपक्षस्थैश्शठै
स्साहसिकैःकैश्चिल्लोकवञ्चनायतत्तत्स्मृतिपुराणादिस

ऽङ्गारोपेणोदाहृतानीदृशानिवचनानिसर्वथैवनश्रद्धेया न्यास्तिकजनानामिति ॥ १५२ ॥ तथाच—तस्मच क्राद्यङ्कनपरशास्त्राणांतन्निषेधपरवचनानांचमिथोवि रोधस्यदुष्परिहरत्वात्—एकतरपक्षपरशास्त्रस्याप्रमाण तास्वीकारावश्यकत्वेनिषेधपरवचनानामेवतथात्वस्वी कारआवश्यकोभवति—प्रसङ्गमन्तरेणप्रतिषेधायोगेन निषेधपरवचनानांप्रमाणत्वमाश्रित्यविधिपरशास्त्राणां प्रत्याख्यानायोगात्—विधिपरशास्त्राणांवहुत्वात्निषेध परवचनानांकतिपयत्वात्—भूयसांस्याद्बलीयस्त्वमिति न्यायेनोक्तवक्ष्यमाणयुक्त्यन्तरैश्चनिषेधपरवचनापेक्षया विधिपरशास्त्राणामेवप्रबलत्वाच्च ॥१५३॥ इत्थञ्चतत्त चक्राद्यङ्कननिषेधपरवचनानांश्रीवैष्णववैभवासहिष्णु शठपरिकल्पितत्वासिद्ध्यानात्रविकल्पपरत्वसम्भवइति बोध्यम् ॥ १५४ ॥ इदंपुनरत्रावधेयम्—अतिरात्रेषोड शिनंगृह्णाति—नातिरात्रेषोडशिनंगृह्णातीत्यादिषुहिविरो धस्यस्फुरणेपिविकल्पपरत्वमविरुद्धार्थपरतास्वीकारेणा श्रितम्—१ तप्तचक्राद्यङ्कनविधिपरशास्त्राणांतन्निषेधप रवचनानांचमिथोविरोधस्यदुरुद्धरतयापरस्पराविरुद्धा

र्थपरत्वासम्भवेनविकल्पोहिदुर्वचः— २ एकस्मिन्धर्मि
णिपरस्परविरुद्धधर्मप्रतिपादकत्वंहिशास्त्राणांविरोधः—
३ तप्तचक्राद्यङ्कनविधिपरशास्त्रेषुतप्तचक्राद्यङ्कनस्यनि
रतिशयशुद्धिहेतुत्वंप्रतिपाद्यते—तन्निषेधवचनेषुचनिर
तिशयाशुद्धिहेतुत्वंप्रतिपाद्यतइतिहिविरोधोदुरुद्धरः—४
एवंप्रथमेषुतप्तचक्राद्याङ्कितविप्रसम्प्रदानकहव्यकव्य
दानस्यदेवपितृतृप्त्यादिलक्षणानन्तफलहेतुत्वंप्रतिपा
द्यते-द्वितीयेषुतादृशफलहेतुत्वात्यन्ताभावःप्रतिपाद्यत
इतिविरोधः— ५ एवंप्रथमेषुतप्तचक्राद्यङ्कनस्यब्राह्मणक्ष
त्रियवैश्यलक्षणत्रैवर्णिकपूर्वकसर्वाधिकारिविषयत्वंप्रति
पाद्यते—द्वितीयेषुशूद्रादिमात्रविषयत्वंप्रतिपाद्यतइतिवि
रोधः— ६ एवमादयोहिबहवोविरोधादुरुद्धरास्सन्ति—७
नचैतेविरोधाएकतरशास्त्राप्रामाण्यस्वीकारमन्तरेणपरि
हर्तुंशक्याः—८ तस्मादेकतरशास्त्राप्रामाण्येऽवश्यंस्वीका
र्येक्वविकल्पप्रसक्तिः— ९ किंबहुना—तप्तचक्राद्यङ्कनस्य
नित्यत्वमेवमुक्तकण्ठंतच्छास्त्रेषुप्रतिपाद्यतइतिकथंनुवा
विकल्पस्सम्भवदुक्तिकइति ॥ १५५ ॥ अथतप्तचक्रा
द्यङ्कनविधिपरवचनानिसर्वाण्यकल्पितानिप्रमाणानि-

तन्निषेधवचनानिपरंसर्वाणिकल्पितान्यप्रमाणानीति कथंनिश्चीयते– १ अद्यतनेषुतत्तद्ग्रन्थकोशेषुतेषामनुप लम्भादितिचेत्– २ नतावन्मात्रेणतानितथानिश्चेतुंश क्यानि– ३ तथासतितप्तचक्राद्यङ्कनपरवचनेष्वपि कानिचित्कल्पितानीत्यभ्युपगन्तव्यानिस्युः– ४ यतः प्राचीनग्रन्थकारोदाहृतेषुतप्तचक्राद्यङ्कनविधिपरवचने ष्वपिकानिचिद्वचनान्यद्यतनेषुतत्तद्ग्रन्थकोशेषुयथापूर्वा नुपूर्वीकाणिनदृश्यन्ते –४ कानिचित्क्वचिन्नोपलभ्यन्ते ५ – यदिचआप्ततमप्राचीनग्रन्थकारोदाहृतानिवचना निनापलपितुंशक्यानि-पठनपाठनादिलक्षणप्रचारबा हुल्यविधुरग्रन्थकोशेषुदेशकालभेदेनलेखकप्रमादसाह सिककृतविक्षेपोत्क्षेपप्रक्षेपादिमूलनानाविधव्यत्यासा नांसम्भावितप्रसङ्गत्वात्–अतएवनिर्विवादकथाग्रन्थेषु सम्प्रतिपन्नाप्ततमप्राचीनग्रन्थकारोदाहृतवचनान्तरे ष्वपिबहवोव्यत्यासाअद्यतनेषुतत्तद्ग्रन्थकोशेषुप्रायशोनु भूयन्ते-तस्मात्प्राचीनग्रन्थकारोदाहृतवचनानिसहसा नापलपितुंशक्यानीत्युच्यते–तदातादृशादिशाविधिनिषे धवचनानामुभयेषामपितुल्यैवेतिनैकान्ततोनिषेधवच

नचतथाक्वचिदुदाहरणंदृश्यते—अतएतान्यर्वाचीनैः क
ल्पितान्येवेतितावदालोचनीयम्सुधीभिः ॥ १६८ ॥ ए
वंरामार्चनचन्द्रिकाख्येप्राचीननिबन्धनग्रन्थे पञ्चमेपट
ले—आनन्दवनसन्न्यासिनाशाङ्करमतस्थेनैवतप्तचक्राङ्क
धारणंश्रुतिस्मृत्याद्युपन्यासेनस्थापितम् ॥ १६९ ॥ न
चतत्रनिषेधवचनमेकमपिवातेनोदाहृतम् ॥ १७० ॥ ए
वंरामनाममाहात्म्याख्येग्रन्थेपञ्चमषष्ठप्रकरणयोरच्यु
ताश्रमसन्न्यासिनाद्वारकाशङ्करमठपतिपरम्पराघटकेन
तप्तचक्राङ्कधारणंश्रुतिस्मृत्याद्युपन्यासेनसप्रपञ्चंस्थापि
तम् ॥ १७१ ॥ तत्रापिचनिषेधवचनंनकिञ्चिदुदाहृतम्
॥ १७२ ॥ रामार्चनचन्द्रिकारामनाममाहात्म्यग्रन्थो
दयकालेऽमीषांनिषेधवचनानां सत्त्वेतदुदाहरणंतद्गतिक
ल्पनंचतद्ग्रन्थकाराभ्यांकिमितिनाकारिषाताम् ॥ १७३ ॥
किञ्च—रामनाममाहात्म्ये—ऊर्ध्वपुण्ड्रत्रिपुण्ड्रविधिनिषे
धवचनविषयविचारंकृत्वातयोःपुण्ड्रयोर्वैष्णवशैवलक्षणा
धिकारिविशेषविषयत्वम्—तत्तदितरनिन्दयोः—नहिनि
न्दान्यायेनतत्तत्प्रशंसामात्रपरत्वंचव्यवस्थापितम् ॥
॥ १७४ ॥ इत्थंव्यवस्थापयताग्रन्थकारेणतप्तचक्राङ्कनावि

षयेपिनिषेधवचनानातदानींसत्त्वेतेषांगतिव्यवस्थामकृ
त्वैवतप्तचक्राङ्कनंकथंस्थापितम् ॥ १७५ ॥ तस्मात्तदा
नीमस्थितानिपश्चादेवार्वाचीनैःकल्पितानीदृशवचना
नीतिस्फुटमवगम्यते॥ १७६ ॥एवंयाज्ञवल्क्यस्मृतितृती
याध्याये—उदक्याशुचिभिस्स्नायात्संस्पृष्टस्तैरुपस्पृशे
दितित्रिंशश्लोकव्याख्यानेस्नाननिमित्तास्पृश्यस्पर्शन
प्रतिपादनप्रकरणेप्राचीनेनविज्ञानेश्वरेण—शैवान्पाशुप
तान्स्पृष्ट्वालोकायतिकनास्तिकान्-विकर्मस्थान्द्विजान्
शूद्रान्सवासाजलमाविशेदितिब्रह्माण्डपुराणवचनमुदा
हरताशैवपाशुपतादिस्पर्शनस्यस्नाननिमित्तास्पृश्यस्प
र्शनरूपतादर्शिता ॥ १७७ ॥ नचतत्रतप्तचक्राद्यङ्कित
वैष्णवधर्मनिष्ठानामशुचित्वंस्मार्तैर्नैवसतातेनोपदर्शि
तंकिञ्चिदपि ॥ १७८ ॥ उक्तब्रह्माण्डपुराणवचनबला
द्वैष्णवधर्मप्रतिपादकशास्त्रान्तःपातिबहुप्रमाणान्तरब
लाच्चशैवपाशुपतादीन्शास्त्रचोदितशैवासाधारणभस्म
त्रिपुण्ड्ररुद्राक्षादिचिह्नधारणेनावर्जनीयशैवान्तर्भावान्
स्मार्तम्मन्यानन्यानपिद्विजानविशेषेणास्पृश्यबुद्ध्यादू
रीकुर्वत्सुश्रीवैष्णवशिष्टेषुसञ्जातमत्सरैरर्वाचीनैस्तुदर्शि

तद्ब्रह्माण्डवचनस्यपाशुपतादितन्त्रदीक्षितमात्रविषयतां
तप्तचक्राद्यङ्कनादिलक्षणवैष्णवधर्मनिष्ठानामपितत्तुल्य
तांचस्वबुद्ध्याध्यवस्यद्भिस्तप्तचक्राद्याङ्कितानांलिङ्गाद्य
ङ्कितानांचतुल्यतयानिन्दाप्रतिपादकानिकानिचिद्वच
नानिकल्पितानि ॥ १७९ ॥ एतानियदिपारमार्थिका
न्यभविष्यन्—तदाविज्ञानेश्वरेणापिपूर्वोक्तप्रकरणेऽवश्य
मुदाहृतान्येवाभविष्यन्नित्यतईदृशानिवचनानिध्रुवम
र्वाचीनैरेवकल्पितानीत्यवगन्तुंशक्यम् ॥ १८० ॥ किं
च—शारीरकमीमांसायांद्वितीयाध्यायद्वितीयपादेभगव
ताबादरायणेनापि—पत्युरसामञ्जस्यादित्यादिनापाशुप
तादिशैवतन्त्रमतंकृत्स्नमसमञ्जसमभिधाय-ततः-श्रीपञ्च
रात्रतन्त्रस्यापितन्त्रान्तरसामान्यबुद्ध्याकैश्चित्प्रसञ्जि
तामप्रामाण्यशङ्काम्—उत्पत्त्यसम्भवात्—नचकर्तुःकरण
मितिसूत्रद्वयेनोपक्षिप्य-विज्ञानादिभावेवातदप्रतिषेधः
विप्रतिषेधाच्चेतिसूत्रद्वयेनतादृशाशङ्कांनिरस्यप्रामाण्य
स्यैवसमर्थनादपि—पाशुपतादितामसतन्त्रसिद्धशैवधर्म
निष्ठानाम् -पञ्चरात्रादिपरमसात्त्विकशास्त्रप्रतिपन्नतप्त
चक्राद्यङ्कनादिलक्षणाङ्ककवैष्णवधर्मनिष्ठानांचतुल्यत

यादूषणप्रतिपादकपारमार्थिकवचनोदयःप्रमाणभूतशा
स्त्रेषुनकथञ्चिदपिसम्भवतीतिसिद्धंभवति॥ १८१॥अतो
वस्तुतः प्रमाणभूतेषुशास्त्रेष्वसत्त्वादेवदर्शितप्रकरणेवि
ज्ञानेश्वरेणशैवपाशुपतादिस्पर्शनप्रतिषेधकवचनमुदाह
रतासम्प्रतिप्रतिवाद्युदाह्रियमाणचक्राङ्किताशुचित्वप्रति
पादकवचनेषुकिञ्चिदपिवातत्सजातीयंकिञ्चिद्वचनान्त
रमपिवानोदाहृतमितिविमत्सरैर्विबुधैस्सुखेनविज्ञातुंश
क्यम् ॥ १८२ ॥ शारीरकमीमांसाशाङ्करभाष्येपि–उ
त्पत्त्यसम्भवादितिसूत्रव्याख्याने–श्रीपञ्चरात्रशास्त्रस्य
श्रुत्यनुसारिणः प्रत्याख्यानासम्भवमुपक्षिप्यतस्यशा
स्त्रस्यजीवेश्वरभेदवादिनस्स्वमतविरोधितयाकेनापिप्र
कारेणक्वचिदप्यंशविशेषेकथञ्चिदप्रामाण्यविवक्षयातत्प्र
करणस्थव्याससूत्राणिकस्मिंश्चिदंशविशेषेतदप्रामाण्य
परतयाव्याकुर्वतास्मार्तमतकूटस्थेनशङ्करेणापितत्रस
म्प्रतिपन्नविप्रतिपन्नांशानुपपादयता-तत्रयत्तावदुच्यते-
योसौनारायणःपरोव्यक्तात्प्रसिद्धःपरमात्मासर्वात्मा–
सआत्मनात्मानमनेकधाव्यूह्यव्यवतिष्ठतइतितन्नानि
राक्रियतइति–यदपितस्यभगवतोऽभिगमनादिलक्षण

माराधनमजस्रमनन्यचित्ततयाऽभिप्रेयते तदपि न प्रति
षिध्यत इति च कथितम् ॥ १८३ ॥ अत्र परमात्मभूतश्रीम
न्नारायणोपासनेतिकर्तव्यतारूपाभिगमनादिलक्षणभ
गवदाराधनप्रकारस्याभ्युपगतत्वात्तप्तचक्राद्यङ्कनादिल
क्षणवैष्णवधर्मा अप्यनुष्ठेया अभ्युपगता विज्ञायन्ते — ते
षामप्यभिगमनादिलक्षणभगवदाराधनप्रकारान्तर्गत
तयैव तच्छास्त्रप्रतिपन्नत्वात् ॥ १८४ ॥ अत एव — भ
रद्वाजसंहितायां न्यासोपदेशे तृतीयाध्याये — अथ स्वकर्म
निरतः प्राज्ञो भक्तस्सुलक्षणः । सत्सेवाभिरतो ह्येवप्र
पन्नास्सिद्धिमाप्नुयात् । यथार्हं विहितैस्तैस्तैस्संस्कारैस्सं
स्कृतः क्रमात् । नयेदात्मगुणोपेतस्तानि तानि व्रतानि
चेत्यादौ - अभिगमनादिलक्षणभगवदाराधनाधिकारिण
स्तच्छास्त्रपूर्वोत्तरप्रतिपन्नतापादिलक्षणतत्तत्संस्कार
संस्कृतत्वमधिकारप्रयोजकमभिधाय — ततोऽभिगमनो
पादानेज्यास्वाध्याययोगरूपपञ्चकालकर्तव्यभगवदारा
धनप्रकारान्विस्तरेणाभिधायान्ते — ये च भागवता मन्त्रा
ये च दिव्याश्च विग्रहाः । यथोपदेशं नियतस्तांश्च सेवेत नि
त्यशः । कृत्वाभिगमनं पूर्वमुपादाय च सम्पदः । इष्ट्वाधी

त्यचयुञ्जानोभोगैःकालंनयेदितीत्युपसंहृतम् ॥ १८५॥
एवंतत्रैवसंहितायांपरिशिष्टेप्रथमाध्यायउक्तम् । क्रमा
त्सभगवन्मन्त्रैःकल्पाविच्छुद्धमानसः । धृतोर्ध्वपुण्ड्रश्चक्रा
दिलाञ्छितोहरिमर्चयेदिति ॥ १८६ ॥ अत्रभगवदारा
धनाङ्गतयाचक्रादिलाञ्छनोर्ध्वपुण्ड्राद्यावश्यकत्वंस्पष्ट
मभिहितम् ॥ १८७॥ एवंतत्रैवपरिशिष्टेद्वितीयाध्याय
आदौ–उपासितगुरोर्वर्षंविष्णोर्दास्यमभीप्सतः । विहि
ताःपञ्चसंस्कारायुक्तस्यानन्यचेतसः । तापःपुण्ड्रस्तथा
नाममन्त्रोयागश्चपञ्चमः । अमीपरमसंस्काराःपारमैका
न्त्यहेतवइतिविहितानांपञ्चानांसंस्काराणाम्मध्येयाग
सञ्ज्ञस्यपञ्चमसंस्कारस्यैवपूर्वोक्तलक्षणभगवदाराधन
रूपतयातस्यचतापादिसंस्कारचतुष्टयपूर्वकमेवविहित
त्वेनतादृशसंस्कारचतुष्टयस्यतदङ्गत्वासिद्धेश्चक्राद्यङ्कन
स्यभगवदाराधनप्रकारान्तर्भूतत्वंस्पष्टम् ॥ १८८ ॥ ए
वंसर्वत्रैवश्रीपञ्चरात्रशास्त्रेऽभिगमनादिलक्षणभगवदा
राधनेतिकर्तव्यतान्तर्भूततयैवतप्तचक्राद्यङ्कनलक्षणता
पादिसंस्काराःसप्रपञ्चंनिरूपिताःप्रसिद्धाः ॥ १८९ ॥
तथाच–अभिगमनादिलक्षणंभगवदाराधनंपंचरात्रसि

इमभ्युपगच्छतास्मार्तमतकूटस्थेनशङ्करेणापितादृशा
राधनप्रकारान्तर्भूतंतप्तचक्राद्यङ्कनमप्यभ्युपगतमेवावि
ज्ञायते ॥११०॥ एवंस्वमताभिमानेनपंचरात्रेविरुद्धांश
सद्भावमुपपादयताचानेनजीवोत्पत्तिभगवद्व्यूहचतुस्सं
ख्याव्यवस्थयोर्द्वयोरेवविरुद्धांशरूपताऽभिहिता—नत्व
न्यांशस्यकस्यचिदित्यतोपिपंचरात्रप्रसिद्धतप्तचक्राद्यङ्क
नस्याविरुद्धांशरूपतैवतदनुमताविज्ञायते ॥ १११ ॥
यदिपुनःपंचरात्रप्रसिद्धतप्तचक्राद्यङ्कनस्यविरुद्धांशरूप
ताशङ्कराभिमतास्यात्—यदिवापुनस्तन्निषेधकवचना
निसम्प्रतिप्रतिवादिभिरुदाह्रियमाणानिपारमार्थिका
निचस्युः—तदास्वमताविरोधिनःपंचरात्रशास्त्रस्यग्रेनके
नापिप्रकारेणांशविशेषेपिकथंचिदप्रामाण्योपपादनबद्ध
स्पृहेणस्मार्तमतकूटस्थेनशङ्करेणतादृशवचनान्युदाहृ
त्यतप्तचक्राद्यङ्कनांशेपितदप्रमाणताकिमितिनोपपादि
तास्यादितिपर्यालोचने—पंचरात्रप्रसिद्धमाभिगमनादि
लक्षणंभगवदाराधनमभ्युपगच्छतश्शङ्करस्यतत्प्रकारा
न्तःपातितप्तचक्राद्यङ्कनमनुमतमतमेवेति—सम्प्रतिप्र
तिवादिभिरुदाहृयमाणानितन्निषेधकवचनानितदानी

मास्थितानियश्चादर्वाचीनैरेवकल्पितानीतिचसुधियांसु
ज्ञानम् ॥ ११२ ॥ ईदृशंस्वमतकूटस्थशङ्कराभिप्राय
मनुसन्दधानाभ्यांरामार्चनचन्द्रिकाकाररामनाममाहा
त्म्यकाराभ्यामानन्दवनाच्युताश्रमसन्न्यासिभ्यांजीव
ब्रह्माद्वैतमभ्युपगच्छद्भ्यामेवभगवदाराधनाङ्गतयाचो
दितंतप्तचक्राद्यङ्कनमावश्यकमेवसर्वेषांनतुविरुद्धमित्य
भिप्रेत्यतदिदंश्रुतिस्मृत्यादिप्रमाणोपन्यासपूर्वकंभगव
द्भक्तैरनुष्ठेयंसंस्थापितम् ॥११३॥ एवंबहुभिःप्राचीनैरव
श्यकर्तव्योदाहरणप्रकरणेष्वप्यनुदाहरणात्—प्रत्युतप्र
तिवादिष्वेवकैश्चनतप्तचक्राद्यङ्कनस्थापनदर्शनाच्चतप्तच
क्राद्यङ्कनानिषेधवचनानिसर्वाण्यर्वाचीनैःकल्पितान्येवे
तिनिरवद्योयंनिश्चयः ॥११४॥ एतेनामीषुवचनेषुकेषा
ञ्चित्कथञ्चिदविरुद्धार्थकत्वोपपादनप्रयासोप्यनुपादेयः—
सम्यक्परिशीलनेतेषांसद्भावस्यैवासिद्धेः ॥ ११५ ॥ इदं
पुनरत्रावधेयम्—मन्वादीनांसामान्यधर्मशास्त्रेषुविशिष्ट
धर्मशास्त्रेषुवाप्रमाणतयासम्प्रतिपन्नेषुनतप्तचक्राद्यङ्क
नादिलक्षणवैष्णवधर्मदीक्षानिषेधवचनोदयःकथञ्चिद
पिसम्भवितुमर्हति—श्रुतिसिद्धोक्तदीक्षाविधिविरुद्धार्थ

वादित्वेविरोधाधिकरणन्यायेनप्रामाण्यहानिप्रसङ्गात्प्र
त्युततद्विधिवचनानामेवतत्रबहुलमुपलम्भाच्च– १ त
स्मात्तादृशशास्त्रघटकतयोदाहृतानिप्रतिषेधवचनानिक
ल्पितानीत्यत्रनसन्देहः–तत्तद्ग्रन्थकोशेषुतेषामनुपल
म्भान्न्यायाननुगुणत्वाच्च– २ तामसशास्त्रेषुतुपरावरत
त्त्वव्यत्यासाभक्ष्यभक्षणापेयपानागम्यागमनादिनाना
विधविरुद्धाचारप्रतिपादकवचनवदीदृशमपिवचनंक
चित्किञ्चित्स्यादपि– ३ यच्छाययैवचान्यत्रापितादृश
वचनानिकल्पकाःकल्पयन्ति–४ तदपिश्रुतिपञ्चरात्रसा
त्त्विकस्मृतीतिहासपुराणादिशास्त्रविरोधादप्रमाणमित्ये
वप्रत्याख्येयम्–५ यदपीदृशंवचनंसम्प्रतिपन्नेष्वपिशा
स्त्रेषुकचित्किञ्चिदस्त्येवेत्याग्राहिणोमन्यन्ते–५ तदपिपू
र्वोक्तश्रुतिपञ्चरात्रादिबहुतरप्रबलशास्त्रविरोधेनैव कथ
ञ्चिन्नेतव्यम् ६ नेतुमशक्यत्वेविरोधाधिकरणन्यायेनाप्र
माणमित्येवप्रत्याख्येयम्–महर्षीणामपिरजस्तमोमूल
कादाचित्कप्रमादस्यसम्भावितत्वात्–तन्मूलविरुद्धवच
नस्यकस्यचित्कचित्सम्भवेश्रुत्यादिप्रबलशास्त्रविरोधेन
तत्प्रत्याख्यानस्याप्युचितत्वाच्च–७अतएवज्ञातिशायित

ज्ञानानामपिकपिलहिरण्यगर्भपशुपतीनांस्मृतयःश्रुत्या
दिविरोधेनाप्रमाणतयैवभगवताबादरायणेनशारीरकमी
मांसायांप्रत्याख्याताः-- २८ अतएवचपूर्वमीमांसायां
प्रथमाध्यायतृतीयपादे- विरोधेत्वनपेक्षंस्यादसतिह्यनु
मानमित्यधिकरणेश्रुतिविरोधेस्मृतीनांप्रत्याख्यानमेव
कृतं--९ नतुविकल्पपरत्वंस्वीकृतम्--श्रुतिस्मृत्योस्तुल्य
बलत्वाभावात्-- १० अतःप्रमाणमप्रमाणंचविवेक्तुमश
क्नुवन्तोमन्दमतयः--शक्नुवन्तोप्यसम्मन्यमानालोकव
ञ्चनपरादुर्मानिनश्चस्वैरंजल्पन्तिचेत्काममजल्पन्तु --११
ततःकिन्नश्छिन्नंभवति--१२प्रमाणशरणाआस्तिकास्तु
तत्त्वंजानीयुरेव--१३तस्मान्नात्रविधिनिषेधवचनानांवि
कल्पपर्यवसायित्वंसम्भवतीति ॥११६॥ एतेनार्वाचीन
भास्करकृततप्तचक्राद्यङ्कननिषेधपरश्रुतिवचनोदाहरण
मपिनिरस्तम्- तादृशश्रुतिवचनानांवाचुदाहृताखिलश्रु
तिप्रतिकोटितयोदाहरणात्तेनैवकल्पितत्वावगमात्--
तादृशश्रुतिसत्त्वेशारीरकमीमांसायांप्रागुदाहृतप्रकरणे
पञ्चरात्रशास्त्रस्याप्रामाण्यशङ्कामुपक्षिप्यसमाधानावस
सरेजीवोत्पत्त्याद्यंशइवतप्तचक्राद्यङ्कनांशेपिवेदविरुद्धत्व

निबन्धनाप्रामाण्यशङ्कातत्समाधानयोर्बादरायणेनकर्त
व्यत्वात्--तादृशप्रकरणस्थबादरायणग्रन्थंजीवोत्पत्त्या
धंशेपंचरात्रशास्त्रस्याप्रामाण्यप्रतिपादनपरमेवव्याकुर्वा
णेनशङ्करेणापिस्वभाष्येदर्शितश्रुतिमुदाहृत्यतत्तचक्रा
द्यङ्कनांशेपिपंचरात्रशास्त्रस्यवेदविरुद्धत्वहेतुनाप्रामाण्य
प्रतिषेधोपपादनावश्यकत्वात्--तत्रतादृशशङ्कासमाधा
नयोस्सूत्रकारेणकरणादर्शनात्--शङ्करेणस्वभाष्यस्वप
क्षानुगुणयथोक्तलक्षणप्रामाण्यप्रतिषेधोपपादनस्याप्य
दर्शनात्--अर्वाचीनभास्करादन्येनकेनाप्येतावत्पर्यन्त
मुदाहरणादर्शनाच्चतादृशश्रुतिवचनानांकल्पितत्वावधा
रणात् ॥ ११७ ॥ एवंभूयसांस्याद्बलीयस्त्वमितिन्या
येनापिमहतोमहतश्शास्त्रौघस्यतप्तचक्राद्यङ्कनविधिपर
स्यश्रुतिपञ्चरात्रस्मृतीतिहासपुराणादिलक्षणस्यकल्पि
तत्वशङ्कायास्सुदूरपराहतत्वेनतादृशविधिनांकतिपयाना
मेवप्रतिषेधवचनानांदुर्बलानांकल्पितत्वंसुनिश्चयंभवति
॥ ११८ ॥ एवमनादिकालल्लोकमान्यवैदिकशिष्टगो
ष्ठीपारम्पर्यानुष्ठानसद्भावोपितप्तचक्राद्यङ्कनविधिपरशा
स्त्राणामेवसद्भावंपारमार्थिकमवगामयन्प्रतिषेधवचना

नांकल्पितत्वमवगमयति ॥ १९९॥ प्रसिद्धोहिदक्षिण
देशेद्राविडकर्णाटकान्ध्रादिदेशेषु--उत्तरदेशेगयाकुरुक्षे
त्रादिदेशेषुतप्तचक्राद्यङ्कनादिलक्षणवैष्णवधर्मानुष्ठानस
म्प्रदायश्चिरन्तनः ॥ २०० ॥ किंबहुना--सर्वदेशसर्वम
तस्थशिष्टाद्राविडदेशेश्रीरङ्गश्रीवेङ्कश्रीवेङ्कटाद्रिप्रभृतिदि
व्यदेशेषुतप्तचक्राद्यङ्कनलक्षणशालिश्रीवैष्णवजनसका
शाद्भगवत्तीर्थप्रसादादिकंनिर्विशङ्कंगृह्णन्तोदृश्यन्ते--२ ग
याक्षेत्रेतप्तचक्राद्यङ्कनादिलक्षणशालिवैष्णवानेवनिम
न्त्र्यश्राद्धंकुर्वन्तश्चदृश्यन्ते--३एषआचारश्चानादिकालत
स्सिद्धोनाधुनिकः--४ एतत्पर्यालचनेपिप्रतिवाद्युदाहृ
तनिषेधवचनानामर्वाचीनकल्पितत्वंवादुदाहृतविधिशा
स्त्राणामनादिकालसिद्धत्वंचस्पष्टमवगम्यते--५प्रति
वादिनोहिस्वोदाहृतनिषेधवचनोक्तरीत्यातप्तचक्राद्यङ्क
नशालिनोऽत्यन्तायोग्यान्मन्यन्ते--६वादिनश्चतानेव
विधिशास्त्रोक्तरीत्याऽत्यन्तयोग्यान्मन्यन्ते--७अत्रवा
दिपक्षएवचानादिकालसिद्धाचारानुगुण्यात्प्रामाणिको
मन्तव्योभवतीति--८नप्रतिवादिपक्षः--९यदिप्रतिवादिप
क्षःपारमार्थिकोऽभविष्यत्--१०तदानयथोक्तलक्षणआ

चारःप्रतिवादिष्वप्यस्थास्यत्--११नखलुशिष्टाअत्यन्त
पापिष्ठतयास्वबुद्धिनिश्चितजनसकाशात्तीर्थप्रसादादिकं
गृह्णीयुः--१२नवातानेवनिमन्त्र्यश्राद्धादिशास्त्रीयकर्मा
णिकुर्युः--१३तथाचनिर्मत्सरंतदेतत्सर्वपर्यालोचनेनिषे
धवादोऽर्वाचीनएवेति--निषेधवचनानिवैष्णववैभवविद्वे
षिभिरर्वाचीनैःकल्पितान्येवेतिचसिद्धंभवतीतिनिरव
द्योऽयंनिश्चयः ॥ २०१ ॥ किञ्च--वैष्णववैभवास
हिष्णुतालक्षणहेतोःप्रतिवादिषुदर्शनात्--तन्मूलकत्वे
नापिकल्पितत्वंनिषधवचनानांन्यायसञ्चारतोनिर्णीय
प्रत्याख्यानंकर्तुंशक्यम् ॥ २०२ ॥ अतएवहिपूर्वतन्त्र
प्रथमाध्यायतृतीयपादे--हेतुदर्शनाच्चेतिचतुर्थसूत्रेलो
भादिदृष्टहेतुदर्शनेन--औदुम्बरीसर्वावेष्टयितव्येत्यादि
स्मृतेः--औदुम्बरींस्पृष्ट्वोद्गायेदित्यादिश्रुतिविरुद्धमुपल
भ्यमानायालोभादिदृष्टहेतुमूलत्वंनिर्णीयप्रत्याख्यानं
कृतम् ॥ २०३ ॥ तदिदमुक्तंहितत्सूत्रशाबरभाष्ये--लो
भाद्वासआदित्समानाऔदुम्बरींकृत्स्नांवेष्टितवन्तःके
चित्--तत्स्मृतेर्बीजमित्यादिना ॥ २०४ ॥ नचतस्मच
क्राद्यङ्कनादिलक्षणधर्माणांकेषुचिदननुष्ठानदर्शनेनानि

षेधवचनानामपिपारमार्थिकत्वंसम्भवतीतिशक्यंवक्तु
म्--शास्त्रसिद्धेष्वेवबहुषुधर्मेषुबहूनामननुष्ठानदर्शनेन
तावन्मात्रेणतत्तद्धर्मनिषेधवचनसद्भावस्यदुर्निर्णयत्वा
त् ॥२०५॥ तथाच--अनुष्ठानंयथावचनसद्भावमवगम
यितुंशक्नोति--नतथाऽननुष्ठानं निषेधवचनसद्भावमिति
निषेधवचनानांयथोक्तहेतुभिर्निर्णीयमानंकल्पितत्वंन
केषांचिदननुष्ठानमात्रेणापह्नोतुंशक्यमितिसिद्धम् २०६
इत्थंनानाविधान्यथासिद्धिपराहतानांनिषेधवचनानां
विधिवचनैरतुल्यबलत्वात्तुल्यबलविरोधलक्षणविकल्प
बीजाभावान्नात्रविकल्पकथागन्धावकाशः ॥ २०७ ॥
एतेन--विधिनिषेधवचनानांपरस्परविरोधेनैकतरपक्षव
चनानामप्रमाणत्वमास्थायाविकल्पपरत्वासम्भववर्णन
मयुक्तम्--विरोधपरभागस्यप्रशंसार्थार्थवादरूपतायाल
क्षणादिभिरविरुद्धार्थपरतायावास्वीकारसम्भवेनाविरोध
स्यपरिहर्तुंशक्यतयाविकल्पपरत्वस्वीकारबाधकानुपल
म्भात्--अन्यथासम्प्रतिपन्नश्रुतिस्मृतिवचनान्तरेष्वपि
परस्परविरुद्धेष्वेकतरपक्षपरवचनापलापेनाविकल्पपर
त्वस्वीकारमात्रोच्छेदप्रसङ्गाच्च--१प्रातःप्रातरनृतन्तेवद

न्तिपुरोदयाज्जुह्वतियेऽग्निहोत्रमित्यनुदितहोमनिन्दाह्यु
दितहोमप्रशंसार्थैत्युच्यते--२ अतएवमनुनापिद्वितीया
ध्यायउक्तम्--श्रुतिद्वैधंतुयत्रस्यात्तत्र धर्मावुभौस्मृतौ ।
उभावपिहितौधर्मौसम्यगुक्तौमनीषिभिः । उदितेनुदिते
चैवसमयाध्युषितेतथा । सर्वथा वर्ततेयज्ञइतीयंवैदिकी
श्रुतिरिति--३ अत्रहिश्रुतिवचनपरस्परविरोधेवचनप्राति
पन्नस्सर्वएवार्थोधर्मइति---अग्निहोत्रहोमंसूर्योदयात्पूर्वं
विदधतीश्रुतिः--सूर्योदयात्पश्चाद्विदधतीतदन्याश्रुतिः--
सूर्यनक्षत्रवर्जितेसमयाध्युषिताख्यकालेविदधतीतदप
राश्रुतिश्चतत्रनिदर्शनमितिचस्पष्टमुक्तम्---४ अयंन्याय
स्स्मृतिष्वपितुल्ययोगक्षेमः--५ तथाचपरस्परविरुद्धवच
नसत्वेतत्तद्धर्मप्रशंसार्थतांपरस्परनिन्दापरभागयोस्स्वी
कृत्यतत्तद्वचनप्रतिपन्नार्थानांसर्वेषामेवधर्मत्वंविकल्पतः
प्रयोगभेदेनचानुष्ठेयत्वंव्यवस्थाप्यम्--६एतदर्थमेवच--
नहिनिन्दानिन्द्यंनिन्दितुंप्रवर्तते--अपितुनिन्दितादित
रत्प्रशंसितुमितिन्यायःप्रवृत्तः-७अतइहापितत्तचक्राद्यङ्क
नविधिनिषेधपरवचनानामुक्तन्यायेनतत्तत्प्रकरणस्थ
धर्मविशेषप्रशंसार्थार्थवादरूपतांविरोधपरभागस्यस्वीकृ

त्याविरोधंसमर्थ्यविकल्पपरत्वंसूपपादमेवेतिनानिषेधप
रवचनानांकल्पितत्ववर्णनंयुक्तमितिकस्यचिन्निर्वाहो
ऽपिनिरस्तः--प्रागुक्तरीत्याशङ्करविज्ञानेश्वरानन्दवनाच्यु
ताश्रमादिस्मार्तमतस्थग्रन्थकारैरेवप्राचीनैस्स्वग्रन्थेषुप्र
सङ्गप्राप्तेऽप्यनुदाहरणात्प्रत्युततप्तचक्राद्यङ्कनादिलक्षण
वैष्णवधर्माणामभ्युपगमस्थापनादिदर्शनाच्चोक्तनिषेध
वचनानामर्वाचीनकल्पितत्वस्यस्पष्टमवगमनेनतत्रवि
कल्पप्रसङ्गानवकाशात्--अविचाल्याविप्रतिपन्नतुल्यब
लमिथोविरुद्धवचनस्थलएवप्रागुक्तरीत्याविरोधपरिहार
विकल्पयोस्स्वीकार्यत्वात्--कल्पितत्वधीकवलितानामी
दृशवचनानामपिविकल्पपर्यवसानस्वीकारेऽनवस्थाप्र
सङ्गस्यदुर्वारत्वात्प्रागुदाहृतमनुस्मृतावपिश्रुतिद्वैधएववि
कल्पपर्यवसानस्वीकारेणश्रुतिस्मृतिविरोधेस्मृतिवचना
नांपारमार्थिकानामपिप्रागुक्तविरोधाधिकरणन्यायेनप्र
त्याख्यानस्यैवप्राप्ततयातप्तचक्राद्यङ्कनविधायिबहुश्रुति
विरोधिनामुक्तानिषेधपरस्मृतिवचनानांवास्तविकत्वाभ्यु
पगमेऽपिप्रत्याख्यातव्यत्वेसिद्धेप्रागुक्तरीत्यापरश्शतान्य
थासिद्धिपराहतानाममीषांप्रत्याख्यानस्यकैमुतिकन्या

यसिद्धतयाविकल्पकथायास्सुदूरपराहतत्वाच्च ॥२०८॥
किञ्च--तप्तचक्राद्यङ्कनविधिपरशास्त्राणांतन्निषेधपरवच
नानांचनतावद्विकल्पपरत्वमपिसम्भवदुक्तिकम्--तप्तच
क्राद्यङ्कनधारणाधारणयोस्तुल्यफलहेतुत्वासम्भवात्--
धारणसाध्यतयाभिमतफलविशेषस्याधारणेपिसिद्धौ
धारणस्यतद्धेतुत्वासिद्ध्याधारणविधायिशास्त्रनैरर्थक्य
प्रसङ्गाच्च॥२०९॥व्रीहियवयोस्तुल्यफलहेतुतयाभिमत
योरेवहिविकल्पोदृष्टचरः॥२१०॥अतएवचशारीरकमी
मांसायांतृतीयाध्यायतृतीयपादे--विकल्पोऽविशिष्टफ
लत्वादितिसूत्रयताबादरायणेनापितुल्यफलहेतुत्वमेव
विद्याविकल्पबीजमभिहितम्॥२११॥नचैवंतर्हि--अति
रात्रेषोडशिनंगृह्णाति--नातिरात्रेषोडशिनंगृह्णातीत्यत्र
षोडशिग्रहणाग्रहणयोर्विकल्पाङ्गीकारःकथंसङ्गतइतिवा
च्यम्--तत्रापिषोडशिग्रहणसाध्यफलकामष्षोडशिनंगृ
ह्णीयात्--अतत्कामस्तन्नगृह्णीयादित्येवमर्थस्यैवविवक्षि
तत्वात्--नित्यत्वाभावमात्रेणतत्रविकल्पव्यवहारस्यगौ
णत्वात्॥२१२॥ नचेहापितथैवविकल्पव्यवहारोऽस्त्विति
वाच्यम्--तप्तचक्राद्यङ्कनलक्षणवैष्णवधर्मस्यप्रागुदाहृत

प्रमाणैर्नित्यतावगमेनतादृशविकल्पव्यवहारस्यापीहा सम्भवात् ॥ २१३ ॥ अतप्ततनूर्नतदामोअश्नुते--शृ-तासइद्वहन्तस्तत्समाशतेतिश्रुतौ--तप्तचक्राद्यङ्कनरहितानांनमोक्षः--तद्धारिणामेवमोक्षइतिप्रतिपादनात्--दक्षिणेतुभुजेविप्रोबिभृयाद्वैसुदर्शनम्--सव्येतुशङ्खंबिभृयादितिब्रह्मविदोविदुरितिश्रुतौ-- अहरहस्सन्ध्यामुपासीतेत्यादाविवकामोपनिबन्धमन्तरेणैवचक्राद्यङ्कनधारणाविधानात्-अग्निहोत्रंयथानित्यंवेदस्याध्ययनंयथा॥ब्राह्मणस्यतथैवेदंतप्तचक्रादिधारणमितिपाद्मवचनेनरामार्चनचंद्रिकारामनाममाहात्म्ययोरानन्दवनाच्युताश्रमाभ्यांस्मार्तमतस्थाभ्यामेवोदाहृतेनतप्तचक्रादिधारणस्यस्पष्टमेवनित्यत्वाभिधानाच्चतप्तचक्राद्यङ्कनस्यनित्यत्वंहिदुरपह्नवम् ॥ २१४ ॥ प्रागुदाहृतश्रुतिस्मृत्यादिप्रमाणगणेषुचायमर्थोऽतीवस्पष्टः ॥२१५॥ यदपि--श्रौतस्मार्तधर्मप्रशंसार्थंतप्तचक्राद्यङ्कनादिलक्षणवैष्णवधर्मनिन्दावचनानिप्रवृत्तानि--उदितहोमप्रशंसार्थानुदितहोमनिन्दावचनवत्--तथाच--शास्त्रसिद्धत्वेनानुदितहोमानुष्ठानवद्वैतप्तचक्राद्यङ्कनादिलक्षणवैष्णवधर्मानुष्ठानमपिन

वर्जनीयकोटावन्तर्भवति-अर्थवादस्य-नहिनिन्दान्याये नप्रकृतार्थप्रशंसामात्रेतात्पर्यादन्यस्यवर्जनेतात्पर्याभा वात्-ततश्चयथामनोरथंतत्तदधिकारिणांतत्तदनुष्ठान सम्भवेनान्ततोविकल्पएवसिद्धोभवतीतिनिषेधवचना न्यपिनावश्यंकल्पितानीत्येवंवक्तव्यानीत्युक्तंकैश्चित् ॥ ॥ २१६ ॥ तदप्ययुक्तम्-तप्तचक्राद्यङ्कनादिलक्षणवै ष्णवधर्मस्यप्रागुदाहृतश्रुतिस्मृत्यादिप्रमाणप्रतिपन्न नित्यत्वविरोधेनविकल्पासम्भवात्-प्रागुदाहृतश्रुति स्मृत्यादिसिद्धस्यास्यापिधर्मस्यश्रौतस्मार्तधर्मरूपत्वे नतन्निन्दायाःश्रौतस्मार्तधर्मप्रशंसार्थत्वासम्भवेनतन्नि न्दावचनानांसर्वथापारमार्थिकत्वायोगाच्च ॥ २१७ ॥ नचयज्ञादिधर्मप्रशंसार्थातप्तचक्राद्यङ्कनलक्षणवैष्णवध र्मनिन्देतिवाच्यम्-तप्तचक्राद्यङ्कनादिलक्षणसंस्कारसं स्कृतैःक्रियमाणयज्ञादिश्रौतस्मार्तधर्माणांतादृशसंस्का रासंस्कृतक्रियमाणतादृशधर्मापेक्षयाकोटिगुणातिश यितश्रेयस्साधनतायाःप्रागुदाहृतप्रमाणगणसिद्धतयाय ज्ञादिधर्मप्रशंसार्थंतप्तचक्राद्यङ्कनादिसंस्कारनिन्दनायो गात् ॥ २१८ ॥ किञ्च-तप्तचक्राद्यङ्कनादिलक्षणवै

ष्णवधर्मापेक्षयायज्ञादिधर्माणांप्रशस्तत्वंनामतत्साध्य
फलोत्कृष्टफलसाधकत्वरूपंवाच्यम् ॥ २१९ ॥ तच्च
नसम्भवति – मोक्षफलमुख्यसाधनतयायथायथंतत्त
दधिकार्यपेक्षितफलान्तरसाधनतयाचप्रतिपन्नात्तप्तच
क्राद्यङ्कनादिलक्षणवैष्णवधर्माद्यज्ञादिधर्माणामुत्कृष्टफ
लजनकतायाःक्वाप्यप्रतिपन्नत्वात् ॥ २२० ॥ यद
प्युच्यते–बाह्यशास्त्रसिद्धकेशोल्लुञ्छनादिनिषेधवचनोद
यवत्–पाञ्चरात्रादसच्छास्त्रसिद्धतप्तचक्राद्यङ्कनादिनि
षेधवचनोदयस्सम्भवति–अतोऽप्रसक्तप्रतिषेधासम्भव
माश्रित्यप्रतिषेधवचनोदयासम्भववर्णनमयुक्तमिति
॥ २२१ ॥ तदपितुच्छम्–भगवद्बादरायणादिपरमर्षिभि
र्महाभारतादिषुवेदवत्प्रतिष्ठापितप्रमाणसार्वभौमभाव
स्यपरमास्तिकवेदवेद्यपरब्रह्मभूतभगवन्नारायणमुखावि
र्भूतस्यश्रीपञ्चरात्रशास्त्रस्यस्वमताविरोधित्वनिबन्धनव
र्वाचीनकुदृष्टिकल्पितासच्छास्त्रताप्रलापकथायाअप्र
लापकथायाअप्रयोजकत्वात्–श्रुतिस्मृत्यादिपरश्शतवच
सांतत्प्रतिपाद्यतप्तचक्राद्यङ्कनादिवैष्णवधर्मप्रतिपादकत
यातत्संवादिभूतानांप्राक्प्रदर्शिततयासच्छास्त्रेषुतान्नि

षेधवचनोदयस्यावकाशलेशाभावात्--असच्छास्त्रेषुतादृ
शवचनसद्भावस्यवास्तविकत्वेपितद्बलेनपञ्चरात्रशास्त्रो
पेक्षणेजैनबौद्धादिबाह्यशास्त्रविरोधेनवेदस्याप्युपेक्षणी
यताप्रसङ्गस्यदुर्वारत्वात्--- परमर्ष्यादिलक्षणशिष्टगोष्ठी
परिगृहीतत्वस्यानुपेक्षाबीजत्वेपञ्चरात्रेपितस्यतुल्यत्वा
च्च ॥ २२२ ॥ तस्मात्तप्तचक्राद्यङ्कनादिप्रतिषेधवचसांप्र
तिवादिमतस्थैरेवप्राचीनैःप्राप्तप्रसङ्गेष्वपिप्रकरणेष्वनुदा
हृतत्वेनप्रस्फुटमेवावगम्यमानमर्वाचीनशठजनकल्पि
तत्वंनकेनापिप्रकारेणापह्नोतुंशक्यमितिसिद्धम्॥२२३॥
तथाच-तप्तचक्राद्यङ्कनादौप्रमाणासद्भावप्रतिषेधवचन
सद्भाववादौप्रत्याख्यातौ॥२२४॥ अतस्तद्वादिनःपाम
रजनवञ्चनमात्रपराअनाघ्रातमीमांसान्यायगन्धाअना
दरणीयाएवप्रामाणिकैर्न्यायविद्भिरितिसिद्धम्॥२२५॥
इतिश्रीभगवद्धर्मदर्पणेतप्तचक्राद्यङ्कनादौप्रमाणासद्भाव
प्रतिषेधवचनसद्भाववादप्रतिक्षेपोनामषष्ठःपरिच्छेदः६॥

अथ भगवद्धर्मदर्पणे

सप्तमपरिच्छेदः

श्रियःकान्तायनमः ॥ श्रीमतेविष्वक्सेनायनमः ॥
श्रीमतेरामानुजायनमः ॥ श्रीमदनन्तार्यमहागुरवेनमः ॥
श्रीमतेवरवरमुनयेनमः ॥

अथतप्तचक्राद्यङ्कनविषयप्रत्यक्षश्रुतीनामतत्परत्वापादकान्यार्थत्ववादःप्रत्याख्यायते ॥१॥ यत्तावदत्रमन्वन्तेप्रतिवादिनः—पवित्रंतइत्यादिश्रुतावतप्ततनूरित्यादेरन्वयव्यतिरेकाभ्यांकृच्छ्रचान्द्रायणादितपसोमोक्षसाधनतापरत्वमिति ॥ २ ॥ तत्तावन्नसम्भवति—अतप्ततनूरित्यत्रकरणतयान्वयाय कृच्छ्रचान्द्रायणादितपसेत्यस्यप्रकरणादप्राप्तस्याध्याहारप्रसङ्गात् ॥ ३ ॥ अस्माकन्तुश्रुत्यन्तरानुगुणःप्रकरणश्रुतपवित्रविषयस्तेनेतिशब्दस्स्वरसतएवप्रकरणादितःप्राप्नोतीतिनतादृशाप्राप्ताध्याहारदोषप्रसङ्गः ॥ ४ ॥ किञ्च—अतप्ततनूरित्याद्युत्तरभागस्योक्तार्थपरत्वेपवित्रंतइत्यादिपूर्वभागप्रतिपन्नार्थस्यतादृशार्थंप्रतिकथञ्चिदप्युपयोगित्वानुपलम्भेनपू

वोत्तरभागयोःपरस्परसङ्गतार्थकत्वंनैवसम्भवति॥५॥ य
त्पुनरत्राहार्वाचीनोभास्करोनामकश्चित्--पवित्रंतइत्या
दिश्रुतिरन्वयव्यतिरेकाभ्यांकृच्छ्रचान्द्रायणादितपसो
मोक्षसाधनत्वप्रतिपादनपरा--तथाहि--ब्रह्मणश्चतुर्मुख
स्यपते--हेविष्णो--प्रभुस्त्वम्--सार्वविभक्तिकस्तसिः--
गात्राणिपर्येषि--व्याप्नोषि--अन्तर्यामिरूपेणवर्तसे--ता
दृशस्यतेतव--पवित्रम्--पूतंपवित्रम्मेध्यंचेत्यमरकोशा
भिधानात्--परिशुद्धम्--विततम्--विस्तृतम्--तत्--प्रसि
द्धम्मोक्षरूपंसुखम्--अतप्ततनूः--तप्तम्--तपः--भावेनि
ष्ठा--तद्रहितातनूर्यस्यसतथोक्तः--यद्वा-कर्तरिक्तप्रत्ययः-
अतएवामः--अपक्वः--अक्षीणपापइतियावत्--एवंविधः
पुमान्- नाश्नुते--नप्राप्नोति--तत्--तपः--इद्वहन्तः--वहः
न्तएव--चरन्तएवेत्यर्थः--अतएव--शृतासः--दग्धपापाः
समाशत--मोक्षंप्राप्तवन्तः तथाचान्वयव्यतिरेकाभ्यांत
पसोमोक्षसाधनत्वपरत्वान्नेयंश्रुतिस्तप्तचक्रादिधारणे
मानमिति ॥ ६ ॥ तदेतदनाघ्रातपदवाक्यप्रमाणन्या
यवैखरीगन्धस्यवैष्णवविद्वेषिणःकस्यचित्पामरजनवञ्च
नमात्रफलंदुराग्रहदुर्विलसितमेवेतिनैतत्पदवाक्यप्रमा

णन्यायपदवीपथिकैरास्तिकैरादर्तुंयोग्यम् ॥ ७ ॥ यथा
हि--पवित्रंतइत्यादिमन्त्रेपूर्वभागेवाक्यद्वयमुत्तरभागे
वाक्यद्वयंचप्रस्फुटंप्रतिभाति ॥ ८ ॥ एवंस्थिते--पवित्रं
तेविततमितिपदानां--प्रभुर्गात्राणिपर्येषिविश्वतइतिवा
क्यान्तरव्यवहितस्यतत्पदस्यविशेषणतयायोजनंनह्य
नुन्मत्तःकश्चित्पदवाक्यप्रमाणपदवीज्ञःकुर्यात् ॥ ९ ॥
स्वोत्पाद्यबोधानुपकारकपदव्यवधानविधुराण्येवहिपदा
निपरस्परसहकारेणबोधजननसमर्थानिभवन्ति--अन्य
थासान्निध्यस्यैवशाब्दबोधोपकारकताविलयापत्तेः १०
स्वोत्पाद्यबोधानुपकारकशब्दान्तरप्रयोगादिनिबन्धना
कालव्यवधानराहित्यमेवहिपदानांपरस्परसहकारेणशा
ब्दबोधजनकतौपयिकंसान्निध्यंनाम ॥११॥ किञ्च--च
रणंपवित्रंविततंपुराणं--येनपूतस्तरतिदुष्कृतानि--तेनप
वित्रेणशुद्धेनपूताइतिकाठकश्रुतौ-पवित्रणविचर्षणिरि
ति-पवित्रेणपुनीहिमा-इति-यत्तेपवित्रमर्चिषि-अ
ग्नेविततमन्तरा --ब्रह्मतेनपुनीमहे-उभाभ्यांदेवसवितः
पवित्रेणसवेनच--इदंब्रह्मपुनीमहे-इति-येनदेवाःपवित्रे
ण--आत्मानंपुनतेसदा--तेनसहस्रधारेण--पावमान्यः

पुनन्तुमा--प्राजापत्यंपवित्रम्--शतोद्याम २ हिरण्मय
म्--तेनब्रह्मविदोवयम्--पूतंब्रह्मपुनीमहे--इतिचपवमा
नसूक्तश्रुतिषु--एवमन्यत्रापिश्रुतिषुचपवित्रशब्दस्यपू
तादिशब्दप्रतिपाद्यसंस्कारविशेषकरणभूतेकस्मिंश्चिद
र्थविशेषेरूढपदरूपतायास्स्पष्टमवगमनेनतदैककण्ठ्ये
नात्रापितस्यश्रुत्यन्तरघटकपूतादिशब्दसमशीलातम
तनूशब्दघटकतमशब्दार्थसंस्कारविशेषकरणभूतप्रकर
णापेक्षितार्थविशेषपरतैवन्याय्या ॥ १२ ॥ परिशुद्धपरता
माश्रित्यपदान्तरविशेषणतायाःपवित्रशब्दस्यान्यत्रस
म्भवदुक्तिकत्वेपिविशेष्यवाचकपदान्तरासमभिव्याहा
रेणात्रस्वतोविशेष्यपरतायाएवस्वरसतःप्रतीयमानत्वा
दपिचास्मदुक्तरीत्यासुदर्शनपरतैवहिन्याय्या ॥ १३ ॥
अत्रत्यपवित्रशब्दस्यश्रुत्यन्तराद्यानुगुण्येनापेक्षितताप
संस्कारकरणभूतार्थपरत्वमस्वीकृत्यपरिशुद्धपरतामाश्रि
त्यानपेक्षितवाक्यान्तरव्यवहिततच्छब्दविवक्षितमोक्ष
सुखविशेषकतास्वीकरणंव्युत्पत्तिविरुद्धमनुपयुक्तंचेति
तथायोजनमव्युत्पन्नकृत्यमेव ॥ १४ ॥ एवमेतच्छ्रु
तिप्रकरणपर्यालोचनेपिसुदर्शनपरत्वावगमेनस्वयंप्रधा

नत्वैवात्रत्यपवित्रशब्दस्यप्रतीयते ॥ १५ ॥ पवित्रंतइ
त्यादिश्रुतिर्हियजुरारण्यकेप्रथमप्रपाठकैकादशानुवाके
पवित्राङ्गिरस्सम्बन्धिमन्त्रचतुष्टयेद्वितीयमन्त्रतयाप
ठ्यते ॥ १६ ॥ दशमानुवाकान्तेच--अथपवित्राङ्गिरस
इतिवक्ष्यमाणानुवाकगतमन्त्रद्रष्टृमहर्षिनिर्देशः कृतः ॥
॥ १७ ॥ अयंचनिर्देशश्चक्राङ्कितऋषिविषयः--पवित्र
शब्दस्यचक्राङ्कितगात्रऋषित्वावच्छिन्नेरूढिशक्तेः--चक्रा
ङ्कनानिबन्धनशुद्धिविशेषकर्तृत्वकरणत्वावच्छिन्नेयोगशा
केश्चसत्त्वात् ॥ १८ ॥ कर्तरिचर्षिदेवतयोरित्यनुशास
नेन--ऋषिसंज्ञायांकर्तरिकरणेचपुवइत्रप्रत्ययविधानेन
पवित्रशब्दस्य--ऋषिवृत्तिधर्मविशेषावच्छिन्नेरूढिशक्ति
रस्तीति--शुद्धिविशेषकर्तृत्वकरणत्वावच्छिन्नेयोगशक्ति
रस्तीति--शङ्खचक्राङ्कितंगात्रंपवित्रमितिवैश्रुतिरित्यादि
गारुडादिवचनैर्ऋषिसञ्ज्ञानिमित्तभूतोधर्मश्चक्राङ्कित
गात्रत्वमितिचस्पष्टंह्यवगम्यते ॥ १९ ॥ नचदर्शि
तगारुडवचनेनपवित्रशब्दस्यचक्राङ्कितगात्रवाचित्वासि
द्धावपिताद्दशगात्रविशिष्टऋषिवाचकत्वंनसिद्धमितिवा
च्यम्--देवमनुष्यादिशब्दानामिवपवित्रशब्दस्यापिदेह

विशेषवाचितासिद्धौशरीरवाचकानांशब्दानांशरीरिवा
चकत्वन्यायेनतत्तद्देहविशेषावच्छिन्नचेतनविशेषवाचक
तासिद्ध्याकेवलतादृशगात्रमात्रेपवित्रशब्दप्रयोगादर्शने
नदर्शितानुशासनेनपवित्रशब्दस्यऋषिविषयसञ्ज्ञाश
ब्दरूपत्वावगमेनचगारुडादिवचनानांचक्राङ्कितगात्रव
त्त्वप्रवृत्तिनिमित्तमुखेनतादृशगात्रविशिष्टचेतनविशेष
शक्तिप्रतिपादनएवतात्पर्यनिर्धारणात् ॥ २० ॥ इत्थंच
चक्राङ्कनमहिम्नैवपवित्राङ्गिराइतिप्रख्यातिमुपेयुषोमह
र्षेस्स्वानुष्ठितचक्राङ्कनलक्षणपरमधर्मप्रमाणभूतत्वतादृ
शधर्मानुष्ठानकरणमन्त्ररूपत्वान्यादृशनानाप्रकारवस्तु
शुद्धिसंपादनार्थाभिमन्त्रणकरणपावनमन्त्रविशेषरूप
त्वस्वदृष्टमन्त्ररूपत्वस्वोपास्यसुदर्शनदेवतावैभवपरतदु
पासनकरणमन्त्ररूपत्वादिमूलाभिमानविशेषनिबन्ध
नानवरतानुसन्धानगोचरत्वलक्षणप्रत्यासत्तिविशेषए
व—अथपवित्राङ्गिरसइत्यत्रोत्तरानुवाकगतमन्त्रचतुष्टय
स्यषष्ठ्याप्रतिपाद्यतइतितादृशमहर्षिसंबन्धविशेषपर्या
लोचनेतेषाम्मन्त्राणांसुदर्शनपरत्वासिद्ध्यातद्घटकपवि
त्रशब्दस्सुदर्शनविषयतयास्वयंप्रधानतामेवाहस्वरसतो

ऽधिगन्तुमर्हति ॥ २१ ॥ अथपवित्राङ्गिरसइत्यस्य मन्त्रावक्ष्यन्तइतिपूरणसंवलितस्यायमर्थः—अनन्तरमुक्तलक्षणप्रत्यासत्तिविशेषतःपवित्राङ्गिरस्सम्बन्धिनोमन्त्रविशेषावक्ष्यन्तइति ॥ २२ ॥ एवम्—पवित्रधारीचासावङ्गिराश्चेतिवा-पवित्रोपासकश्चासावङ्गिराश्चेतिवाविग्रहेणमध्यमपदलोपिकर्मधारयसमासोवास्यात्पवित्राङ्गिरश्शब्दः ॥ २३ ॥ सर्वथापवित्राङ्गिरस्सञ्ज्ञितमहर्षिसम्बन्धितयाऽवगम्यमानमन्त्रघटकपवित्रशब्दस्स्वयंप्रधानभूतस्सुदर्शनपरतामेवानुभवितुमर्हति ॥ ॥ २४ ॥ पवित्राङ्गिरसइतिमन्त्रद्रष्टृमहर्षिसञ्ज्ञैवानिर्दिश्यतेषष्ठ्यन्ता-अथसवितुश्श्यावाश्वस्यार्वतिकामस्येत्युत्तरप्रकरणादिगतमन्त्रान्तरद्रष्टृमहर्षिसञ्ज्ञानिर्देशानुगुण्यात् ॥ २५ ॥ एतेनात्र—पवित्राङ्गिरसइत्यस्यप्रथमाबहुवचनान्ततामाश्रित्य—पवित्रभूताआङ्गिरोनामाङ्गिताइष्टकामन्त्रावक्ष्यन्तइतिशेषइतिसायनकृतव्याख्यानमयुक्तंवेदितव्यम्—उदाहृतोत्तरप्रकरणस्थमहर्षिनामनिर्देशभङ्गीस्वारस्यभङ्गस्यआङ्गिरश्शब्दस्यमहर्षिनामताप्रसिद्धिस्वारस्यभङ्गस्यचापत्तेः ॥२६॥ एवमेकाद

शानुवाकप्रथममन्त्रे--पवित्रवन्तःपरिवाजमासतइत्या
दिके--पवित्रवन्तइत्यत्र--पवित्रशब्देनकश्चिदर्थविशेषरू
ढ्योपस्थाप्यतद्धारिणामेवासाधारणनिर्देशेननिर्दिश्य
मानतयातदनन्तरमन्त्रे--पवित्रंतइत्यादिकेपिपवित्रश
ब्दस्स्वयंप्रधानभूतएव नतुविशेष्यान्तरविशेषकइति
सुखेनैवावगन्तुंशक्यम् ॥ २७ ॥ एवंविष्णोःप्रभुत्वव
र्णनंव्याप्तिवर्णनंचनास्मत्पक्षइवप्रतिपक्षेप्रयोजनवद्भव
ति ॥ २८ ॥ अतप्ततनूरित्यत्र प्रयोगप्रौढिबलेनकर्मणि
क्तप्रत्ययान्ततयातापक्रियाकर्मवाचितयाचप्रतीयमाने
तप्तशब्देतपधातोस्तपोर्थकत्वंभावेकर्तरिवानिष्ठान्तत्वं
चाश्रित्यक्लिष्टगत्याव्याख्यानमप्ययुक्तम् तथासतिअत
प्तइत्यनेनैवचारितार्थ्येनतनूपदवैयर्थ्यापातात् तपसोऽ
दृष्टविशेषात्मकस्यात्मनिष्ठत्वेन तपोनुकूलकृतिमत्त्वरू
पतपःकर्तृत्वस्याप्यात्मनिष्ठत्वेनच तपोराहित्यस्यतप:
कर्तृत्वाभावस्यवाऽनुष्ठिततपसामपिपुंसांतन्वामबाधित
त्वेन अतप्ततनूरित्यनेनापेक्षितव्यावृत्तेरप्यसिद्ध्यापत्ते
श्च ॥२९॥ अतएवहि इमेतपस्विनइत्यादिनिर्देशेषुस्तु
तिर्बीजंतपस्वित्वम् इद्धंतेनातपस्कायेत्यादिनिर्देशेषुनि

न्दावीजं तपोरहितत्वं चात्मनिष्ठमेव व्यपदिश्यतेनतनूनि
ष्ठम् ॥३०॥ किंच—तपतेस्सकर्मकाद्भावेकर्तरिवाक्तप्रत्य
याश्रयणमप्यनुशासनविरुद्धम्—लः कर्मणिच भावेचाक
र्मकेभ्यः—३—४—६९— इत्युपक्रम्य—तयोरेव कृत्यक्तख
लर्थाः—३—४—७०—इत्यनुशासनात्॥३१॥अत्रहि—त
योरेवेत्यस्य—भावकर्मणोरेवेत्यर्थकत्वात्-एवकारस्यकर्तृ
प्रतिषेधार्थत्वाच्चकर्तरिक्तप्रत्ययनिषेधस्सिध्यति ॥ ३२॥
अयं चनिषेधस्सकर्मकधातुविषयएवविश्राम्यति—आदि
कर्मणिक्तः कर्तरिच-३-४-७१- इत्युपक्रम्य—गत्यर्थाकर्म
कश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च —३—४—
७२-इत्यनुशासनेनाकर्मकधातुभ्यः कर्तर्यपिक्तप्रत्ययवि
धानदर्शनात् ॥३३॥ तयोरेवेत्युदाहृतसूत्रविहितभावा
र्थकक्तप्रत्ययोप्यकर्मकधातुविषयएव—भावेचाकर्मके
भ्यइत्यस्यतत्रानुवृत्त्यातत्सूत्रविहितभावार्थकप्रत्यया
नामप्यकर्मकधातुविषयत्वानियमनात् ॥ ३४ ॥ तथा
च--सकर्मकधातुभ्यः परतः कर्तरिभावेवाक्तप्रत्ययस्यानु
शासनविरुद्धतयातपतेस्सकर्मकात्कर्तरिभावेचक्तप्रत्य
याश्रयणमनुशासनविरुद्धम्—कथंचित्केनचित्प्रकारेण

तदुपपादनसम्भवेपिक्लिष्टकल्पना—तनूपदवैय्यर्थ्यम्—
तन्वांतपोराहित्यादिप्रतिपादनस्याव्यावर्तकताचेतिस
र्वथैवासङ्गतमेवतदितिसिद्धम् ॥ ३५ ॥ एवम्—अतप्त
तनूरामस्तन्नाश्नुते--इद्वहन्तश्शृतासस्तत्समाशतेतित
च्छब्दद्वयस्यैकार्थकतायाएवस्वरसतःप्रतीयमानतया--
अन्वयव्यतिरेकाभ्यांमोक्षसाधनताप्रतिपादनानुकूलत
याचतांविहायप्रथमतच्छब्दस्यमोक्षार्थकत्ववर्णनंद्विती
यतच्छब्दस्यतपोर्थकत्ववर्णनंचवाक्यभङ्गीस्वरसविरुद्ध
म् ॥ ३६ ॥ एवंब्रह्मपरतयाश्रुतिप्रसिद्धस्यतच्छब्दस्य
मोक्षसुखपरत्ववर्णनमपिनस्वारसिकम् ॥ ३७ ॥ वह
न्तइत्यस्य--स्वरसतोधारयन्तइत्यर्थकस्याचरन्तइत्यर्थ
कत्ववर्णनमप्यव्युत्पन्नकृत्यम्—अङ्कनतः पवित्रशब्दार्थ
भगवद्दिव्यायुधधारिणामेवप्रकरणानुगुण्येनवहन्तइत्य
नेनस्वरसतःप्रतीयमानतयापदशक्तिलभ्यतादृशार्थप्र
हाणेतदलभ्याचारार्थकत्वस्वीकरणेचकारणान्तराविर
हात् ॥ ३८ ॥ पवित्रवन्तःपरिवाजमासतइत्यादिपूर्व
मन्त्रेपवित्रवन्तइतिशब्देनेवास्मिन्नपिमन्त्रे--इद्वहन्तइ
तिशब्देनपवित्रवाहिनएवप्रतिपाद्यन्तइतिहिपूर्वापरप्र

करणविदांव्युत्पन्नानांविशदम् ॥ ३९ ॥ यदप्युक्तम्-यत्पवित्रंविततम्-तेनाग्निदग्धेनातप्ततनूरितित्वदीय योजनायाम्--यत्तेनाग्निदग्धेनेत्यध्याहारप्रसङ्गेनतदपेक्ष याव्यवहितान्वयएवज्यायानिति ॥ ४० ॥ तन्न-पवित्रन्तइत्यादिश्रुतिव्याख्यानपरायाम्-पवित्रमित्यग्निः-अग्निर्वैसहस्रारइत्यादिश्रुतौपवित्रशब्दस्याग्निमयसुदर्शनपरतयैवव्याख्यानेनपवित्रशब्दार्थभूताग्निमयसुदर्शनस्यैवतच्छब्देनपरामर्शसम्भवेनअग्निदग्धेनेतितापकरणतानिर्वाहकपदाध्याहारानावश्यकत्वात्-अतप्ततनूरित्यत्रश्रूयमाणतापान्वयान्यथानुपपत्त्याप्राप्तस्याग्निदग्धेनेत्यध्याहारस्यकरणेप्यदोषात्-तत्पदाध्याहारमात्रेणचारितार्थ्यसम्भवेनयत्पदाध्याहारानावश्यकत्वात्-तृतीयान्ततत्पदाध्याहारस्यापि-अतप्ततनूरित्यत्रप्राप्तकरणाकाङ्क्षाशमनाय-येनपूतस्तरतिदुष्कृतानि-तेनपवित्रेणशुद्धेनपूताइत्यादिप्रागुदाहृतबहुश्रुत्यन्तरैककण्ठ्याय चप्राप्तत्वेनाप्राप्ताध्याहारवद्दोषत्वेनपरिगणनानर्हत्वाच्चकथंचिदपित्वदीयाप्राप्तासम्बद्धव्यवहितयोजनासाम्यकथाप्रसङ्गानवकाशात् ॥४१॥अतएवहि-पश्यमृगो

धावतीत्यादौसन्दर्भवल्लभ्यप्राप्तस्यपश्यातिक्रियान्वययोग्य द्वितीयान्ततच्छब्दाध्याहारस्य – अक्ताश्शर्कराउपदधा तितेजोवैघृतमित्यत्राक्तपदार्थाञ्जनक्रियाकरणाकाङ्क्षाश मनाय–तेजोवैघृतमितिवाक्यखण्डसन्दर्भवल्लभ्यप्राप्तस्य घृतवाचितृतीयान्ततत्पदाध्याहारस्यच-पूर्वतन्त्रेप्रथमा ध्यायचतुर्थपादे–सन्दिग्धेषुवाक्यशेषात् – १ – ४० २१ – इत्यधिकरणन्यायसिद्धस्यदोषत्वंनकश्चित्पदवा क्यपदवीव्युत्पन्नःप्रत्येति ॥ ४२ ॥ यदिच--पश्यमृगो धावतीत्यादौ--मृगोधावतीत्यादिवाक्यार्थस्यैवपश्यति क्रियायांकर्मतयाऽन्वयस्वीकारेण ३२ प्रकरणसमर्थ्या न्मृगादिपदमेवविभक्तिविपरिणामेनद्वितीयान्तंसत्पश्य तिक्रियान्वययोग्यंसन्निधत्तइतिस्वीकारेणवानतत्रद्वि तीयान्ततत्पदाध्याहारावश्यकता--अक्ताइत्यादिवाक्ये पि--तेजोवैघृतमितिवाक्यार्थस्यैवाक्तपदार्थाञ्जनक्रिया यांकरणतयान्वयस्वीकारेण-प्रकरणसामर्थ्याद्घृतपदमे वविभक्तिविपरिणामेनतृतीयान्तंसदक्ताइत्यत्राञ्जनक्रि याकरणतयान्वययोग्यंसन्निधत्तइतिस्वीकारेणवानघृ तवाचितृतीयान्ततत्पदाध्याहारावश्यकतेतिमन्यते ॥

॥४३॥तदात्वतत्सम्बन्धित्वावितततत्त्वविशेषणविशिष्टपवि
त्रशब्दार्थस्यवाक्यार्थभूतस्य--अततनत्नूरित्यत्रतापक्रि
याकरणतयान्वयस्वीकारेण—प्रकरणसामर्थ्यात्पवित्रपद
मेवविभक्तिविपरिणामेनतृतीयान्तंसत्-अततनत्नूरित्य
त्रतापक्रियाकरणतयान्वययोग्यंसन्निधत्तइतिस्वीकारेण
थानिर्वाहसम्भवेननात्रापितृतीयान्ततच्छब्दाध्याहारा
वश्यकतेतितुल्यमितिपश्यतुभवान् ॥ ४४ ॥ यदप्यु
क्तम्—तवापिमुख्यपवित्रशब्दवाच्यस्यविष्णुचक्रस्यवह
नानुपपत्त्यालोहादिमयसुदर्शनप्रतिकृतिसमाक्रिणपवित्र
शब्दस्यात्यन्तजघन्यलक्षणासमाश्रयणीयेतितदपेक्ष
यावहन्तइत्यस्याचरणलक्षणैवयुक्तेति ॥ ४५ ॥
तदपिनयुक्तम्—विलक्षणसंस्थानविशेषविशिष्टविग्रहाव
च्छिन्नसुदर्शनाख्यदेवताविशेषेरूढिशक्तेः—परिशुद्धित्रा
णकर्तृत्वावच्छिन्नेयोगशक्तेश्चपवित्रशब्दस्यप्रागुक्ततया
सुदर्शनप्रतिकृतितत्समाक्रिणयोरपिताहशसंस्थानविशि
ष्टविग्रहरूपतायादेवताविशेषाधिष्ठितत्तायाश्चाबाधितत्वे
नताहशप्रतिकृत्यवच्छिन्नस्यवातत्समाक्रिणावच्छिन्नस्य
वादेवताविशेषस्यपवित्रशब्दवाच्यत्वेबाधकाभावेनतद्व

हनस्याबाधितत्वेन चास्माकंलक्षणाप्रसङ्गाभावात् ॥४६
किंबहुना—यद्रूपावच्छिन्नेदेवताविशेषेपवित्रशब्दोयोग
रूढस्स्वीकृतः—तद्रूपावच्छिन्नस्यतादृशदेवताविशेषस्य
प्रतिकृतितत्समङ्किणयोस्सन्निधाननैयत्यस्यशास्त्रसि
द्धतयातद्धारिणांतत्सन्निहितदेवताविशेषधारितायाअ
प्यवर्जनीयतयातावाश्रित्यसाक्षात्सुदर्शनसम्बन्धिषु
सर्वेष्वपिव्यवहारेषुकृतेषुनकिंचिदनुपपन्नंभविष्यत्यस्मा
कमितिसम्यगवधारयतुभवान् ॥ ४७ ॥ मन्यतां
धाकामंभवान्—तत्तद्देवतावाचिनांशब्दानांतत्तत्प्रतिकृ
तिषुलक्षणैवेति ॥४८॥ तथापिदेवतावाचिशब्दानांतत्प्र
तिकृतिषुप्रसिद्धप्रयोगबाहुल्यनिबन्धनासेयंलक्षणानि
रूढलक्षणैवभवितुमर्हति—सैवचलक्षणापवित्रशब्दस्य
सुदर्शनप्रतिकृतावपि—नपुनरन्यत्राक्लृप्ताकाचिदपूर्वा
जघन्यालक्षणात्रकल्पनीया—अतोत्रलक्षणाभ्युपगमे
पिसेयंलक्षणा—वहन्तइत्यस्याचरन्तइत्यर्थे भवत्कल्पि
तजघन्यलक्षणागोष्ठींनकथंचिदप्यवगाहतइतिसम्यगा
लोचयतुभवान् ॥४९॥ तथाच—पवित्रशब्दस्यदेवताप
रत्वेप्रतिकृतिपरत्वेङ्किणपरत्वेवानकाश्चित्क्लिष्टकल्पनादो

षोऽस्मत्पक्षेवक्तुंशक्यः ॥५०॥ नचभवत्पक्षेपि–प्रभुर्गा
त्राणिपर्येषिविश्वतइतिपश्चाच्छ्रुतवाक्यंप्रथमंयोजयि
त्वा–पवित्रंतेविततमितिप्रथमश्रुतवाक्यंपश्चाद्योजयित्वा–
तदनन्तरम्–अतप्ततनूरित्यादियोजनात्–समाशतेति
लुङोलिङर्थवर्णनाच्चास्वारस्यमपरिहार्यमेवेतिवाच्यम्
व्याप्तिनिमित्तजिज्ञासाशमनायद्वितीयवाक्यस्य–व्या
प्तिस्वरूपतत्फलजिज्ञासाशमनायतृतीयचतुर्थवाक्ययो
श्चोदयेन–आकाङ्क्षोदयक्रमेणवाक्यप्रवृत्तेर्यथासंनिवेश
मेवयोजनायाःस्वारसिकत्वानपायात्–तत्रपर्यवसन्नार्था
नुगुणायाएवयोजनायास्तात्पर्यसुखबोधायास्माभिस्त
थाकरणेपिस्वारस्यभङ्गाभावात्–समाशतेतिलङःपूर्वं
वृत्तानुवादस्वरूपत्वेपिफलसिद्धिप्रतिपादनमुखेनविवक्षि
तार्थविधानएवतात्पर्यस्यवक्तव्यतयावृत्तानुवादपरत्वापे
क्षयासम्प्रत्यनुष्ठानफलसिद्धिपरतायाएवयुक्तत्वात्–छंद
सिलुङ्लङ्लिटइत्यनुशासनेनलङोलिङर्थस्यापिसिद्ध
त्वेन दोषाभावाच्च ॥५१॥ यदपियोजनान्तरमाहार्वाची
नभास्करः–यद्वा–तइतिनषष्ठ्येकवचनम्–किन्तुचतु
र्थ्येकवचनमेव–पवित्रशब्दोपिनतच्छब्दनिर्दिष्टपरमपद

विशेषणम्—अपितुकृच्छ्रचान्द्रायणादितपःपरएव—तथा
च—हेब्रह्मणस्पते—हेविष्णो—तेत्वदर्थम्—त्वदाराधनार्थ
म्—यत्पवित्रम्—परिशुद्धिकरंकृच्छ्रचांद्रायणादितपः—
तेनातप्ततनूः—असन्तप्तगात्रः—अतएव—आमः—असं
शोषितावयवः—तत्परमंपदंनाश्नुते—शृतासः—कृच्छ्रचा
न्द्रायणादिभिस्सन्तप्तगात्राः—अतएव—इत्—इदम्—स
न्तापजनितशरीरसंशोषणम्—वहन्तः—यद्वा—इच्छब्दो
नावयवसंशोषणवचनः—किन्तु—परमपदवचनएव—त
थाच—इत् इदम्—परमपदम्—वहन्तः—तत्साधनानुष्ठा
नेनसम्पादयन्तः—तत्—समाशत-प्राप्तवन्तः—भगवदारा
धनार्थस्यकर्मणोमोक्षसाधनत्वप्रतिपादनात्—एवंचाव
यववाचिनस्तनूशब्दस्यबाहुमूलाद्यवयवपरतयासङ्को
चोनकल्पितोभवति—तप्तपदस्यसन्तापवाचित्वेपितत्प
दसामर्थ्यात्सन्तापप्रतिकरणकारकतयाहृदयमागतस्य
कृच्छ्रचान्द्रायणादितपसःपरित्यागश्चनकृतोभवति—त
स्मादस्यमन्त्रस्यकृच्छ्रचान्द्रायणादिविधिपरत्वान्नसुदर्श
नातापविधिपरत्वमिति ॥ ५२ ॥ तदप्यसत्—पवित्रश
ब्दस्येहस्वरसतःप्रतीयमानायाबहुश्रुत्यन्तरानुगुणाया

स्स्वयंप्रधानतायाःपरित्यागेन-पवित्रादिपदान्वययोग्य
स्यकृच्छ्रचान्द्रायणादितपद्दतिविशेष्यपदस्याध्याहारे
णचश्रुतहानाश्रुतकल्पनयोःप्रसङ्गात्-अतप्ततनूरित्यत्र
तप्तपदेनाग्निकरणकतापस्यैवस्वरसतःप्रतीयमानतया
उपवासादिनिबन्धनकायक्लेशरूपतापस्यस्वरसतोऽप्रती
यमानतयाचस्वरसप्रतीतार्थपरित्यागदोषस्यापरिहार्य
त्वात्-तइत्यस्यपवित्रमितिपदान्वयितयैवस्वरसतःप्र
तीयमानस्यषष्ठ्यन्ततायाएवस्वारसिकत्वात्-कारक
विभक्तिरूपचतुर्थ्यन्वययोग्यकृतादिपदाध्याहारसापे
क्षायाःतइत्यस्यचतुर्थ्यन्ततायाःकल्पनस्यातिक्लिष्टत्वा
त्कथंचिदध्याहारकरणेपित्वदर्थमिदंकार्यंकृतमित्यादौ
परप्रयोजनार्थंकार्यकरणप्रत्ययवत्-भगवत्प्रयोजनार्थं
तपःकरणप्रत्ययस्यैवविरुद्धस्येहजननात्-तइत्यस्यत्व
दाराधनार्थमित्यर्थकल्पनस्य लक्षणामन्तरेणासिद्ध्या
लक्षणाप्रसङ्गस्यदुर्वारत्वात्-अध्याहृतकृतपदान्वययो
ग्यतृतीयान्तास्मच्छब्दाध्याहारस्यापिकर्तव्यत्वप्रसङ्गा
च्च ॥५३॥ प्रभुर्गात्राणिपर्येषिविश्वतइत्यंशस्यप्रयोजन
वत्तानास्यामपियोजनायांदर्शिता ॥ ५४ ॥ असन्तप्त

गात्रत्वस्यासंशोषितावयवत्वस्य चैकत्वेन—अतप्ततनू रामइतिपदद्वयमुक्तार्थैकत्वेऽव्यर्थमेव भवति-एकेनैवेष्टसिद्धेः ॥ ५५ ॥ इत्-इदंसन्तापजनितशरीरसंशोषणमिति व्याख्यानमप्ययुक्तम्—शृतासइत्यस्मात्—इद्वहन्तइत्यस्यार्थभेदादर्शनेनहेतुहेतुमद्भावासङ्गतेः ॥ ५६ ॥ नच—अतप्ततनूरामइत्यनयोः पदयोः—शृतासइद्वहन्तइत्यनयोः पदयोश्चकथमर्थभेदाभावः—तापशोषणयोरैकैकस्यैवैकैकलभ्यत्वात्तयोश्चभिन्नत्वादितिवाच्यम् तप्तशृतशब्दयोःक्तप्रत्ययस्यकर्मार्थकतयाकर्मत्वस्य चाक्रियाजन्यफलशालित्वरूपतयाभवदभिमततपश्राधात्वर्थसन्तापापरपर्यायतापपाकरूपक्रियाद्वयजन्यफलस्यशोषणरूपतयाचोक्तपदद्वययोरैकार्थ्यपर्यवसानस्यदुर्वारत्वात् ॥ ५७ ॥ इत्-इदम्—परमपदंवहन्तः—तत्साधनानुष्ठानेनसम्पादयन्तइति व्याख्यानमप्यसाधु-वहन्तइत्यस्यपवित्रवन्तइत्यादिपूर्वमन्त्रानुरोधेनपवित्रंधारयन्तइत्यर्थस्वारसिकस्यतंविहायलक्षणयासम्पादयन्तइत्यर्थकरणस्यायुक्तत्वात्—इच्छन्दतच्छन्दयोर्द्वयोः परमपदवाचिनोरानर्थक्याच्च ॥ ५८ ॥ नच—अतप्ततनूरि

स्यत्रतनूशब्दस्यभवत्पक्षेबाहुमूललाक्षणिकतायाआव
श्यकतयाभवतामप्यस्वरसोदुर्वारइतिवाच्यम्बाहुमूला
दिस्थलकृतचक्रादिभगवदव्यायुधतापस्यकृत्स्नंदेहंत
दन्तर्वर्तिनंदेहिनंचप्रतिसंस्काररूपतायाश्शास्त्रसिद्धत्वे
नतादृशतापसंस्कारजन्यशुद्धिविशेषलक्षणफलशालि
त्वरूपतापक्रियाकर्मत्वात्मकतप्तत्वस्यकृत्स्नायामपित
न्वांसम्भवेनतद्विवक्षायांतनूशब्दार्थसंकोचानावश्यक
त्वात्–बाहुमूलाद्यनेकस्थलेषुतापसंस्कारकरणस्यश्रु
त्यन्तरोपबृंहणसिद्धतयातादृशानेकस्थलसंग्रहायतनू
शब्दप्रयोगस्यैवस्वरसतआवश्यकत्वाच्च ॥ ५९ ॥ तनुत
नुशब्दयोस्संस्कृतित्वादितिप्रागुदाहृतपूर्वाचार्यश्लोकेत
न्मूलभूतप्रागुदाहृतप्रमाणगणेषुचबाहुमूलादिकृतच
क्रादितापसंस्कारस्यशरीरशरीरिसंस्काररूपताहिव्यक्ता
॥ ६० ॥ बाहुमूलादिप्रदेशस्यापिशरीरत्वाबाधात्तनू
शब्दस्यनलक्षणाप्रसक्तिः ॥ ६१ ॥ वृक्षगोपुराद्येकदे
शारोहणमात्रेण–वानराधिरूढोवृक्षः–वानराधिरूढंगोपु
रम्–राजाध्यासितंसिंहासनमित्यादावेकदेशसम्बन्ध
मात्रसद्भावेपिवृक्षादिसमुदायशब्दप्रयोगोहिमुख्यस्वा

रसिकश्चदृश्यतइतिवाहुमूलादितन्वेकदेशमात्रस्यतप्त
त्वेपितन्वांतप्तत्वव्यपदेशोनकाप्यनुपपत्तिः ॥ ६२ ॥
तथाच–पवित्रवन्तइत्यादिपूर्वमन्त्रानुरोधेनापिपवित्रश
ब्दस्यस्वयंप्रधानतायाःकस्मिंश्चिदर्थविशेषरूढतायाश्च
स्पष्टमवगमनात्–प्रागुदाहृतवेदनिघण्टुस्मृतिपुराणाद्यु
पबृंहणैः–पवित्रमित्यग्निरित्यादिसामवेदमैत्रायणीयशा
खागतश्रुत्याचसुदर्शनरूढतावगमाच्चस्वेच्छयाकृच्छ्रचा
न्द्रायणादिशब्दमध्याहृत्यतद्विशेषणतयापवित्रशब्दयो
जनस्यात्यन्तासङ्गतत्वात्–प्रागुदाहृतप्रमाणगणानुरोधे
नसुदर्शनपरतयातद्योजनस्यैवन्याय्यत्वाच्चसुदर्शनता
पसंस्कारविधिपरत्वमेवास्याश्श्रुतेस्स्वरसतस्सिद्धंभव
ति–नपुनःकृच्छ्रचान्द्रायणादितपःपरत्वमितिसुधियो
विदांकुर्वन्तु ॥ ६३ ॥ यदप्याहार्वाचीनभास्करोयो
जनान्तरम्–अथवा–उद्गातारोद्रोणकलशंप्रतिष्ठाप्यत
स्मिन्नुदीचीनदशंपवित्रंवितन्वन्ति–पवित्रंतेविततंब्रह्म
णस्पतइतिवितन्यमानमभिमन्त्रयतेयजमानइत्याप
स्तम्बसूत्रेणोद्गातृप्रभृतिभिर्द्रोणकलशोपरिवितन्यमान
दशापवित्रानुमन्त्रणेविनियोगाद्युक्तमस्याश्श्रुतेस्तत्पर

त्वम्—तथाहि—ब्रह्मणःबृंहकस्य—द्रोणादिवर्धकस्यौष
धिवनस्पतिलक्षणस्यान्नस्यपते—हेसोम—सोमोवाओ
षधीनांराजेतिश्रुतेः—यद्वा—ब्रह्मणः—ब्राह्मणस्यपते—
तस्मात्सोमराजानोब्राह्मणाइतिश्रुतेः—ते—त्वदर्थम्—
त्वत्पावनार्थम्—पवित्रम्—विततम्—विस्तृतम्—प्रभु
र्गात्राणिपर्येषिविश्वतः—अनेनपवित्रेणत्वत्स्वरूपतिरो
धायकऋजीषाद्यपगमेन—प्रभुः—समर्थोभूत्वा—रोगाद्य
पगमेनरुग्णःस्वरूपमिव—गात्राणि—स्वरूपाणि-विश्वतः
पर्येषि—विस्तारयसीत्यर्थः—ऋजीषाद्यपगमनार्थस्यान्व
यव्यतिरेकाभ्यांफलंदर्शयति—अतप्ततनूर्नतदामोअश्नु
ते—आमःदशापवित्रेणासंस्कृतः—अतएव—अतप्ततनूः—
असमर्थतनूः-तपऐश्वर्यइतिधातोस्तप्तशब्दस्यनिष्पत्तेः
तत्—स्वकार्यंहोमम्—नाश्नुते—नचात्रतनूपदवैयर्थ्यम्—
तनूपदस्याशुचित्वाभिप्रायगर्भत्वात्तथाच-यतोऽयम
संस्कृतः-अतएवाशुचिस्सन्स्वकार्यंप्रत्यसमर्थइत्यर्थः
फलति—नन्वसंस्कृतस्यापिस्वकार्येसामर्थ्यमस्तु—तत्रा
ह—शृतासइद्वहन्तस्तत्समाशतेति—शृतासइत्-संस्कृता
एवयागीयपदार्थाः—तंशृतंभूतमजुहोदित्यादौसंस्कृतमा

त्रेप्यग्निपक्कइवशृतशब्दप्रयोगदर्शनात्--अतएव--संस्कृ
तत्वादेवबहन्तः--तत्तत्कार्यनिर्वहणविचक्षणास्सन्तः--
तत्--स्वकार्यम्--समाशत--प्राभवन्तइति ॥ ६४ ॥ त
दप्यसत्--स्वरसतस्सम्भवन्तमर्थमपहायसर्वपदानाम
त्यन्तास्वारस्यमाश्रित्यातिक्लिष्टगत्याप्रसह्याकृष्यार्था
न्तरकल्पनप्रवृत्तौसर्वस्यापिप्रमाणस्यसर्वानुगुणार्थक
ल्पनस्य--परस्परविरुद्धनानार्थकल्पनस्यचसम्भवेन--क
स्यापिप्रमाणस्यक्वचिदप्यर्थव्यवस्थितिविरहप्रसङ्गस्य
दुर्वारतयास्वारसिकाबाधितार्थएवप्रमाणानांतात्पर्य
स्वीकारावश्यकतयाताद्दशार्थैकार्समाश्रितसम्भवतिसर्वप
दास्वारस्यगर्भदर्शितयोजनायामस्यमन्त्रस्यकेनापिप्रा
माणिकेनतात्पर्यस्वीकारायोगात् ॥६५॥तथाहि--पूर्वो
दाहृतश्रुतिस्मृतिपुराणवेदनिघण्ट्वादिषुपवित्रशब्दस्य
सुदर्शनइवदशापवित्रेशक्तिप्रतिपादनादर्शनेनऋजीषा
दिशोधकत्वेनहेतुनालाक्षणिकएवतत्रायंशब्दइतिस्वी
कार्यम्॥६६॥अतस्सुदर्शनरूपशक्यार्थंविहायलाक्षणि
कार्थग्रहणमस्वरसम् ॥ ६७ ॥ अस्तुवातत्रापितत्पदश
क्तिः॥ ६८ ॥ तथापि--अतप्ततनूरित्यत्रस्वरसप्रतिपन्न

त्तापकरणतयान्वययोग्याविषयतांश्रुत्यन्तरानुरोधेनप्र
तीयमानांविहायतथान्वयायोग्यदशापवित्रविषयत्वक
ल्पनमिहपवित्रशब्दस्यात्यन्तास्वारसिकमेव ॥ ६९ ॥
एवम्--अथपवित्राङ्गिरसइतिमहर्षिनामनिर्देशस्य--प
वित्रवन्तइतिपूर्वमन्त्रगतनिर्देशस्य चचक्राङ्कितविषयत्व
एव--तापाधीनचिह्नरूपतयासदाधृतस्यसुदर्शनस्यस्व
रूपनिरूपकतयानिर्देशौपयिकत्वसम्भवेनस्वारसिकतया
दृशापवित्रस्यकार्यकालेकदाचिद्धृतमुक्तस्यपुरुषस्वरूप
निरूपकतयानिर्देशौपयिकत्वासम्भवेनतद्धारिविषयत्वे
कथंचिदपिस्वारसिकत्वासम्भवेनचतादृशनिर्देशयोस्सुद
र्शनधारिविषयतायाएवावश्यकतयातत्प्रकरणस्थैतन्म
न्त्रगतपवित्रशब्दस्यसुदर्शनविषयत्वमेवस्वारसिकं--नदशा
पवित्रविषयत्वमितिप्रकरणपद्वाक्यस्वरसविदांविशदम्
॥ ७० ॥ तइत्यस्यचतुर्थ्यन्तत्वेत्वत्पवनार्थमित्य
र्थेलक्षणाकल्पनंचास्वरसम् ॥ ७१ ॥ ब्रह्मशब्द
स्यचतुर्मुखेरूढस्ययोगतोवर्धकपरत्वमाश्रित्यौषधिवन
स्पतिलक्षणान्नविषयत्ववर्णनम्--ब्रह्मणस्पतिशब्दस्याव
रुणावतिस्वारसिकस्यसोमपरत्ववर्णनंचात्यन्तायुक्तम्--

ब्रह्मपतिशब्दयोर्द्वयोरपिजघन्यवृत्त्यैववर्धकश्रेष्ठपरतायाः
वक्तव्यत्वात्---ब्रह्मशब्दस्ययोगतः कथञ्चिद्वर्धकपरत्व
सम्भवेपिविनालक्षणामोषधिवनस्पतिलक्षणाक्रान्तत्वाव
च्छिन्नपरत्वालाभात्सोमोवाओषधीनांराजेतिश्रुताव
पिराजपदस्यश्रेष्ठलाक्षणिकतयातत्समशीलतयाऽभ्युप
गतायत्पतिशब्दस्यलाक्षणिकतायादुर्वारत्वात्-बहुवच
नान्तपदसमभिव्याहारस्थलेपतिशब्दस्यश्रेष्ठवाचिलक्ष
णादर्शनेप्येकवचनान्तपदसमभिव्याहारस्थलेतत्कल्प
नस्याप्यनुचितत्वात्-योगाद्रूढेर्बलिष्ठतायारथकाराधि
करणन्यायसिद्धतयाप्रसिद्धचतुर्मुखपतिभूतविष्णुरूपा
र्थग्रहणस्य-अप्रसिद्धास्वारसिकसोमरूपार्थपरिग्रहस्य
चासम्भवात् ॥ ७२ ॥ ब्रह्मशब्दस्यब्राह्मणपरत्वपक्षेपिप
तिशब्दास्वारस्यंदुर्वारम्-पतिशब्दस्यनियामकेस्वामि
निवारूढस्यब्राह्मणकर्तृकक्रियाङ्गविषयत्वंलक्षणयास्वी
कृत्यैवसोमविषयतायावक्तव्यत्वात्-तस्मात्सोमराजा
नोब्राह्मणाइत्यत्रापिराजशब्दस्योक्तार्थपरत्वात्-मुख्य
स्यब्राह्मणराजत्वस्यसोमेबाधात् ॥ ७३ ॥ सोमोवा
ओषधीनांराजेत्यत्र-तस्मात्सोमराजानोब्राह्मणाइत्य

त्रचवाक्यसन्दर्भबलेनप्रस्फुटमेवावगम्यमानतात्पर्यस्य राजपदस्यतत्प्रकरणोपयोग्यर्थविशेषलाक्षणिकतायायुक्तत्वेपि-पवित्रंतेविततंब्रह्मणइत्यत्रब्रह्मणस्पतिशब्दघटकब्रह्मपतिशब्दयोः कथञ्चिदप्यनवगम्यमानोक्तार्थतात्पर्ययोःप्रत्युतप्रस्फुटमवगम्यमानान्यार्थतात्पर्ययोरुक्तार्थलाक्षणिकत्वकल्पनंसर्वथैवासङ्गतमेव ॥ ७४ ॥ एतेन--सोमस्य-ओषधिराजत्वंब्राह्मणराजत्वंवागौणमपि राजशब्देनलक्षणयाक्वचिदन्यत्रानिर्दिष्टमेवेहापिनिर्दिश्यमानंनदोषायभवितुमर्हतीतिशङ्कापिनिरस्ता ॥७५॥ एवमचेतनस्यसोमस्यसम्बोध्यत्वमनुपपन्नम्—तत्परिहारायब्रह्मणस्पतिशब्दस्यतदधिष्ठातृदेवतापरत्वेचत्वत्पावनार्थंपवित्रंविततमित्यनुपपन्नम्--अचेतनस्यसोमस्यैवदशापवित्रेणपावनस्यविवक्षितत्वादित्यपिबोध्यम् ॥ ॥ ७६ ॥ एवंप्रभुशब्दस्यनियन्तारिरूढस्येहसमर्थपरत्ववर्णनमप्यस्वरसम्--लक्षणाधीनस्यसमर्थपरत्वस्यापितुमुन्नन्तसमम्यन्ताद्युपपदसमभिव्याहारस्थलएवक्वचिद्दर्शनान्निरुपपदस्थलेक्वाप्यदर्शनाच्च॥७७॥गात्रशब्दस्यापिमनुष्यादिशरीरएवप्रसिद्धप्रयोगस्यसोमस्व

रूपपरत्ववर्णनमप्यस्वरसम् ॥ ७८ ॥ एवंप्रभुशब्दान्वययो
ग्यस्य-अनेनपवित्रेणतत्स्वरूपतिरोधायककर्जीषाद्यप
गमेनेतिवहुपदाध्याहारस्यकल्पनम्-पर्येषीत्यस्याण्यन्त
स्यव्याप्नोषीत्यर्थेस्वारसिकस्यविस्तारयसीत्यर्थकरणंचा
त्यन्तास्वरसम् ॥ ७९ ॥ तप्तशब्दस्यवह्निकरणकतपनक्रिया
कर्मण्येवस्वारसिकतयातनूशब्दस्यमनुष्यादिशरीरएव
स्वारसिकतयाचातप्ततनूरित्यस्यतापसंस्कारासंस्कृतश
रीरकपुरुषबोधनएवस्वारसिकस्यासमर्थाशुचिस्वरूपक
सोमविषयत्वकल्पनास्वारस्यम्---सोमविषयत्वेसोमस
म्बोधनपूर्वकंप्रवृत्तेऽस्मिन्सन्दर्भेपर्येषीत्यत्रेवनाश्नुतइ
त्यत्रापिमध्यमपुरुषस्यैवस्वारसिकतयाप्रथमपुरुषास्वा
रस्यंच ॥ ८० ॥ तपऐश्वर्येवेतिदैवादिकस्यैश्वर्यार्थकस्य
धातोर्वैकल्पिकस्यसत्त्वेपि-तपसन्तापइतिभौवादिकस्यै
वधातोस्तापार्थकस्यप्रयोगप्राचुर्यात्प्रथमोपस्थितेःप्रकर
णानुगुण्याच्छुत्यन्तरानुगुण्याच्चात्रत्यतप्तपदस्यवह्निकर
णकसन्तपनक्रियाकर्मार्थकत्वमेवस्वरसम् ॥ ८१ ॥ अ
समर्थार्थकत्वन्तुगोपदस्यस्वर्गाद्यर्थकस्यापिपश्वन्यार्थक
त्ववत्- अधिकाराद्यर्थान्तरसाधारणस्याप्ययशब्दस्या

नन्तर्यादन्यार्थकत्ववच्चास्वरसमेव ॥ ८२ ॥ शृतासइत्य
स्यापिप्रागुक्तरीत्यापाकार्थकत्वमेवस्वरसम्--नतुकेवल
संस्कृतार्थकत्वम् ॥ ८३ ॥ निरनुपसृष्टस्यवहन्तइत्य
स्यनिर्वहणार्थकत्वंतच्छब्दस्यप्रागनुपस्थितहोमार्थक
त्वंचासङ्गतम् ॥८४ ॥ किंच-वहन्तइत्यस्यपवित्रवन्त
इत्यादिपूर्वमन्त्रानुरोधेनपवित्रधारिविषयत्वंस्फुटंप्रतीय
मानंप्रहाय- तत्तत्कार्यनिर्वहणविचक्षणास्सन्तइत्यर्थ
करणमत्यन्तास्वारसिकंकेवलदुराग्रहकृतमितिसुधिय
स्सुखेनैववक्तुंशक्नुवन्ति ॥ ८५ ॥ किंबहुना १ पवित्रव
न्तइत्यादिपवित्रधारिविषयानिश्चितपूर्वमन्त्रप्रकरणानु
गुण्येनवहन्तइतिपदस्वारस्येनचपवित्रधारिविषयत्वम
स्यापिमन्त्रस्यस्फुटमवगम्यते २तत्रापि-पवित्रंचकिंतद्धा
रणंचकिंरूपमितिविचिकित्सायाम्-अतप्ततनूः-आम
शृतासः-इतिपदस्वारस्यपर्यालोचनेदशापवित्रादेस्ता
पकरणत्वाभावेनैतन्मन्त्रप्रतिपन्नंपवित्रंसुदर्शनमेवेति
तद्धारणमपितत्करणकतापमूलकाङ्कनरूपमितिचप्रमा
णान्तरानिरपेक्षंपदसन्दर्भप्रकरणपर्यालोचनमात्रेणप्र
स्फुटंप्रतीयते ३ प्रागुदाहृतवेदनिघण्टुपाख्यान्तरखण्ड

श्रीशास्त्रवचनादिभिश्च—पवित्रमितिसुदर्शनस्यसञ्ज्ञा
विज्ञायते— ४ चरणश्रुतिपवमानसूक्ताद्यैककण्ठ्येनापि
सुदर्शनपरत्वमस्यमन्त्रस्याविज्ञायते —५ पवित्रमित्याभि
रित्यादिश्रुतिस्साक्षादेवैमम्मन्त्रंतप्तचक्राङ्कितविषयंव्या
करोति--६ आमाञ्चतप्ततनवस्तप्ताङ्गाहरिलाञ्छनैः ।शृ
तास्सुभोग्यतांप्राप्यभुज्यन्तेपरमात्मनेतिभारद्वाजसं
हितापरिशिष्टप्रथमाध्यायवचनेनापि — साक्षादियमेव
श्रुतिस्तप्तचक्राङ्कितविषयतयाव्याख्यायते-- ७पवित्रंब्रा
ह्मणस्पत्यंजगद्व्यासंहरेस्सदा । तेनातप्ततनूर्येषांनतेया
न्तिपरंपदम् । तेनतप्ततनूर्येषांतेप्रयान्तिपरंपदमिति
पाद्मोत्तरखण्डद्वितीयाध्यायवचनेनापीयंश्रुतिरुक्तार्थं
पराव्याख्यायते ८-पवित्रंतेविततमितिमुद्रयेद्दक्षिणेभुज
इतिसनकस्मृतिवचनेन —पवित्रंविततंब्राह्मंप्रभोगात्रेतु
धारितम् । श्रुत्यैवचाङ्कयेद्गात्रेतद्ब्रह्मसमवाप्तयइतिवृद्धहा
रीतस्मृतिवचनेनचायम्मन्त्रस्साक्षात्तप्तचक्राङ्कनकर्मण्ये
वविनियुज्यते ९--एवंभगवच्छास्त्रेपारमेश्वरसंहितायाम्
पवित्रंतेविततमित्येतन्मन्त्रंयजुर्मयानितिचक्रप्रतिष्ठा
कर्मण्यस्यमन्त्रस्यविनियोगेनापिसुदर्शनपरत्वंसिध्य

ति १०-तस्मादित्थं श्रुतिपञ्चरात्रस्मृतिपुराणवेदनिघ-
ण्ट्वादिभिरेव सुदर्शनपरतया स्फुटमेव व्याख्यायमानस्य
सौदर्शने कर्मणि विनियुज्यमानस्य चास्य मन्त्रस्य सुदर्श
नपरयोजनानुगुणं प्रस्फुटमबाधितं सम्भवन्तं सुसङ्गत
मर्थं विहायाक्लिष्टकल्पनया प्रसह्याकृष्यासम्भवदर्थान्तरप
रयोजनावर्णनं न कथञ्चिदपि साधुसङ्गच्छत इति पारमा
र्थिकश्रुतिमर्मग्रहणकौतुकिनो निर्मत्सरा विद्वांसो विदांकु
र्वन्तु ॥ ८६ ॥ सौदर्शनकर्मविनियोगानुगुण प्रागुदाहृ
तश्रौतस्मार्तादिव्याख्यानवच्च - दशापवित्रानुमन्त्रण
विनियोगानुगुणं सर्वपदानामर्थान्तरकल्पनागर्भं श्रौत
स्मार्तादिव्याख्यानं किञ्चिदस्य मन्त्रस्य न क्वाचिदुपलभा
महे ॥ ८७ ॥ येन भवदुक्तापि काचिद्योजना प्रामाणि
की स्यात् ॥ ८८ ॥ आपस्तम्बकृता विनियोगोपपत्तिस्तुव
क्ष्यते ॥ ८९ ॥ यदपि-पवित्रवन्तः-पवित्रं ते-ब्रह्मा
देवानाम्-असतस्सत् -इति चतस्रः पवित्रवत्य उत्तरास्मि
न्निति बोधायनकल्पसूत्रोदाहरणपूर्वकं सायनाविरचितं
माधवीयवेदार्थप्रकाशान्तर्गतमेतन्मन्त्रव्याख्यानम्-
हे ब्रह्मणस्पते-अन्नस्य मंत्रस्य वा पालक सोम-तेत्वदर्थम्

पवित्रम्-शोधकमिदंदशापवित्रम्-- विततम्--विस्तारित
म्-प्रभुः-तेनपवित्रेणशोधितत्वात्त्वंकर्मणेसमर्थस्सन्-वि
श्वतः--सर्वतः-गात्राणि-यज्ञाङ्गानि--पर्यैषि--व्याप्नोषि--
पवित्रेणाशोधितस्ययज्ञाङ्गत्वंनास्ति--शोधितस्यतुसो
मस्ययज्ञाङ्गत्वमस्तीत्यत्रहाविरन्तरंदृष्टान्तत्वेनोपन्यस्य
ते-अतप्ततनूः--अतप्ता-तनूः--स्वरूपम्--यस्यपुरोडाशा
देः-- सोयमतप्ततनूः--तादृशःपुरोडाशः--आमः--अपक्व
स्सन्--तत् यज्ञाङ्गत्वम्--नाश्नुते--नप्राप्नोति--योविदग्ध
स्सनैर्ऋतोयोऽशृतस्सरौद्र इतिश्रुतेः--शृतासइत्--पक्वाए
वपुरोडाशादयः--वहन्तः-- यज्ञंनिर्वहन्तः-- तत्--यज्ञा
ङ्गत्वम्-- समाशत--सम्यक्प्राप्तवन्तः--यश्शृतस्सदैव
इतिश्रुतेः--अपक्वस्यपुरोडाशादेर्यज्ञाङ्गत्वंयथानास्ति--प
क्वस्यतुयथाविद्यते-- तथापवित्रेणाशोधितस्यसोमस्यय
ज्ञाङ्गत्वंनास्ति-- शोधितस्यतुविद्यतइत्याभिप्रायइति ॥
॥ १० ॥ तदप्येतेननिरस्तम्--अनुपदोपदर्शितयोज
नोक्तदोषाणामखिलानामधिकानांचकेषांचिद्दोषाणाम
त्रसत्त्वात्--एतद्योजनामाश्रित्यैवस्वबुद्धिगोचरतद्गतक
तिपयदोषपरिजिहीर्षयातत्समानविषयायाएवसत्याः

किञ्चिद्भिन्नरूपायाः पूर्वोक्तयोजनायाअर्वाचीनभास्करे
णवर्णनात्—पवित्रवन्तइत्यादिपूर्वोदाहृतबोधायनक
ल्पसूत्रस्यारुणकेतुकाग्निचयनोपयोगिमनःकल्पकावि
ष्टकोपधानकर्मणिपवित्रमन्त्रविनियोगपरतयाताहृश
विनियोगंप्रतिसर्वथानुपयोगित्वेनोक्तमन्त्रस्यदर्शितक
ल्पसूत्रोदाहरणपूर्वकंदशापवित्रपरतावर्णनस्यात्यन्तास
ङ्गतत्वाच्च॥११॥चतस्रःपवित्रवत्यउत्तरस्मिन्निति कल्प
सूत्रेचतसृणामृचांपवित्रवत्यइतिनिर्देशस्यपवित्रशब्दा
र्थविषयकबोधजनकत्वपर्यवसन्नंप्रतिपादकतासम्बधेनप
वित्रवत्त्वमन्तरेणानिर्वाहात्-पवित्रपदस्यदशापवित्रपर
त्वे—ब्रह्मादेवानाम्—असतस्सत्-इत्येतयोर्मन्त्रयोःकथ
ञ्चिदपिदशापवित्रविषयकबोधजनकत्वस्यदुरुपपादत्वा
त—सुदर्शनविषयकबोधजनकत्वस्यकथंचिदुपपादनसम्भ
वाच्चात्रत्यपवित्रशब्दस्यसुदर्शनपरताया आवश्यकतया
सुदर्शनपरत्वंविनैवदशापवित्रपरतयोक्तमन्त्रयोजनान
सङ्गताभवति॥१२॥गात्राणीत्यस्यचेतनभोगावच्छेदक
मनुष्यादिशरीरेमुख्यस्यलक्षणयायज्ञाङ्गपरत्ववर्णनम्—
दशापवित्रशोधितस्यसोमस्ययज्ञाङ्गतायाःप्रामाणिकत्वे

पिनानाविधयज्ञाङ्गान्तरव्यापितायाअप्रामाणिकत्वेनबा धितायास्तस्याःप्रतिपादकतयाव्याख्यानम्- अतप्ततनू शब्दस्यतनूशब्दमाहिम्नाप्राणिविषयतयाप्रस्फुटंप्रतीय मानस्यातप्तस्वरूपाविषयत्ववर्णनम्-विशेष्यतयातदन्वय योग्यस्यपुरोडाशइतिपदस्याध्याहारकल्पनम्—वहन्तइ त्यत्रकर्मतयान्वययोग्यस्ययज्ञमितिपदस्याध्याहारक ल्पनंचेत्येतेदोषाअत्रसम्भवन्ति ॥१३॥ प्राग्योजनोक्तदो षान्तराण्यपिचात्रानुसन्धेयानि॥१४॥ एवंपूर्वार्धोक्तमर्थं प्रत्युत्तरार्धोक्तार्थस्यकेनाप्यंशकेनदृष्टान्तत्वेनाप्रतीय मानस्यबलादाकृष्यदृष्टान्तरूपतयाव्याख्यानमप्यस्वा रसिकम्॥१५॥दृष्टान्ततयानिर्दिष्टस्यपुरोडाशस्यतप्तत्वा तप्तत्वाभ्यांयज्ञार्हत्वतदभावोपपादनस्यस्वरसतस्सोम स्याप्यतप्तस्यैवयागानर्हतागमकतौपयिकत्वेपिदशाप वित्राशोधितस्यतस्ययागानर्हतागमकतौपयिकताविरहे णदृष्टान्तासामञ्जस्यंच ॥१६ ॥ एवं—चरणंपवित्रमित्या दिकाठकश्रुतिद्वयम्—यत्तेपवित्रमर्चिषि—अग्नेविततमन्त रा — ब्रह्मतेनपुनीमहइत्यादिपवमानसूक्तंचयथापावि त्रशब्दवाच्यार्थविशेषसम्बन्धाधीनांशुद्धिंचेतनानांप्रति

पादयति – तथेयमपिश्रुतिश्चेत्तनानामेवताहृशींशुद्धिंप्र
तिपादयतीतिस्फुटमवगम्यते–अततनूरित्यत्रतनूशब्द
प्रयोगस्वारस्यात्–उभयत्रतापसंस्कारप्रतीतिस्वारस्यात्
पवित्रविततशब्दाभ्यांपरस्परैककण्ठ्यस्यप्रत्यभिज्ञाय
मानत्वाच्च॥ १७॥अर्चिस्सम्बन्धसहस्रधारत्वादिविशेष
णान्वयानुपपत्त्याचताहृशश्रुत्यन्तराणांदशापवित्रपर
त्वासम्भवेनसुदर्शनपरतायाएववक्तव्यतयातदैककण्ठ्ये
नापीयंश्रुतिस्सुदर्शनपरैव– नदशापवित्रपरेतिसुधीभि
र्निश्चेतुंशक्यम् ॥ १८॥ किंबहुना--पवित्रमित्यग्निरित्या
द्युदाहृतश्रुतिः -- आमाद्यतप्ततनवइत्याद्युदाहृतभगव
च्छास्त्रवचनम्--पवित्रंब्राह्मणस्पत्यामित्याद्युदाहृतपाद्मव
चनंचसाक्षादिमामेवश्रुतिंप्रस्फुटंसुदर्शनपरामेवव्याख्या
तीत्येषाश्रुतिस्सुदर्शनपरैव-नान्यपराव्याख्यातुंशक्येति
विद्वांसोविदांकुर्वन्तु ॥ १९ ॥ अथैवमस्याःपवित्रश्रुतेःक
थंचिदप्युक्तरीत्यादशापवित्रविषयत्किञ्चिदेकयोजनाप
रत्वस्याप्यसम्भवेसौदर्शनत्वस्वीकारेचप्रागुदाहृतापस्त
म्बसूत्रोक्तदशापवित्रानुमन्त्रणविनियोगःकथमुपपद्यतइ
तिचेदिदमत्रावधीयताम् – पवित्रमितिबोधकशब्दैकदे

प्याच्छुद्धिजनकत्वेनगुणेनसादृश्याच्चसुदर्शनदशापवित्र
योरेकत्वमभिसन्धायदशापवित्रेसुदर्शनदृष्टिपूर्वकंतदनु
मन्त्रणेकरणतयासौदर्शनस्यैवास्यपवित्रमन्त्रस्यगौणोऽ
यंविनियोगः-१सम्भवतिचान्यदीयस्यापिमन्त्रस्यकेनचि
न्निमित्तेनान्यस्मिन्गौणोविनियोगः--२अतएवाहि-निवे
शनस्सङ्गमनोवसूनामित्यैन्द्र्यागार्हपत्यमुपतिष्ठतइतिश्रु
त्यैवैन्द्र्याऋचोगार्हपत्योपस्थानेविनि योगउक्तः-३एतद्वि
चारश्चकृतःपूर्वतन्त्रेतृतीयाध्यायेद्वितीयपादे--वचनात्त्व
यथार्थमैन्द्रीस्यात्-- ३ -- २ -- ३ गुणाद्वाप्यभिधानं
स्यात्सम्बन्धस्याशास्त्रहेतुत्वात् --३-- २ -- ४ - इति
तृतीयचतुर्थसूत्राभ्याम्-४ अनयोश्चविवरणमित्थमनुस
न्धेयम्--ऐन्द्रीऋक्इन्द्रपरोमन्त्रः--वचनात्तु--ऐन्द्र्यागा
र्हपत्यमुपतिष्ठतइतिश्रुतिवचनबलात्तु--तुशब्दःप्रसक्तास
म्भवशङ्कापरिहारार्थः--अयथार्थम्--अर्थमनतिक्रम्यय
थार्थम्--नयथार्थमयथार्थम्--इन्द्ररूपंसहजमर्थमतिक्र
म्यंतियावत्--स्यात्-गार्हपत्यरूपार्थान्तरेपिवर्तेत--कथ
मन्यवाचिनश्शब्दस्यान्यबोधकत्वसम्भवइत्यत्राह--गु
णाद्वेत्यादि--सम्बन्धस्य--शब्दार्थयोर्वाच्यवाचकभावल

क्षणस्यस्वाभाविकसंबंधस्य अशास्त्रहेतुत्वात्- ऐन्द्र्यागा र्हपत्यमुपातिष्ठतइतिविनियोगशास्त्रहेतुकत्वासम्भवात्- विनियोगशास्त्रेणस्वतःसिद्धवाच्यवाचकभावलक्षणश ब्दार्थसम्बन्धस्यान्यथाकरणायोगादितियावत् -गुणाद्वा पि- इन्द्रसादृश्यहेतुयज्ञसाधनत्वादिगुणयोगाद्वापि--वा पीत्यनेनव्युत्पत्तिभेदैकयदृच्छयादिसम्भवान्निमित्तान्तरा णिसङ्गृह्यन्ते--अभिधानम्--मन्त्रघटकेन्द्रादिशब्देनगा र्हपत्यस्यबोधनंसम्भवतीति--५तथाच--यथैन्द्र्यापि मन्त्रस्यगार्हपत्योपस्थानेगौणोविनियोगः -तथासौदर्शी नस्याप्यस्यपवित्रमन्त्रस्यदशापवित्रानुमन्त्रणेगौणोवि नियोगस्सम्भवत्येवेतिनकाचिदनुपपत्तिरिति ॥१००॥ इत्थंचमन्त्रघटकपदेषुकस्यापिस्वारसिकार्थप्रहाणमति क्लेशेनास्वारसिकार्थान्तरकल्पनंचान्तरेणैवदशापवित्रा नुमन्त्रणविनियोगस्यापिनिर्वाहेतान्निर्वाहार्थमनावश्य कातिक्लिष्टार्थान्तरकल्पनागर्भप्रागुक्तयोजनाद्वयमसङ्ग तमेवेतिसिद्धम् ॥ १०१ ॥ चञ्चच्चन्द्रकरस्प र्शहर्षोन्मीलिततारका--अहोरागवतीसन्ध्याजहातिस्व यमम्बरामित्यादौकरादिशब्देषुप्रतीयमानयोर्द्वयोर्द्वयो

रर्थयोःपरस्पराभेददृष्टिवदिहापिपवित्रशब्दप्रतीतयोस्सु
दर्शनदशापवित्रयोरभेददृष्टिस्वीकारेहिनशब्दार्थस्वार
सिकताप्रहाणंकृतंभवति--विततमितिपदंद्रोणकलशो
परिविस्तारितमित्यर्थकम्--अन्यत्सर्वंसुदर्शनपरयोज
नातुल्यमेवेतिनात्रकिञ्चिदप्यस्वारसिकतावकाशः ॥
॥ १०२ ॥ प्रभुर्गात्राणिपर्येषिविश्वतइतिभगवतःप्रशं
सनम्-अतप्ततनूरित्यादिनासुदर्शनप्रशंसनम्-दशापवि
त्रेसुदर्शनाभेददृष्टिश्चेत्येतत्सर्वंभगवत्प्रसादेनदशापवित्रे
सुदर्शनानुप्रवेशनेनशुद्धिविशेषलक्षणफलसम्पत्त्यर्थमि
तिध्येयम् ॥ १०३ ॥ फलार्थाअन्यस्मिन्नन्यदृष्टयश्च--
नामब्रह्मेत्युपासीतेत्यादिप्रतीकाद्युपासनेषुवेदान्तेप्रसि
द्धाः ॥ १०४ ॥ एतन्मन्त्रप्रकृतारुणकेतुकचयनप्रकर
णेऽपिनानामन्त्राणामनुद्धिन्नतत्स्वार्थानामेवसतांदृष्टिपर
तयैवविनियोगनिर्वाहइत्युपरिष्टाद्व्यक्तीभविष्यति ॥
॥ १०५ ॥ अस्यांयोजनायामप्यस्याश्श्रुतेस्सुदर्शनता
पसंस्कारपरत्वंनव्याहतम् ॥१०६॥ एवमस्याश्श्रुतेःक्व
चिद्गौणविनियोगेनकथञ्चित्कदाचिदर्थांतरपरत्वस्वीका
रेपिस्वतस्सिद्धंसौदर्शनत्वंनापहीयते=यथा=निवेशन

स्सङ्गमनोवसूनामित्यैन्द्या ऋचः क्वचिद्गार्हपत्योपस्थाने
विनियोगेनकदाचिद्गार्हपत्यपराया अपिस्वतास्सिद्धमैन्द्र
त्वंनापहीयते-यतस्तस्याऐन्द्रीत्येवनिर्देशश्श्रूयते १०७
तस्मात्--निवेशनस्सङ्गमनोवसूनामित्यस्या ऋचोयथै
न्द्रपरैवयोजनामुख्या-नान्यपरातथास्याःपवित्रश्रुतेरपि
सुदर्शनपरैवयोजनामुख्या--नान्यपरेत्येवंसिद्धंभवतीति
प्रागस्मदुक्तपरिपूर्णसुदर्शनपरयोजनोक्तरीत्यासुदर्शन
तापसंस्कारप्रतिपादनप्रधानतास्याश्श्रुतेर्निराबाधैव ॥
॥ १०८ ॥ नच-पवित्रश्रुतेस्सौदर्शनत्वंकथंनिर्णीतमि
तिवाच्यम्-प्रागुदाहृतवेदनिघण्टुप्रभृतिभिरेतच्छ्रुतिघ
टकपवित्रशब्दस्यसुदर्शनसञ्ज्ञात्वावगतेः-श्रुतिभगव
च्छास्त्रसंहितास्मृतिपुराणादिभिरेवास्याश्श्रुतेस्सुदर्शनप
रतयाप्रस्फुटंव्याख्यानात्-प्रागुदाहृतबहुश्रुत्यन्तरैकक
पठ्यात् -श्रुतिघटकसर्वपदानांसुदर्शनपरयोजनायाएव
स्वरसतोऽनुगुणत्वात्-अन्यपरयोजनायाअतथात्वाच्च
मन्दमतीनामपिसुखेनतन्निश्चयसंभवात् ॥ १०९ ॥
अतएव-श्रीपाञ्चरात्रशास्त्रान्तर्गतपारमेश्वरसंहितायांप्र
तिष्ठाध्यायेचक्रप्रतिष्ठायाम्-तत्तत्स्थापनकालेतुतत्त्

त्सञ्ज्ञान्मनूञ्जपेदित्यारभ्यविनियुज्यमानेषुसुदर्शन
सञ्ज्ञाघटितत्वेनसुदर्शनमन्त्रतयाप्रसिद्धेषुमन्त्रेषु—प
वित्रंतेविततमित्येतन्मन्त्रंयजुर्मयानितिपवित्रमन्त्र
स्यापिघटकतयाविनियोगःकृतोदृश्यते ॥ ११० ॥
एवंतत्रैवसंहितायामुत्सवाध्यायेरक्षार्थचूर्णस्नपनेकतिप
यसुदर्शनमन्त्रान्विनियुज्य—मन्त्रैरेतैस्तुचाष्टाभिरन्यै
स्सौदर्शनैस्तथेतिवचनेनसंग्राह्यतयाऽभिहितेषुप्रकर
णान्तरोक्तसौदर्शनमन्त्रेषुपवित्रमन्त्रस्यापिघटकतया
पिचतस्यसौदर्शनत्वंसिद्धम् ॥ १११ ॥ तस्माद्भग
वच्छास्त्रेपिसमन्ततः प्रसिद्धमस्यमन्त्रस्यसौदर्शनत्वम्
॥ ११२ ॥ तथाच—सौदर्शनत्वेनसुप्रसिद्धस्यास्यमन्त्र
स्यसुदर्शनपरयोजनामुख्येतिसिद्धम् ॥ ११३ ॥ नचै
कस्यमन्त्रस्यपरस्परविरुद्धौद्वौविनियोगौकथंप्रामाणि
कौसम्भवतः—अतोऽत्रद्वयोर्विनियोजकशास्त्रयोरवश्य
मेकेनाप्रमाणेनभवितव्यम्—तत्रापिश्रौतविनियोगस्य
प्रबलतयातत्प्रतिपादकशास्त्रमेवप्रमाणम्—इतरदप्रमा
णम्—इत्थंचदशापवित्रानुमंत्रणविनियोगोमुख्योवाभव
तु—गौणोवा—सएवग्राह्योनेतरइतिवाच्यम्—श्रौतविनि

योगशब्देनश्रुतिप्रतिपन्नकर्माणिविनियोगस्यविवक्षित
त्वेसौदर्शनकर्मणोऽपिश्रुतिप्रतिपन्नत्वेनतद्विनियोगस्या
ऽपिश्रौतविनियोगत्वाविशेषेणतस्माद्दशापवित्रानुमन्त्र
णविनियोगस्यप्रबलत्वासिद्धेः-श्रुतिप्रतिपन्नविनियोग
स्यतथात्वेऽपिदशापवित्रानुमंत्रणविनियोगस्यापस्तम्बसू-
त्रप्रतिपन्नत्वेऽपिश्रुत्यप्रतिपन्नतयाश्रौतविनियोगत्वाभा-
वेनप्रबलत्वासिद्धेः-प्रत्युत-पवित्रमन्त्रंसुदर्शनतापसं
स्कारपरंव्याकुर्वन्त्या--पवित्रमित्यग्निरित्याद्युदाहृतश्रु
त्याऽर्थतःप्रतिपाद्यमानस्य- पवित्रंतेविततमितिमुद्रये
द्दक्षिणेभुजइतिसनकस्मृत्याद्युक्तसौदर्शनकर्मविनियोग
स्यैवश्रौतविनियोगत्वसिद्ध्यातद्बलेनदशापवित्रानुम-
न्त्रणविनियोगतच्छास्त्रयोरेवप्रत्याख्येयत्वसिद्धेश्च ॥
॥ ११४ ॥ एवमयंपवित्रमन्त्रोबोधायनापस्तम्ब
सत्याषाढाश्वलायनजैमिनिप्रभृतिभिर्महर्षिभिस्तत्तत्प्र
करणानुगुण्येनतत्तत्कर्मानुगुणार्थप्रकाशनरूपलिङ्गबले
नचनानाविधकर्मसुविनियुज्यमानोदृश्यते-यथायथंत
त्तत्कर्मविनियोगानुगुण्येनार्थानुसन्धानमपिविद्वद्भिस्त
त्रतत्रक्रियतेचेत्यतःक्वचिद्विनियुक्तस्यनान्यत्राविनियो

गइतिनिर्बन्धोपिनिर्निबन्धनः ॥ ११५ ॥ किंबहुना ॥ ११६ ॥ एकस्यमन्त्रस्यसर्वथापिविनियोगद्वयासम्भवे –निवेशनस्सङ्गमनोवसूनामित्यैन्द्र्यागार्हपत्यमुपतिष्ठतइति श्रुतिरेवव्याकुप्येत् ॥ ११७ ॥ इयंहि श्रुतिः–इन्द्रपरत्वेनैन्द्रेकर्मणिस्वतस्सद्धमुख्यविनियोगायाऐन्द्र्याऋचोगार्हपत्योपस्थानेगौणंविनियोगमनुशास्ति ॥ ॥११८॥विचारिताचेयंश्रुतिःपूर्वतन्त्रइत्यवोचाम ११९ तस्मादेकस्यमन्त्रस्यविनियोगद्वयासम्भववर्णनमसङ्गतमेवेत्यकामेनाप्यभ्युपगन्तव्यम् ॥ १२० ॥ इदंपुनरत्रावधेयम्–मन्त्राःखलुस्वप्रतिपाद्यार्थविशेषसम्बन्धिनिकर्मविशेषेक्रियमाणेस्वानुसन्धानतस्संस्काराविशेषोत्पादनफलाःक्लृप्ताः––१अतोऽर्थानुगुणविनियोगैरेवमन्त्रैर्भवितव्यम्––अन्यथाहिविनिगमकाभावेनसर्वत्रसर्वमन्त्राणांविनियोगप्रसङ्गोदुर्वारस्स्यात्-२अतएवहिपूर्वतन्त्रेतृतीयाध्यायद्वितीयपादे–अर्थाभिधानसामर्थ्यान्मन्त्रेषुशेषभावस्स्यात्तस्मादुत्पत्तिसम्बन्धोऽर्थेनानित्यसंयोगात्––३––२––१–इतिप्रथमसूत्रमर्थाभिधानसामर्थ्यादेवमन्त्राणांतत्तच्छेषत्वंप्रदर्शयद्गौणेऽर्थेविनियोगं

निरुन्धन्मुख्यएवार्थेतंनियच्छति–४इत्थंच–यदिपुनरे
तेनानाभूतान्वाक्यार्थान्प्रतिपादयितुंशक्नुवन्ति–तर्हि
विनिगमनाविरहेणकामंनानाभूतेषुकर्मसुविनियोगंल
भेरन्नेवेतिकस्तान्निरुन्ध्यात् – ५नचमन्त्राणांसम्भवन्ना
नार्थानामपिकस्मिंश्चिदेकस्मिन्नेवार्थेतात्पर्यंप्रकरणादि
भिर्नियन्तव्यम्–अन्यथामन्त्रप्रतिपाद्ययावद्वाक्यार्था
नामेकस्मिन्कर्मणिक्वाप्यलभ्यान्वयतयाक्वापिविनि
योगायोगेनमन्त्राणामुत्पत्तेरेवनिरर्थकत्वापत्तेः–तस्मादे
कस्यापिमन्त्रस्यनानार्थपरत्वंनानाकर्मविनियोगश्चनक
थंचिदपिसम्भवतीतिवाच्यम्–नानार्थकस्यापिशब्दस्य
सर्वत्रयुगपदनेकार्थबोधकत्वादर्शनाद्यथाविवक्षंस्थलभे
देनैवनानार्थबोधकत्वदर्शनाच्चमन्त्राणामपिनानार्थका
नांप्रयोगभेदेननानार्थकत्वस्यनानाकर्मविनियोगस्यच
सम्भवेबाधकाभावेनसङ्कोचस्यान्याय्यत्वात्– ६ दृश्य
तेहिसैन्धवमानयेत्यादिवाक्यंनानास्थलेप्रयुज्यमानम
सम्भेदेनैवनानार्थबोधजनकंच– ७ नचैवंतर्हि–अर्था
भिधानसामर्थ्यादित्यादिप्रागुदाहृतंसूत्रंकथंगौणविनि
योगंनिरुणद्धि –मुख्यविनियोगवद्गौणविनियोगस्यापि

स्वीकारेकाक्षतिरितिवाच्यम्–मुख्यविनियोगेनैवमन्त्र
स्यसम्भवतिचारितार्थ्येगौणविनियोगकल्पनस्यान्या
य्यत्वात्–गौणविनियोगकल्पनेऽनवस्थाप्रसङ्गस्यदुर्वार
त्वाच्च–८मुख्यार्थनानात्वेतुविनिगमनाविरहान्नानावि
नियोगादुर्वारः ९ नचमुख्यगौणयोरपिविनिगमनावि
रहस्सम्भवति–शब्देनमुख्येगौणेचप्रत्याययितव्येमुख्य
प्रत्ययस्यानियततयामुख्यगौणयोरतुल्यबलत्वात्– १०
अर्थाभिधानसामर्थ्यादित्युदाहृतंचसूत्रमिममेवार्थं प्रति
पादयति–११अस्यहिसूत्रस्येत्थंविवरणम्–मन्त्रेषु बर्हिर्देव
सदनंदामीत्यादिषु–शेषभावः–लवनादितत्तत्कर्मशेषत्व
म् अर्थाभिधानसामर्थ्यात्–अर्थस्याभिधेयस्य–यदाभिधा
नम्मुख्यवृत्त्याप्रतिपादनम्–तत्सामर्थ्याद्भवति–नतुगौ
णवृत्त्याप्रतिपादनाद्भवति–उत्पत्तिसम्बन्धः–मन्त्रोत्पत्त्यु
पपत्तिः–मन्त्राणामुत्पत्तिसार्थक्यमितियावत्–तस्मात्–
मुख्यार्थादेव–स्यात्–अर्थेन–मुख्यप्रतिपाद्येन–नित्यसं
योगात्–नित्यंमुख्यप्रत्ययकालेगौणप्रत्ययकालेच–संयो
गात्– प्रतिपादकत्वलक्षणसम्बन्धसत्त्वात्–मुख्यगौण
योर्द्वयोरपिप्रत्ययकालेमुख्यप्रत्ययस्यावश्यंभावान्मुख्या

र्थविनियोगेनैवचारितार्थ्यसम्भवाच्चमन्त्राणाम्मुख्यए
वार्थविनियोगोन्याय्योनगौणइतिभावइति—१२ नचैवं
सति—निवेशनस्सङ्गमनोवसूनामित्यैन्द्रस्यमन्त्रस्यगा
र्हपत्योपस्थानेकथंगौणविनियोगस्वीकारइतिवाच्यम्-श्रु
तिवचनबलात्तत्रतथाविनियोगस्वीकारसम्भवात्— वच
नविरोधेनन्यायप्रसरणासम्भवाच्च—१३नहिवचनविरो
धेन्यायःप्रभवतीतिहिन्यायविदः—१४ तदिदमेवहिस्पष्ट
मुच्यते—वचनात्त्वयथार्थमैन्द्रीस्यात्-- ३—२—३--इतिसू
त्रेण—१५-तथाच-- पवित्रंतइत्यादिमन्त्रस्यश्रुतिभगव
च्छास्त्रसनकहारीतादिस्मृतिपाद्मादिपुराणवचनासिद्धा
स्सौदर्शनकर्मविषयामुख्याविनियोगाआपस्तम्बादिवच
नसिद्धादशापवित्रानुमन्त्रणादिविषयागौणविनियोगा
श्चयथायथंसम्भवन्त्येवेतिनविरोधः— १६ यदिचैकस्यम
न्त्रस्यैकविधार्थानुबन्धिविनियोगनानात्वस्यकथंचित्स
म्भवेपिपरस्परविसजातीयनानार्थकत्वम्- तदनुबन्धिवि
नियोगनानात्वंचनकथंचिदपियुक्तमङ्गीकर्तुमितिमन्य
ते--१७ तदापिसौदर्शनकर्मविषयामुख्यविनियोगाएवा
दरणीयाभवन्ति—१८ नपुनरन्यविषयागौणविनियोगाः

मुख्यपरित्यागे बीजाभावात्-तेनैव सम्भवति चारितार्थ्ये गौणस्यापि परिग्रहे कारणाभावाच्च-१९ न खलु वेदवेद्य परब्रह्मभूतं सर्वेश्वरेश्वरम्--यस्सर्वविदित्यादिश्रुतिविदितसहजसार्वज्ञ्यादिसमस्तकल्याणगुणगणम्-वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहमिति स्वात्मानमेव यथावस्थितसकलवेदार्थसाक्षात्कारिणं स्वयमेव चावेदयन्तं परमासनया सर्ववैदिकसम्प्रतिपन्नं भगवन्तं वासुदेवमन्तरेण कश्चिदन्यो वेदार्थं यथावत्साक्षात्कर्तुं प्रभवति-२० तेन च भगवता वासुदेवेन श्रीपञ्चरात्रशास्त्रे सौदर्शनकर्मविषया एव विनियोगा उक्ताः प्रदर्शिताः--२१ अतो न तद्विरोधेनापस्तम्बाद्युक्ता दशापवित्रानुमन्त्रणादिविषया गौणा विनियोगा शक्या आदर्तुम्--२२ किं च-पवित्रं त इत्यादिमन्त्रं सुदर्शनपरं विवृण्वन्त्या पवित्रमित्याग्निः-अग्नेस्सहस्रार इत्याद्युदाहृतश्रुत्यैव किलाभिहितो भवति श्रीपञ्चरात्राद्युक्तसौदर्शनकर्मविनियोग इति न तद्विरोधेन काचिदपि स्मृतिरन्यत्र विनियोगमनुशासितुं प्रभवति-२३ श्रुतिविरोधे हि स्मृतिरुपेक्ष्या-२४ तदुक्तं पूर्वतन्त्रे प्रथमाध्याये तृतीयपादे विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम् १-३-३ इति तथा चातोपि

हेतोरापस्तम्बाद्युक्तोविनियोगः श्रुतिविरोधादनादरणी
यःअपितुश्रीपञ्चरात्राद्युक्तःश्रुत्यनुमतएवविनियोगआ
दरणीय इतिसिध्यति-२६किंबहुना--२७आपस्तम्बाद्यु
क्तविनियोगंपुरस्कृत्य--एकस्यविजातीयविनियोगद्वया
सम्भवंचाङ्गीकृत्यश्रीपञ्चरात्रादिसिद्धविनियोगतदनुगु
णार्थपरत्वयोःप्रत्यवस्थानमिदमतीवाविवेचितरमणी
यम्-विपरीतप्रत्यवस्थानप्रसङ्गस्यदुष्परिहरत्वात्-प्रत्युत
पूर्वोक्तरीत्याविपरीतप्रत्यवस्थानस्यैवसुदृढावस्थितत्वा
च्च--२८नहिखलुश्रुतेःस्मृतिर्बलीयसीतिकेनचिदनुन्मत्ते
नवक्तुंशक्या--२९नापिचापस्तम्बादयोभगवतोप्यभि
ज्ञतमाइतिकेनचिदास्तिकेनवक्तुंशक्याः--३०नापिच
शब्दशक्तिस्वरसात्सुदर्शनान्यपरत्वंपवित्रमन्त्रस्यसम्भ
वदुक्तिकम्--३१अतोनकथंचिदपिसौदर्शनकर्मविषयवि
नियोगस्यप्रतिकोटितयावस्थातुंशक्नुयुर्विनियोगान्तरा
णि--तस्मादापस्तम्बाद्युक्तागौणाअन्यविनियोगास्सर्व
थाप्यकिञ्चित्कराएवेतिपवित्रमन्त्रस्ययथोक्तार्थपरता न
केनापिप्रकारेणचालयितुंशक्येतिसिद्धंभवतीति १२१॥
वस्तुतस्तुपूर्वोक्तश्रुतितदनुसारिश्रीपञ्चरात्रशास्त्रस्मृतिपु

राणादिबहुप्रमाणगणैःपवित्रमन्त्रस्यसुदर्शनपरताया
स्सौदर्शनकर्मण्येवमुख्यविनियोगस्यचप्रतिपन्नतयात
द्विरोधेनप्रवृत्तौप्रामाण्यस्यैवदुर्लभत्वप्रसङ्गात्--कथंचि
त्सत्यांगतौप्रामाण्यप्रत्याख्यानस्यायुक्तत्वाच्चतम्मन्त्रंद
शापवित्रानुमन्त्रणेविनियोजयतःप्रागुदाहृतापस्तम्बसू
त्रस्यापितात्पर्यमिदमेवभवितुमर्हति--अयम्मन्त्रस्स्वा
र्थमजहदेवप्रकरणानुगुणपूरणसंवलितोऽनुसंधीयमा
नोयथार्हमिहसंस्कारंजनयन्नुपकारकोभवत्येवेति ॥
॥ १२२ ॥ सौदर्शनकर्मविनियोगानुगुणोयोऽर्थोऽस्य
मन्त्रस्यास्माभिरभ्यधायि--सएवार्थःकल्पसूत्रकृतआप
स्तम्बस्यापिस्वकृतविनियोगस्थलेभिमतइत्युपगम्यते
॥ १२३ ॥ परन्तु--ब्रह्मप्राप्तिहेतुनिरतिशयशुद्धिकरण
तयैतन्मन्त्रप्रतिपन्नंतेपवित्रंस्वसमानसञ्ज्ञेवितन्यमा
नेऽस्मिन्दशापवित्रेसन्निहितामिहापेक्षितांस्वामशुद्धिमा
तनोत्वितस्थेवंदशापवित्रेसुदर्शनसान्निध्यानार्थंब्रह्मणस्प
तिशब्दितविष्णुप्रार्थनारूपानुसन्धानपूरणमिहाभिप्रेत
मितिस्वीक्रियते ॥ १२४ ॥ इत्थंचप्राग्दशापवित्रानुम
न्त्रणविनियोगानुगुणास्मदुक्तयोजनोक्तरीत्यामन्त्रघट

कपवित्रादिशब्दानांदशापवित्रादिपरत्वस्वीकरणंसुदर्श
नदशापवित्रयोर्नामसाम्येनाभेददृष्टिस्वीकरणंचेत्येव
मादिःक्लेशोपिनोपादेयः ॥ १२५ ॥ मुख्यगौणविनियो
गस्थलेषुसर्वत्रैवापेक्षितानुसंधानविशेषपूरणंकिञ्चित्प्राय
शोऽपेक्षितमेवहिवर्तते ॥ १२६ ॥ ततइहापिप्रकरणा
नुगुणानुसंधानविशेषपूरणंनदोषायेतिनकश्चित्क्लेशलेशः
॥ १२७ ॥ प्रसिद्धंहिप्रायशस्सर्वत्रैवमन्त्रानुसंधानसाह
चर्येण–तत्तत्प्रकरणानुगुणं–विष्णुमावाहयामि–विष्णुं
तर्पयामीत्येवमादिपदपूरणम् ॥ १२८ ॥ अन्ततोमान
समपिवातादृशमनुसन्धानंतत्रतत्रापेक्षितमेवेतितावतै
वतत्तद्विनियोगोनिर्वोढुंशक्यएव ॥ १२९ ॥ अतोना
स्यार्थान्तरकल्पनमावश्यकम् ॥ १३० ॥ अतएवबोधा
यनकल्पसूत्रे–एतेनारुणकेतुकोव्याख्यातोयावन्मन्त्रम
विष्टकाइतियजुर्वेदारण्यकप्रथमप्रपाठकस्थानांस्वस्वप्र
तिनियताभन्नभिन्नार्थानामेवसतांसर्वेषाम्मन्त्राणामा
रुणकेतुकाग्निचयनोपयोगिमनःकल्पितजलमयेष्टकोप
धानकर्मणिविनियोगकरणंसङ्गच्छते ॥१३१॥नहितेषा
म्मन्त्राणांप्रतिनियतंतंतमर्थमपहायसाक्षादुक्तेष्टकापर

त्ववर्णनंकेनचित्कृतम्॥१३२॥ अपितुसर्वत्रैवतत्रास्म
दुक्तरीत्यापूरणादिनैवताह्विनियोगनिर्वाहस्सर्वसम्प्रति
पन्नः ॥ १३३ ॥ अतएव—तत्रैव—स्मृतिःप्रत्यक्षमैतिह्य
म्—अनुमानश्चतुष्टयम्—एतैरादित्यमण्डलम्—सर्वैरेवावि
धास्यते—इतिमन्त्रव्याख्यानदशायांसायनेनापिमन्त्रं
स्वरसतःप्रतीयमानार्थपरमेवव्याख्याय-ततः-हेअविष्ट
केत्वंतथाविधमण्डलस्वरूपासीतिस्तुतिरितिकथंचिदस्य
मन्त्रस्याविष्टकास्तुतिरूपतामुपपादयतातत्रत्यसर्वमन्त्र
विनियोगनिर्वाहदिक्प्रदर्शिता ॥ १३४॥ सूर्योमरीचि
मादत्ते—सर्वस्माद्भुवनादधि—तस्याःपाकविशेषेण—स्मृ
तंकालविशेषणम्—इतिकालपरतदुत्तरमन्त्रव्याख्याने
चमन्त्रंयथोपलम्भंकालपरमेवव्याख्याय ततः-ईदृशका
लरूपात्वमसीतीष्टकास्तुतिः-एवंसर्वसर्वत्रद्रष्टव्यामि ति
वदतासायनेनप्रस्फुटमेवायमंशःप्रतिपादितः ॥ १३५॥
उक्ताविष्टकोपधानकर्मविनियुक्तमन्त्रेष्वेवचपवित्रमन्त्र
स्यगायत्रीमन्त्रस्यचान्तर्भावोदृश्यते-यजुरारण्यकप्रथम
प्रपाठकैकादशानुवाकेप्रथमपठितेपवित्राङ्गिरस्सम्बन्धि
मंत्रचतुष्टयेद्वितीयमंत्रतयापवित्रमन्त्रस्य—पश्चात्पठि

तेश्यावाश्वसम्बन्धिमंत्रसप्तकेद्वितीयमंत्रतयागायत्रीमं
त्रस्यचपाठात्॥ १३६॥ नचात्रानयोर्मन्त्रयोस्साक्षादिष्ट
कापरतयाकाचनयोजनासायनेनापिकृता ॥१३७॥अ
पितुतत्प्रकरणस्थानांनानाविधमंत्रान्तराणामिवानयो
रपिमंत्रयोस्स्वार्थमजहतोरेवकथञ्चिदुक्तरीत्यापूरणवशा
दुविष्टकोपधानकर्मणिविनियोगसम्भवमभिसंदधानेन
तेनतयोस्स्वाभाविकार्थतयास्वप्रतिभातयत्किञ्चिदर्थप
रतयैवव्याख्यानंकृतम् ॥ १३८ ॥ तथाचयथेहगायत्री
मंत्रपवित्रमंत्रयोस्साक्षादिष्टकापरतांविनैवकथंचित्पूर
णेनतदुपधानकर्मणिबोधायनकृतविनियोगनिर्वाहोभि
मतः-तथैवस्वतस्सुदर्शनपरस्यापिपवित्रमंत्रस्यापस्तम्ब
कृतदशापवित्रानुमंत्रणविनियोगनिर्वाहोपिकथञ्चित्पूर
णेनसम्भवत्येवेतिनतदर्थमेवावश्यंश्रुतिपञ्चरात्रस्मृतीत
तिहासपुराणादिबहुप्रमाणगणविरोधमप्यविगणय्यत
स्यदशापवित्रपरतास्वीकरणीयेतिसिद्धंभवति॥ १३९॥
नच-उद्गातारोद्रोणकलशंप्रतिष्ठाप्यतस्मिन्नुदीचीनदशं
पवित्रंवितन्वन्ति--पवित्रंतेविततंब्रह्मणस्पतइतिवितन्य
मानमभिमंत्रयतेयजमानइतिप्रागुदाहृतापस्तम्बसूत्र

घटकयोः-पवित्रंवितन्वन्तीतिपदयोर्मंत्रघटकपवित्रवित
तशब्दार्थप्रत्यभिज्ञापकतादर्शनेनदशापवित्रपरत्वमस्य
मन्त्रस्यावश्यंतदभिमतमितिस्वीकार्यमेवेतिवाच्यम्-अ
त्यल्पप्रत्यभिज्ञापकत्वमात्रेणास्यमन्त्रस्यदशापवित्रपर
त्वप्रतिकूलातप्ततन्वादिबहुपदघटितस्यश्रुत्यादिभिस्सु
दर्शनपरतयाविशदंव्याक्रियमाणस्यपदसन्दर्भेणैवस्व
रसतःप्रस्फुटप्रतिपन्नसुदर्शनपरत्वस्यकथंचिदपिदशाप
वित्रपरतायाविनियोजकसूत्रकाराभिमततास्वीकारायो
गात्तत्स्वीकारेचविरोधाधिकरणन्यायेनसूत्रकारवचस
एवाप्रमाणतयाप्रत्याख्यानप्रसङ्गस्यदुर्वारत्वात्प्रायशो
मन्त्राणाममुख्यविनियोगस्थलेष्वपिविनियोजकशास्त्रै
र्नकेनापिप्रकारेणपदपिवास्वप्रतिपाद्यविनयोगविष
यार्थस्मारकपदघटितानामेवमन्त्राणांतत्तदर्थेषुविनियो
गदर्शनात्तावन्मात्रेणतत्परत्वस्वीकारस्यावश्यकत्वेसर्व
थैवामुख्यविनियोगस्थलेषुनानाविधानामत्यन्तासम्ब
द्धयोजनानांकल्पनाप्रसङ्गस्यदुर्वारत्वाच्च॥ १४० ॥इद
मत्रावधेयम्—आपस्तम्बेनपवित्रमन्त्रस्यदशापवित्रानु
मंत्रणेविनियोगःपरमनुशिष्टः—१नतुदशापवित्रपरतया

व्याख्यानं कृतम्—२ केनचित्प्रकारेण कथंचित्सम्भवदपि
तादृशं व्याख्यानं निराकरणीयमेवेति च नास्माकं कश्चिद्
स्ति तत्र विद्वेषः—३ न सम्भवति तु पदसन्दर्भस्वभावादे
व तादृशं पूर्णं व्याख्यानम्— ४ तत्र केन किं कर्तुं शक्यम्
—५ सायनेनास्य पवित्रमन्त्रस्य प्रसङ्गादाकृष्य कथंचिद्दशा
पवित्रपरतयैव पूर्णं व्याख्यानकरणं सुदर्शनपरतया व्या
ख्यानाकरणं च श्रुत्यन्तरोपबृंहणाद्यपरामर्शमूलकमाग्र
हकृतं वा नियतं भवितुमर्हति—अन्यथा-सुदर्शनपरतया
योजनास्वारस्यस्य दशापवित्रपरतया योजनात्यन्तास्वा
रस्यस्य च व्युत्पन्नमात्रधीगोचरस्य सायनेनानादरणे का
रणाभावात्— ६ अत्यल्पप्रागुपदर्शितप्रत्यभिज्ञापकस्य
मात्रेण च प्रसङ्गादाकृष्य कथंचिदर्थान्तरपरत्ववर्णनं चातीवा
सङ्गतम्—तथा सति युवा सुवासा इति वासः—पुष्पवतीति
ति पुष्पमिति विष्णुस्मृति पञ्चषष्टितमाध्यायेवस्त्रपुष्प
दानविनियुक्तयोर्मन्त्रयोर्यथाकथञ्चिद्वस्त्रपुष्पस्मारक
वासःपुष्पपदघटितत्वमात्रेण वासःपुष्पपरयोजनाया अ
पि कर्तव्यतापत्तेः—७ न चेष्टापत्तिः—प्रागेवासिद्धविषययो
र्मन्त्रघटकवासःपुष्पपदयोरपि तत्र विनियोगशास्त्राविहि

तत्तत्कालदेवार्थंसमर्प्यमाणवस्त्रपुष्पपरत्वाभावात्–म
न्त्राघटकेतरसर्वपदानांसुतरामेवतादृशयोजनाननुकूल
त्वाच्च– ८ अपितुमन्त्रघटकपदस्मारितामिदंवस्त्रंसम
र्पयामि–पुष्पंसमर्पयामीत्याद्यनुसन्धानपूरणतएवक
थंचित्तत्रतादृशमन्त्रविनियोगोनिर्वाह्यः “ ९ एवंतत्रैव”
दधिक्राव्णइतिमधुपर्कमितिमधुपर्केविनियोगःकृतोद
धिक्राव्णइतिमन्त्रस्य “ १० नचमधुपर्कपरतातस्यम
न्त्रस्यसम्भवति ” ११ अपितुमधुपर्केदध्यादिद्रव्यसं
घातात्मकेदध्नोप्यन्तर्भूतत्वेनकथञ्चित्तत्स्मारकपदघटि
तत्वमस्ति-- १२ एवंतत्रैव-- धूरसीतिमन्त्रस्यधूपेविनि
युज्यमानस्यकथंचिद्धूपस्मारकधूकारघटितत्वमस्ति
-- १३ नचैतावताधूपपरत्वम्मन्त्रस्यावश्यंवक्तव्यंभव
ति--१४एवमन्यत्रापि--अग्निर्मूर्धादिवइतिमन्त्रंभौमाय
कीर्तयेत्। उद्बुध्यस्वाग्नइत्येवम्मन्त्रंसोमसुतायवै । अ
न्नात्परिस्रुतोरसंशुक्रस्यतुनिगद्यते । शनैश्चरायविभवे
शन्नोदेवीतिहोमयेत् । कयानश्चित्रआभुवदितिराहोरु
दीरयेदित्यादिस्मृतिविनियुक्तानाम्मन्त्राणांनतत्तद्ग्रहप
रत्वम्मुख्यंकथंचिदपिसम्भवति-- १५ अत्र--अग्निर्मू

र्धेत्यादिमन्त्रस्यभौमविषयेविनियुक्तस्य-अग्निसादृश्या
त्कथंचिद्भौमस्मारकाग्निपदघटितत्वमस्ति--१६ उद्बुध्य
स्वाग्न इत्येतन्मन्त्रस्यबुधविषयविनियुक्तस्यबुधनामघट
कबुकारधकारघटितपदघटितत्वंकथंचित्तत्स्मारकमस्ति
- १७ अन्नात्परिस्रुतोरसंशुक्रंज्योतिरजायतेतिमन्त्र
स्यशुक्रविषयेविनियुक्तस्यशुक्रमितिपदेननपुंसकेनापि
नामसाम्यात्कथंचिच्छुक्रस्मारकेणघटितत्वमस्ति-१८
शन्नोदेवीरितिमन्त्रस्यशनिविषयेविनियुक्तस्यशनिना
मघटकशकारनकारघटितत्वंकथञ्चित्तत्स्मारकमस्ति--
१९कयानश्चित्रआभुवदितिमन्त्रस्यराहुविषयेविनियुक्त
स्ययथाकथंचिच्चित्राकारराहुशिरस्स्मारकचित्रपदघटि
तत्वमस्ति-- २० नचैतावन्मात्रेणतेषाम्मन्त्राणाम्मुख्यं
तत्तद्ग्रहपरत्वमवश्यंवक्तव्यंभवति-- २१ अपित्वेतेमन्त्रा
यानेवार्थान्न्यायानुगृहीतलब्धसमञ्जसपरस्परसमन्वय
पदसन्दर्भबलादभिधातुमीशते--तादृशेऽन्येष्वेवार्थेषु
तत्रतत्रानुशिष्टमुख्यविनियोगाएवसन्तस्सम्प्रतीहगौण
वर्त्मनैवविनियुज्यन्तइतिविशदमेवावगम्यते२२ इह
शाश्वगौणविनियोगाःप्रागुक्तरीत्यातत्तदनुगुणगौणवृ

त्तिकल्पनानुसन्धानाविशेषपूरणतःकथञ्चिदेव नेतव्याः
२३ तथाच--इत्थमेवपवित्रमन्त्रस्यापिदशापवित्रानु
मन्त्रणविनियोगआपस्तम्बकृतोपिनेतव्यः--मन्त्रघट
कपदसन्दर्भानुगुण्यविरहेणासन्दिग्धार्थश्रुत्यादिप्रमा
णान्तरानुगुण्यविरहेणचदशापवित्रपरयोजनायाअस
म्भवात् २४ किञ्च--अयम्मन्त्रआपस्तम्बेनदशापवि
त्रानुमन्त्रणेविनियुक्तः २५ बोधायनेनारुणकेतुकाग्नि
चयनोपयोग्यविष्टकोपधानकर्मणिविनियुक्तः २६ छ
न्दोगैस्तुपावनार्थपुण्याहतीर्थाभिमन्त्रणकर्मणि विनि
युज्यमानोदृश्यते २७ तदेतत्सर्वंप्रागुदाहृतश्रुतिपञ्चरा
त्रस्मृतिपुराणादिप्रतिपन्नेनशब्दस्वरससिद्धेनसुदर्शनप
रत्वेनैवकथञ्चिन्निर्वोढुंशक्यम्--शुद्धिविशेषसम्पादनाय
सुदर्शनसान्निधानप्रार्थनार्थतयातत्रसर्वत्रतादृशमन्त्रानु
सन्धानोपयोगसम्भवात् २८ दशापवित्रपरत्वेतु नस
र्वोपयोगितामन्त्रस्यसम्भवति २९ सम्भवत्यैकार्थ्ये
नचारितार्थ्येनानार्थकल्पनंचान्याय्यम् ३० तस्मात्सर्व
थासुदर्शनपरत्वमेवपवित्रमन्त्रस्यमुख्यंभवितुमर्हतिना
न्यपरत्वमिति ॥१४१॥ सुदर्शनपरत्वंसौदर्शनकर्मस्वे

यमुख्यविनियोगत्वं च प्रागुदाहृतश्रुतिपञ्चरात्रस्मृतिपुरा
णादिप्रमाणगणैस्स्पष्टमेवव्याख्यायत इति च प्रागेवातिपु
णमुपपादितम्॥ १४२॥ नच -कथमेते महर्षयोऽव्युत्प
न्नवदप्रयोजकाक्षरसाम्यादिस्मारकसद्भावमात्रावलम्ब
नेन वस्तुतोऽतत्परानपि मन्त्रांस्तत्तत्कर्मसु विनियुञ्जते अव
र्जनीयं चातो भवत्यनभिज्ञत्वमेतेषाम्--अपरिहार्यश्च भ
वतादृशसाम्यावलम्बनेनान्येषामपि मन्त्राणां यथाकामं
तत्रतत्र कर्मस्वर्वाचीनैरपि विनियोगकारणप्रसङ्ग इति
वाच्यम् महर्षिभिर्मन्त्राणां तत्तत्संस्कारविशेषप्रयोजकश
क्तिविशेषानुस्मयोगमहिमतोऽवगम्य प्रयोक्तॄणां तत्तद्विनि
योगकालस्मरणसौकर्यसिद्ध्यर्थं यथोक्तलक्षणस्मारक
घटितानां तेषां तत्रतत्र विनियोगकरणमात्रेण विनियोक्तॄ
णां महर्षीणामनभिज्ञताप्रसङ्गानवकाशात् अर्वाचीना
नामीदृशसामर्थ्यविधुराणामुक्तस्वैरविनियोगलक्षणा
तिप्रसङ्गानवकाशाच्च १४३ यत्त्वयुक्तमर्वाचीनेन भास्करे
ण बोधायनकल्पसूत्रोक्तारुणकेतुकाग्निचयनविनियोगा
नुगुणं कञ्चिदर्थं कल्पयता-हे ब्रह्मणस्पते-अग्ने-ते-तव-पवि
त्रम्--मेध्यम्--विततम्--बहुभिर्मन्त्रैर्बहुना च प्रयोगेण वि

स्तीर्णम्--तत्--प्रकृतमारुणकेतुकचयनम्-अतप्ततनूः संवत्सरमेतद्व्रतंचरेत्--द्वौवामासौ--नियमस्समासेन --तस्मिन्नियमविशेषाः-त्रिषवणमुदकोपस्पर्शी--चतुर्थं कालपानभक्तस्स्यात्--अहरहर्वाभैक्षमश्नीयाद्दित्या द्यारुणकेतुकप्रश्नान्त्यानुवाकोक्ततपोभिरशोषिततनुः --नाश्नुतेनप्राप्नोति--इत्--इदंतप्तम्--इदमर्थइच्छन्दः --वहंतःआचरन्तः--शृतासः--दग्धपापाः--तत्--चय नम्--पूर्वे--ऋषयः--समाशत-प्राप्तवन्तइत्यर्थः-यद्वा-- ब्रह्मणस्पते--अग्ने--ते-विततंपवित्रंततूस्थानम्--अग्नेः पूर्वदिश्यस्यस्थानेस्वतेजसाभानीतिमंत्रवर्णादिषुप्रसि द्धम्--अतप्ततनूः--अकृतारुणकेतुकचयनः नाश्नुते--न प्राप्नोति--तपश्शब्दस्यधर्ममात्रेपि-तपश्श्रुतंचयोनिश्चे त्येतद्ब्राह्मणकारकमित्यादौप्रयोगदर्शनादिति॥१४४॥ तदप्येतेनैवनिरस्तम्--बोधायनकल्पसूत्रे--एतेनारुणके तुकोव्याख्यातोयावन्मन्त्रमविष्टकाइत्यारभ्यप्रश्नगत सकलमन्त्रानारुणकेतुकाग्निचयनेविनियुञ्जानेनबोधाय नेन--पवित्रवन्तःपवित्रंते--ब्रह्मादेवानाम्--असतस्सत् --इतिचतस्रःपवित्रवत्यउत्तरास्मिन्निर्गतीविनियुक्तप

विश्वाङ्किरस्सम्बन्धिमन्त्रचतुष्टयघटकस्यपवित्रमन्त्रस्या
पिसर्वसाधारणतयाप्राप्तविनियोगप्राप्तिमात्रेणारुणकेतु
काग्निपरतावर्णनानिर्बन्धाभावात् मंत्रांतराणामिवास्या
पिमंन्त्रस्यस्वतस्सिद्धस्वार्थमजहत एवपूर्वोक्तरीत्याप्रकृत
विनियोगनिर्वाहसम्भवात्-अन्यथासर्वमंत्राणांतत्प्रकर
णगतानांतत्परतावर्णनतन्मूलक्लिष्टकल्पनादिलक्षणम
हागौरवप्रसङ्गात्-कैरपितथाव्याख्यानाकरणात्-तत्पर
तामन्तरेणैवसायनकृततत्प्रकरणगतमन्त्रव्याख्यानावि
नियोगनिर्वाहभंग्योःप्रागेवप्रदर्शितत्वाच्च॥१४५॥मन्त्रा
णांनानाप्रकरणेषुश्रूयमाणानामपिस्वप्रतिपाद्यार्थानुब
न्धिष्वेवकर्मसुसंस्कारकतयाविनियोगयोग्यत्वात्प्रकर
णोक्तकर्मसुतथाविधकर्माभावेपि-यत्रतादृशकर्मश्रूयते
तत्रैवनेतव्यामंत्रास्तादृशकर्मणिविनियोगाय--नतुश्रव
णानर्थक्यपरिहारायैवस्वार्थाननुबन्धिष्वपिप्रकरणोक्त
कर्मसुबलाद्विनियोज्याः-पाठादृष्टार्थतयैवतत्रतत्रवेदेमं
त्रश्रवणसार्थक्यसम्भवेनतादृशनिर्बन्धाभावादित्येवच
तत्त्वमितिनमंत्राणांक्वापिवाऽतिक्लिष्टार्थकल्पनमावश्य
कम् ॥ १४६ ॥ अतएव--पूषाद्यनुमन्त्रणादीनिदर्शपू

पौर्णमासाभ्यामुत्कृष्यन्तेऽन्यत्रार्थवत्त्वाय--स्वप्रकरणे मु
ख्यस्वप्रतिपाद्यार्थानुबन्धिकर्मविनियोगाभावेन सार्थ
क्यासम्भवात् ॥ १४७ ॥ तदुक्तं पूर्वतंत्रे तृतीयाध्याये
द्वितीयपादे--संस्कारकत्वादचोदितेन स्यात्-३-२-२-इ
ति द्वितीयसूत्रेण ॥ १४८ ॥ अस्येदं शाबरभाष्यम्--अ
थ यदुक्तम् पूषाद्यनुमन्त्रणादीनामुत्कर्षो न भविष्यतीति -
तत्रोच्यते-युक्तस्तेषामुत्कर्षः-संस्कारको हि मंत्रः-सोऽस
ति संस्कार्ये नर्थकः इति यत्रार्थवान् "तत्र नायिष्यते" न
च कश्चिद्दोषो भविष्यतीति ॥ १४९ ॥ पूर्वसूत्रव्याख्या
यामपि-पूषाद्यनुमंत्रणादीनां गौणवृत्त्याश्रयणेऽत्र प्रकर
ण एव सार्थक्यसम्भवान्नोत्कर्षः कर्तव्य इत्याशङ्कां समा
धानं चोपपादयता शाबरभाष्यकारेणोक्तम्--अपि चैवमा
श्रीयमाणे पूषाद्यनुमंत्रणादीनि दर्शपूर्णमासाभ्यां नोत्कृ
ष्यंते-तत्रैव गौणेनाभिधानेन कृतां इव तामभिवदिष्यं
ति एवं प्राप्ते ब्रूमः-मुख्य एव विनियोक्तव्यो मन्त्रो न गौण-इ
ति-कुतः-उभयाशक्यत्वात्-प्रकरणे हि समाम्नानात्प्रधा
नेनैकवाक्यतामुपैति-तत्रैतदापतति-यच्छक्यमनुवादेन न
मन्त्रेण साधयितुम्--तत्साधयेदिति--स चासावर्थाभिधा

नसंयोगाच्छक्नोत्युपकर्तुम्--नगौणमर्थंशक्नोत्यभिधातु
म्--तस्मान्नगौणेविनियोगइति ॥ १५० ॥ तथाचेदमत्र
बोध्यम्--संस्कारकत्वादचोदितेनस्यात्--३-२--२-इति
सूत्रेणमन्त्राणांसंस्कारकत्वंस्वभावइति--यत्रचतेविनि
युक्तास्संस्कारं जनयेयुः-यत्रचनजनयेयुःतदुभयाविवेक
स्यशास्त्राधीनतया-यत्रशास्त्रेणविनियोगचोदनम्-तत्रै
वतेविनियोक्तव्याः-नान्यत्रेतिचाभिधीयते-१ अत्रविनि
योगचोदनंचविनियोगज्ञापनम् २ तच्चद्वेधाभवति-मन्त्रा
णामर्थाभिधानसामर्थ्यात् विनियोगवचनसामर्थ्याच्च-
३तत्रैकम्-अर्थाभिधानसामर्थ्यात्-३--२-१इत्यादिसूत्रे
णाभिहितम् ४अपरन्तु वचनात्त्वयथार्थमैन्द्रीस्यात् ३-२
-३इत्यादिभिरभिहितम् ५अर्थाभिधानसामर्थ्यमूलोवि
नियोगश्चमन्त्राणाम्मुख्यार्थविषयएवसम्भवतिनगौण
विषये-गौणविषयेतत्स्वीकारेऽनवस्थाप्रसङ्गात्--६विनि
योगवचनमूलोविनियोगोपिमन्त्राणां--गौणार्थकल्पन
मन्तरेणसर्वथैवानिर्वाहेसत्येवगौणार्थकल्पनयानिर्वा
ह्यःनान्यथा ७अतएव--निवेशनस्सङ्गमनोवसूनामित्या
दिमन्त्राणांगार्हपत्योपस्थानान्यथानुपपत्त्याऽर्थान्तरक

ल्पनयाविनियोगनिर्वाहः –आरुणकेतुकचयनप्रकरण
स्थमन्त्राणामर्थान्तरकल्पनमन्तरेणैवविनियोगानिर्वा
हश्चकृतः–८आरुणकेतुकचयनप्रकरणएवचबहूनाम्म
न्त्रान्तराणामिवपवित्रमन्त्रस्यापिपाठोदृश्यते–९ अ
तोनप्रकरणवशात्पवित्रमन्त्रस्यासंभवादर्थान्तरकल्पन
मावश्यकम् १०प्रकरणवशादसम्भवदर्थान्तरकल्पनेचना
नावेदनानाप्रकरणपठितस्यास्यपवित्रमन्त्रस्यासम्भव
द्नेकार्थकल्पनप्रसङ्गश्चावर्जनीयः –११प्रत्युतेहावान्त
रप्रकरणभूतपवित्राङ्गिरस्सम्बन्धिमन्त्रान्तरसमवधानं
चसुदर्शनैकपरत्वानुगुणम्–१२तस्मात्सर्वथैवासमञ्जसं
पवित्रमन्त्रस्यस्वेच्छयैवार्थान्तरकल्पनमिति॥१५१॥कि
ञ्चवाक्यव्यवहितानांपदानांसुदूरस्थानामपिचपरस्परा
न्वयकरणंसम्भवत्सन्निहितपदान्वयप्रहाणंक्लिष्टकल्पन
यापदानामसम्भवतोऽर्थस्यप्रसञ्जकरणंश्रुत्यन्तराद्यानु
गुण्येनपदशक्त्यासन्दर्भस्वरसेनचप्रतिपन्नस्यार्थस्यप्रहा
णंप्रकरणाद्यप्राप्ताध्याहारकल्पनंतच्छब्दस्यातिविप्रकृ
ष्टाप्रसिद्धानुपस्थितार्थपरामर्शकत्वस्वीकरणम्–प्रभुर्गा
त्राणिपर्यैषिविश्वतइत्यस्यप्रकृतोपयोग्यर्थपरत्वानिरूप

णंचेत्येवमादयः प्रागुक्तयोजनान्तराणामुक्तास्सर्वेपिदो
षाअनयोरपियोजनयोस्तथैवजाग्रति ॥ १५२ ॥ यद
प्यर्वाचीनभास्करेण—अस्यमन्त्रस्यसनकस्मृतिवचन
सिद्धंतप्तसुदर्शनमुद्राधारणाविनियोगम्मुख्यमनन्यथा
सिद्धंचपर्यालोच्य—यावत्तदन्यथासिद्धिसम्पादनंस्ववा
दःप्रतिष्ठापितोनभवतीतिमन्वानेनप्रसह्यनिजकुद
ष्ट्यातमन्यथाचिकीर्षुणोक्तम्—विष्णोर्नुकेनमन्त्रेणताप
यित्वासुदर्शनम्—चरणंपवित्रमितितद्वाभ्यामभिमन्त्र
येत् । पवित्रंतेविततमितिमुद्रयेद्दक्षिणेभुजे । ज्ञानंवैरा
ग्यमास्तिकयंश्रद्धाचास्याभिवर्धतइतिमहर्षिणासनके
नसौदर्शनेकर्मणिविनियोगानुसारेणास्यमन्त्रस्यसुदर्श
नपरत्वेपितप्तपदस्यदाहपरत्वंकरणपदाध्याहारादिदुष्टं
नसमाश्रयणीयम्-१येनास्यमन्त्रस्यमुद्राधारणाविधिपर
त्वंभवेत्—२तथाहि—ब्रह्मणस्पते—यज्ञविघ्नकरासुरादि
संहरणेनब्राह्मणानांरक्षकेतिसुदर्शनस्यसम्बोधनम्—३
प्रभुशब्देनविष्णुरुच्यते ४त्वंविष्णुरूपीभूत्वासर्वाणिगा
त्राणिव्याप्नोषि—५तस्यतेपवित्रंमेध्यंविततंतत्स्थानंत
पोरहितोनाश्नुते ६ इदंतपश्चरन्तोदग्धपापास्तत्स्थानं

प्राप्तवन्त इत्यर्थपरत्वादिति ॥ १५३ ॥ तत्तुच्छम्—पश्य मृगोधावति—अक्ताश्शर्करा उपदधाति तेजोवैघृतमित्यादिस्थलेष्विवप्राप्ताध्याहारस्यादोषतायाः—विनैवाध्याहारंनिर्वाहसम्भवस्यचप्रागुपदर्शितत्वात्—अप्राप्तानुपस्थिताध्याहारात्यन्तव्यवहितपदपरस्परान्वयात्यन्तास्वारसिकातिक्लिष्टार्थकल्पनादिप्रस्फुटबहुदोषदुष्टाया उपदर्शितप्रतिपक्षयोजनाया अतिमन्दमतिनाप्यस्मदीययोजनामुपेक्ष्य परिग्रहयोग्यत्वासम्भवाच्च ॥ १५४ ॥

इदमत्रावधेयम्- पश्यमृगोधावतीत्यत्र पश्यतिक्रियाकर्माकांक्षाशमनायप्राप्तः--मृगोधावतीत्यत्रैवोपस्थितमृगविषयस्याद्वितीयान्ततत्पदस्याध्याहारः--अक्ताश्शर्करा उपदधाति तेजोवैघृतमित्यत्र अक्ता इत्यञ्जनाक्रियाकरणाकांक्षाशमनायप्राप्तः-तेजोवैघृतमित्यत्रैवोपस्थितघृतविषयस्यतृतीयान्ततत्पदस्याध्याहारश्चास्वारसिकइतिवादोषइतिवानकेनचित्पदवाक्यप्रमाणपदवीज्ञेनक्कचित्कथ्यते । -अथवा—मृगोधावतीतिवाक्यार्थस्यधावनकर्तृमृगरूपस्यपश्यतिक्रियायांकर्मतयान्वयस्य—तेजोवैघृतमितिवाक्यार्थस्यतेजस्करघृतरूपस्य—अक्ता इत्य

अनाक्रियायांकरणतयान्वयस्य चस्वीकारेऽध्याहारप्रस
क्तापिनाविद्यते २–ईदृशानिर्वाहद्वयमपितान्त्रिकसम्मत
मेव ३– पदार्थमात्रस्यकर्मतयाकरणतयावाविवक्षणा
भावेनचनात्रद्वितीयातृतीयाप्रसङ्गः ४– एवमिहापि
अतप्ततनूरित्यत्रतापक्रियाकरणाकाङ्क्षाशमनायप्राप्तः
पवित्रंतेविततमित्यत्रैवोपस्थितपवित्राविषयतृतीयान्त
तच्छब्दाध्याहारोवापवित्रंतेविततमितिवाक्यार्थस्यतत्व
त्सम्बन्धिविततपवित्ररूपस्यकरणतयातापक्रियायाम
न्वयंस्वीकृत्यविनैवाध्याहारंनिर्वाहोवानकेनचिदस्वार
सिकोवक्तुंशक्यः ५– एवमिह--पवित्रमित्येतदेवप्रकरण
वशेनाविभक्तिविपरिणामेनतृतीयान्तंसदनुषज्यस्वरस
तएव-अतप्ततनूरित्यत्रप्राप्तांकरणाकाङ्क्षांशमयितुंप्रभव
ति --६ सर्वथापवित्रशब्दार्थस्यैव--अतप्ततनूरित्यत्रता
पसंस्कारकरणतयाविवक्षाच--पवित्रमित्यग्निः--अग्नि
र्वैसहस्रारः-- सहस्रारोनेमिः--नेमिनातप्ततनुः--ब्रह्मण
स्सायुज्यंसलोकतामाप्नोतीतिसामवेदीयमैत्रायणीय
शाखागतश्रुत्या--चरणंपवित्रंविततंपुराणम्--येनपू
तस्तरतिदुष्कृतानि-- तेनपवित्रेणशुद्धेनपूताः-- अति

पाप्मानमरातिंतरेमेति याजुषकाठकश्रुत्या--पवित्रेण विचर्षणिरिति-- पवित्रेणपुनाहिमा-- इति-- यत्ते पवित्रमर्चिषि--अग्नेविततमन्तरा--ब्रह्मतेनपुनीमहे-- उभाभ्यांदेवसवितः--पवित्रेणसवेनच--इदंब्रह्मपुनीमहे- इति--येनदेवाःपवित्रेण--आत्मानंपुनतेसदा-तेनसहस्र धारेण--पावमान्यःपुनन्तुमा-प्राजापत्यंपवित्रम्--शतो द्याम ँहिरण्मयम्--तेनब्रह्मविदोवयम्--पूतंब्रह्मपुनीम हे--इतिचपवमानसूक्तश्रुतिभिःपूतादिशब्दान्वयितद्वा च्यसंस्कारविशेषकरणविषयपवित्रवाचितृतीयान्तशब्द घटिताभिःस्फुटमेवव्याक्रियते ७ इत्थंप्रमाणान्तरानु गुणंस्वारसिकंचपवित्रशब्दार्थस्यतापःक्रियालक्षणसं स्कारविशेषकरणतयान्वयमुपेक्ष्यपवित्रपदस्यवाक्यान्त रव्यवहिततत्पदेनान्वयस्वीकारः--अतप्ततनूरित्यन्वय योग्यप्रकरणानुपस्थिताप्रसक्ततृतीयान्तकृच्छ्रचान्द्राय णादितपोवाचिपदाध्याहारस्वीकारः--तत्पदस्यपूर्वानुप स्थिताप्रसिद्धस्थानपरत्वस्वीकारः--वहन्तइत्यस्यधार यन्तइत्यर्थेस्वारसिकस्य--आचरन्तइत्यर्थस्वीकारः-- पवित्रपदस्यवेदनिघण्टुप्रागुदाहृतप्रमाणगणैःप्रसिद्धांसु

दर्शनपरतांविहायब्रह्मणस्पतिशब्दस्यतत्परतायाअप्र
सिद्धायास्स्वीकारश्चेत्येतत्सर्वमसङ्गतमेव ८ पवित्रंब्रा
ह्मणस्पतयंजगद्व्याप्तंहरेस्सदा । तेनातप्तातनूर्येषांनतेया
न्तिपरंपदम् । तेनतप्तातनूर्येषांतेप्रयान्तिपरंपदमिति
पाद्मोत्तरखण्डद्वितीयाध्यायवचनेषुहिसाक्षादेतच्छ्रुति
व्याख्यानभूतेषुब्रह्मणस्पतिशब्दस्यभगवत्परतापवित्र
शब्दस्यतदीयचक्रपरता—पवित्रशब्दार्थस्यैवाध्याहृततनू
तीयान्ततच्छब्दपरामृष्टस्य—अतप्ततनूरित्यत्रतापक्रि
याकरणत्वेनान्वयपरता-तच्छब्दस्यपरमपदपरताचावि
वृतादृश्यते —९ नच—परमपदवाचितातच्छब्दस्येहप्र
तिपद्यते—परब्रह्मवाचितातुभवदुक्ता—तत्कथमविरोध
इतिवाच्यम्— परमपदपरब्रह्मणोश्शरीरशरीरिणोरिवा
पृथक्सिद्धिलक्षणसम्बन्धविशेषेणसदासम्बद्धयोरेकव
स्तुत्वेनप्रतिपत्तुंव्यपदेष्टुंचयोग्यत्वात्तयोरेकतरवाचिश
ब्दस्यापरविशिष्टवाचकतासम्भवस्यप्रागुपदर्शितत्वात्त
योरेकतरप्राप्तेरपरप्राप्तिरूपत्व, च्चतथाव्याख्यानेविरोधा
भावात्-१०अतएवच—एतम्मन्त्रंव्याकुर्वाणेनतप्तचक्रा
ङ्कनकर्माणिविनियुञ्जानेनच—पवित्रांवितततंब्राह्मंप्रभोर्गा

त्रेतुधारितम् । श्रुत्यैवचाङ्क्येह्नात्रेतद्ब्रह्मसमवाप्तयइतिवृ
हद्धारीतस्मृतिवचनेनमन्त्रघटकतच्छन्दस्यब्रह्मपरता
मेवाभिसन्धायब्रह्मप्राप्तिरेवतस्यचकाङ्क्षनफलमभ्यधा
यि—११ पवित्रमित्याग्निरित्याद्युदाहृतश्रुतौच—ब्रणह्म
स्सायुज्यंसलोकतामाप्नोतीत्यनेनोक्ततच्छब्दाविवरणप
रेणयथाकाममुभयपरतयैवव्याख्यानंकृतम्-१२एवमुक्त
तच्छब्दस्यक्वाचित्परमपदपरत्ववर्णनंक्वचिद्ब्रह्मपरत्ववर्ण
नंचतयोरपृथक्सिद्धविशेषणविशेष्यभावापन्नयोरेकव
स्तुत्वेनव्यपदेशार्हतानिबन्धनमेव-१३अनयोश्शरीरश
रीरिणोरिवापृथक्सिद्धिलक्षणसम्बन्धविशेषवशेनैकव
स्तुत्वेनव्यपदेशार्हतांविशेषणविशेष्यस्वरूपभेदविवक्षा
यांभेदव्यपदेशार्हतांचसमन्ततःप्रमाणान्येवप्रकटयन्ति
१४ पृच्छामिवाचःपरमंव्योमेतिप्रश्नपूर्वकम्ब्रह्मैववाचः
परमंव्योमेतिश्रुतिरेकवस्तुत्वेनव्यपदिशतिपरमव्योम
शब्दवाच्यंब्रह्मशब्दवाच्यंच१५तद्विष्णोःपरमंपदमिति
श्रुतिः—तदक्षरेपरमेव्योमन्निति श्रुतिः-योवेदनिहितंगुहा
यांपरमेव्योमन्निति श्रुतिःयोअस्याध्यक्षःपरमेव्योमन्नि
तिश्रुतिश्चभेदेनव्यपदिशन्ति ॥१६॥ विवक्षाभेदेनोभय

विधनिर्देशबीजंदर्शयति—आकाशशरीरंब्रह्मेतिश्रुतिश्श
रीरशरीरिभावलक्षणसम्बन्धविशेषप्रतिपादनमुखेन ॥
॥ १७ ॥ भेदेनाभेदेनचव्यपदिशंस्तमिममंशंभगवान्वा
सुदेवस्स्वयमेवार्जुनंप्रत्याह--श्रीहरिवंशेविष्णुपर्वणित्रि
सप्तत्यधिकशततमाध्याये--वैदिकपुत्रानयनप्रकरणे--
ब्रह्मतेजोमयंदिव्यम्महद्यद्दृष्टवानसि। अहंसभरतश्रेष्ठ
मत्तेजस्तत्सनातनम् । प्रकृतिस्सामम परा व्यक्ताव्यक्ता
चभारत । तांप्रविश्यभवन्तीहमुक्ताभरतसत्तम । सासा
ङ्ख्यानांगतिःपार्थयोगिनांचतपस्विनाम् । तत्परंपरमं
ब्रह्मसर्वंविभजतेजगदिति ॥ १८ ॥ तस्मान्नात्रविरोध
गन्धः—१९ उदाहृतबृहद्धारीतस्मृतिः— हेब्रह्मणस्पते—
तेपवित्रंविततम्—समन्तत आस्तिकजनगात्रेष्वङ्कनमु
खेनव्याप्तम्—प्रभुः—प्रभोःस्वामिनस्तव—प्रभुरित्यत्र—
सुपांसुलुगित्यादिना=७-१- ३९--अनुशासनेनङसस्सु
श्छान्दसः--गात्राणि--अवयवान्-- विश्वतःसर्वतःपर्येषि
पर्येति--व्याप्नोति--पर्येषीत्यत्र-सुपांसुलुगित्यादिसूत्रभा
ष्योदाहृतेन-तिङाञ्चतिङोभवन्तीतिवार्तिकानुशासने
नपुरुषव्यत्ययश्छान्दसः--प्रभोश्शरीरंतुस्स्वयंसाक्षादेवा

धिष्ठायसर्वतोभासयतीतियावदित्येवम्मन्त्रयोजनावि
शेषपरा--२०अतएवप्रभोर्गात्रेतुधारितामित्युक्तम्--२१
एवमत्रब्राह्ममित्यनेन--ब्रह्मणःपरब्रह्मभूतस्यनारायण
स्यसम्बन्धीत्यर्थकेनब्रह्मणस्पतिशब्दोपिनारायणपरो
विवृतः २२ प्रभुरित्यस्यविष्णुरूपीभूत्वेतिव्याख्यान
मप्यसङ्गतम्-विष्णुकिङ्करस्यजीवात्मनस्सुदर्शनस्यवि
ष्णवभिन्नत्वासम्भवात्--२३ विष्णुशरीरंभूत्वेत्यर्थपरत्व
मपितस्यनकल्पयितुंशक्यम्--तादृशार्थस्यस्वरसतश्श
ब्दालभ्यत्वात्सार्वकालिकस्यविष्णुशरीरभावस्यकादा
चित्कत्वासम्भवात्सर्वव्याप्तिप्रयोजकत्वासम्भवाच्च
२४एवंप्रागुक्तदोषान्तराण्यपीहानुसन्धेयानि २५इत्थंच
प्रतिपक्षयोजनायाअनेकदोषदुष्टत्वादस्मदीययोजना
यांदोषासंस्पर्शाच्चादुष्टामनेकश्रुतिस्मृत्यादिप्रमाणगणा
नुगुणामस्मदीययोजनामुपेक्ष्योपदर्शितयोजनान्तर
स्वीकरणंकेवलदुराग्रहमूलमेवेतिसिद्धंभवतीति १५५॥
किञ्च--उक्तसनकस्मृत्याऽस्यमन्त्रस्याभिधीयमानेतप्त
चक्राङ्कनविनियोगेमन्त्रघटकाततनूपदस्वारस्येतदनु
गुणपूर्वोत्तरपदसन्दर्भेचपर्यालोच्यमानेऽतिमन्दमति

नापिद्व्यपक्षपातिचित्तेननकेनाप्यस्यमन्त्रस्यतत्तत्रका ङ्क्षनपरत्वमपलपितुंशक्यम् ॥ १५६ ॥ यदप्युक्तंतेन त्वदभिमतस्यविनियोजकवचनस्यमूलगवेषणायांपवि त्रमन्त्रगतदाहप्रकाशनसामर्थ्यरूपलिङ्गस्यैवमूलत्वं कल्पनीयम् –नतुविनियोजकसनकस्मृतिसमानविष यंश्रुत्यन्तरंपरिकल्प्यतन्मूलत्वंकल्पनीयम्–तथासति श्रुतिस्वरूपंतस्यविनियोजकस्मृतिमूलत्वंचकल्पनीय मितिगौरवापत्तेः–१ किन्तुसिद्धस्यैवदाहप्रकाशनसाम र्थ्यरूपमन्त्रलिङ्गस्य--धर्मिकल्पनातोधर्मकल्पनाज्या यसीतिन्यायेनस्मृतिमूलत्वमात्रंकल्पनीयम्–२ तच्चदा हप्रकाशनसामर्थ्यरूपंलिङ्गमापातप्रतीतिसिद्धमितिन तन्मूलकवचनस्यप्रामाण्यम् –३ अतएव–अमुंधर्मिक ल्पनान्यायमाश्रित्यैवपूर्वतन्त्रे–स्योनंतेसदनंकरोमिघृ तस्यधारयासुशेवंकल्पयामि–तस्मिन्नसीदामृतेप्रतितिष्ठ--व्रीहीणाम्मेसुमनस्यमानइतिमन्त्रस्यदलद्वयसम भिव्याहारात्मकवाक्यप्रमाणाद्बलीयसालिङ्गेनयथार्हं विभज्यसदनकरणेपुरोडाशप्रतिष्ठापनेचन्याय्यविनियो गस्यसमाभिव्याहारात्मकैकवाक्यताबलात्पुरोडाशप्रति

ष्टापनविशिष्टसदनप्रकाशनसामर्थ्यरूपंलिङ्गंपरिकल्प्य
कृत्स्नस्यमन्त्रंसदनकरणेविनियोजयतोबोधायनस्यव
चनंलिङ्गाभासमूलत्वेननप्रमाणमित्युक्तम् ४ नतुत
स्यविनियोजककल्पसूत्रस्यसमानविषयश्रुत्यन्तरकल्प
नेनप्रामाण्यंसमर्थितम् ५ एवमन्यान्यपिलिङ्गाभासमूल
कानिकल्पसूत्रादिवचनानिकल्पसूत्राधिकरणेभट्टपादै
रप्रमाणत्वेनोदाहृतानिद्रष्टव्यानि ६ तथाचसनकव
चनस्यप्रामाण्यसिद्धौतद्बलेनपवित्रमन्त्रस्यदाहपरत्व
सिद्धिः--दाहपरत्वसिद्धौचदाहप्रकाशनसामर्थ्यरूपलि
ङ्गमुपजीव्यप्रवर्तमानस्यसनकवचनस्यप्रामाण्यसिद्धि
रितिपरस्पराश्रयइति ॥ १५७ ॥ तदपि प्रागुदाहृ
तप्रमाणैरेवप्रत्याख्यातम्--पवित्रमन्त्रगतदाहप्रकाश
नसामर्थ्यरूपलिङ्गस्य--प्रागुदाहृतैः—पवित्रमित्यग्निः
—अग्निर्वैसहस्रारइत्यादिश्रुतिस्मृतिपञ्चरात्रादिबहुप्र
माणगणैरुपबृंहिततायाः—सुदर्शनपरपवित्रपदसमभि
व्याहारोत्तम्भिततायाः—पदसन्दर्भसमानप्रकरणश्रु
त्यन्तरादिपर्यालोचनेस्वरसतएवलभ्यमानतायाश्च

प्रागेवानिरूपणेनापातप्रतीतिमात्रसिद्धस्वरूपाभासता
याःकथंचिदपिवक्तुमशक्यतयाताद्दशालिङ्गमुपजीव्य
प्रवृत्तत्वेपिदर्शितसनकस्मृतिवचनस्यप्रमाणतायानिष्प
त्यूहत्वात्—अस्मदादीनांपवित्रमन्त्रस्यतप्तचक्राङ्कनपर
त्वप्रतिपत्तौमन्त्रघटकपदसन्दर्भपर्यालोचनतएवजाय
मानायामुपबृंहणभूतश्रुतिस्मृत्यादिप्रमाणान्तरगणव
दस्यापिवचनस्योत्तम्भकतामात्रस्वीकारेणान्योन्याश्र
यप्रसङ्गानवकाशाच्च ॥ १५८ ॥ इदंपुनरत्रावधेयम्—
इहान्योन्याश्रयकथनंतावत्सुतरामसङ्गतम् १—पवित्रम
न्त्रस्यतप्तचक्राङ्कनपरत्वसिद्धिंप्रतिसनकवचनप्रामाण्य
सिद्धेःप्रयोजकतायाः-सनकवचनप्रामाण्यसिद्धिंप्रतिप
वित्रमन्त्रतप्तचक्राङ्कनपरत्वसिद्धेःप्रयोजकतायाश्चप्रस
ङ्गेसत्येवह्यन्योन्याश्रयप्रसङ्गोवाच्यः २—सचनसंभवति
३ —तथाहि—अस्मदादीनांसनकवचनप्रामाण्यसिद्धि
स्तावद्भ्रान्तत्वप्रतारकत्वान्यतरप्रकारकविज्ञानाविषय
महर्षिकर्तृकत्वज्ञानाधीनासम्भवति ४—नतुपवित्रमन्त्र
स्यतप्तचक्राङ्कनपरत्वनिर्णयेनैवसासंपादनीया ५—तद्व
लाच्चपवित्रमन्त्रस्यतप्तचक्राङ्कनपरत्वनिर्णयश्शक्यएव

संपादयितुम् ६—सनकस्यतुनिजतपःप्रभावयोगमाहिम्न स्पष्टार्थकसमानप्रकरणस्थनानावेदशाखागतबहुश्रुत्य न्तरसाक्षात्कारादिनस्सम्भवितुमर्हत्येवपावित्रमन्त्रस्य तत्तचक्राङ्कनपरत्वनिर्णयइतितेनतन्मूलकतयैवैतत्स्मृ तिवचनप्रणयनंतस्यतत्तचक्राङ्कनेविनियोगविधानंचस ङ्गच्छतएवेतिकान्योन्याश्रयप्रसङ्गः ७--एवमस्वीकारे चोपबृंहणैर्वेदार्थनिर्णयस्यैवावकाशविरहेण—इतिहास पुराणाभ्यांवेदंसमुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदोमामयं प्रतरिष्यतीतिभारतप्रथमाध्यायवचनंनिरवकाशमेव स्यात् ८--नखल्वस्माकंदुरवगमोऽर्थोज्ञानादिमहिमाति शयशालिनाम्महर्षीणामपिदुरवगमोभवेदितिकेनचि न्नियन्तुंशक्यम् ९-मन्दमतीनांगहनाआम्नायार्थादुरवग मास्स्युः-अतोमहामतिभिर्महर्षिभिर्यथावस्थितानाम्ना यार्थान्गहनानपिस्वतपःप्रभावादिमाहिम्नास्वयमवगा ह्यनिवद्धैरुपबृंहणैरेवाविप्रतिपन्नवेदभागार्थानिर्णेतव्याइ त्यभिप्रायेणैवप्रवृत्तम्इतिहासपुराणाभ्यामित्याद्युदाहृ तवचनम् १०—नापिचतथागहनार्थापवित्रश्रुतिः—नेव निघण्टुश्रुत्यन्तरैःप्रागुदाहृतैरस्मदादीनामपिसुगमार्थ

स्यात् ११—परन्तु-पवित्रश्रुतिंयथाकामंप्रसह्यान्यथाव्या
कुर्वन्तंविवदमानंत्वांप्रतितटस्थबुद्ध्यासमाधापयितुमे
वेमान्युपबृंहणान्युदाह्रियन्ते १२बोधायनादिकल्पसूत्रा
दिवचनप्रत्याख्यानमप्यर्वाचीनकृतमुदाहृतंमस्फुटार्थ
कश्रुतिविरोधेप्रबलन्यायानुगृहीतप्रमाणान्तरविरोधेवा
सत्येनाभ्युपगन्तुंशक्यं--नान्यथेतितादृशाविरोधमप्रद
र्श्यकेवलंनरकथनंनकिञ्चिदिहकार्यकरंभवितुमर्हति १३
प्रत्युतभवदुक्तप्रत्याख्यानयुक्तिजालंकृत्स्नमपिस्वरस
तोऽसम्भवदृशापवित्रपरतांश्रुतिपञ्चरात्रस्मृतिपुराणादि
वचनैर्व्याख्यायमानसुदर्शनपरतांपवित्रश्रुतिंसमभि
व्याहृतपदान्तरानुकूल्यविरहेणदृशापवित्रबोधनासमर्थं
नकथंचिदापाततस्तत्प्रतीतिमात्रजनकेनपवित्रपदमा
त्रेणलिङ्गाभासरूपेणघटितांदृशापवित्रानुमन्त्रणेविनि
योजयतोभवदुदाहृतापस्तम्बवचनस्यैवप्रत्याख्यानोप
योगिभवति १४ --नतूक्तसनकस्मृतिवचनस्य—तदुक्त
स्यपवित्रश्रुतिसौदर्शनकर्मविनियोगस्यलिङ्गाभासमूल
तोपपादकयुक्तिलेशाकथनात्केवलतदुक्तिकोलाहलता
ण्डवमात्रतस्तदसिद्धेश्च १५तस्मात्पवित्रश्रुतेस्तप्तचक्रा

ङ्कनपरत्वंनकथंचिदपिप्रत्याख्यातुंशक्यमिति ॥१५९॥
यदपितेनैवोक्तम्—अस्यमन्त्रस्यविनियोगानुसारेणतप्त
चक्राङ्कनपरत्वकल्पनेप्राप्तार्थतयाविधिशक्तिविलोपएव
स्यात्—तथाहि—पवित्रंतेविततमितिमुद्रयेदित्यस्यविनि
योजकस्मृतिवचनस्यपवित्रमन्त्रविनियोगविशिष्टचक्र
धारणविधिपरत्वेतेनैवस्मृतिवचनेनचक्रधारणस्यप्राप्तत
यापवित्रमन्त्रस्यचक्रधारणविधिपरत्वायोगात्— १ अ
स्यस्मृतिवचनस्यचक्रधारणानुवादेनमन्त्रविनियोगवि
धिपरत्वेऽनुवादस्यप्राप्तिसापेक्षतयाचक्रधारणस्यान्य
तःप्राप्तिर्वक्तव्या— २ तत्रपवित्रमन्त्रादेवचक्रधारणप्राप्त्य
भ्युपगमेपवित्रमन्त्रस्यविधायकत्वसिद्धौतत्प्राप्तचक्रधार
णानुवादेनस्मृतिवचनस्यपवित्रमन्त्रविनियोजकत्वसि
द्धिः-स्मृतिवचनस्यविनियोजकत्वसिद्धौचस्मृतिविनियो
गबलेनमन्त्रस्यविधायकत्वसिद्धिरित्यन्योन्याश्रयापत्ते
र्वचनान्तरप्राप्तंचक्रधारणमनूद्यस्मृतिवचनस्यमन्त्रवि
नियोगविधिपरत्वेतस्मादेववचनान्तरान्मुद्राधारणस्य
प्राप्ततयानपवित्रमन्त्रस्यविधायकत्वसिद्धिरिति।१६०॥
तदतितुच्छम्—स्मृतिप्राप्तार्थत्वेनश्रुतीनांविधिशक्तिवि

लोपस्वीकारे सर्वत्र स्मृतीनां श्रुतिमूलकतयैव प्रवृत्त्यात्त
त्समानार्थकतया मूलभूतश्रुतिमात्रस्य स्मृतिप्रामाणार्थक
त्वेन विधिशक्तिविलोपप्रसङ्गस्य दुर्वारत्वात्—तत्परिहा
राय स्वानुपजीविमानान्तरप्राप्तार्थत्वस्यैव विधिशक्तित्वा
रकत्वस्वीकारे च प्रकृतेपि सनकस्मृतिवचनस्य चक्रधारण
विधिपरत्वस्वीकारमात्रेण तन्मूलभूतपवित्रमन्त्रस्य वि
धायकत्वभङ्गाभावेन मन्त्रविनियोगविशिष्टचक्रधारण
विधिपरत्वपक्षेऽनुपपत्तिलेशादर्शनात्—प्रागुक्तरीत्याऽ
स्मदादिगतस्य पवित्रमन्त्रविषयतत चक्राङ्कनविधिपरत्व
ज्ञानस्य विनियोजकस्मृतिवचनमूलकत्वसम्भवेपि सन
कगतस्य विनियोजकस्मृतिवचनमूलभूतस्य तादृशज्ञान
स्य तपःप्रभावयोगमहिमश्रुत्यन्तरसाक्षात्कारादिमूलक
त्वेनान्योन्याश्रयप्रसङ्गाभावेन दर्शितस्मृतिवचनस्य पवि
त्रमन्त्रप्राप्तचक्रधारणानुवादेन तादृशमन्त्रविनियोगवि
धिमात्रपरत्वपक्षेपि दोषगन्धानुपलम्भाच्च ॥ १६१ ॥ ए
वमेकवचनस्य स्वसमानार्थकवचनान्तरसद्भावमात्रेण
विधिशक्तिलोपस्वीकारे नानाशाखागतानां परस्परासह
कारेणैकमेवार्थं विदधतीनां विधायकत्वेन सर्वसम्प्रतिप

न्नानामग्निहोत्रादिविधिपरश्रुतीनांविधायकत्वलोपप्रस
ङ्गेनस्वबोधनीयपुरुषगताज्ञानवारकस्वानुपजीविमाना
न्तरप्राप्तार्थत्वस्यैवविधिशक्तिवारकतास्वीकारावश्यक
तयातथास्वीकारेचतप्तचक्रधारणस्यवचनान्तरप्राप्तत्व
मात्रेणपवित्रमन्त्रस्यतद्विधायकत्वभङ्गाभावेनदर्शित
स्मृतिवचनस्यवचनान्तरप्राप्तचक्रधारणानुवादेनमन्त्र
विनियोगविधिपरत्वपक्षेपिनकिञ्चिद्बाधकमुपलभामहे
॥ १६२ ॥ किंबहुना-एकविषयेषुतुल्यबलेष्वनेकप्रमा
णेषुविनिगमनाविरहेणाविधायकत्वस्यदुर्वारत्वात्-मूल
मूलिभावापन्नेषुप्रमाणेषु परस्परोपजीव्योपजीवकभाव
कथायादुर्वचत्वाच्चदर्शिताविधायकत्वान्योन्याश्रयप्रस
ङ्गादिकथाकोलाहलःकृत्स्नोप्यविवेचितरमणीयोबालि
शवादएवेतिनानेनकोलाहलेनकाचिदप्यन्यथासिद्धि
स्सम्पादिताभवत्यर्वाचीनभास्करेण अन्तरेणस्वस्यबा
लिशत्वमितिसुधियोविदांकुर्वन्तु ॥ १६३ ॥ यदप्य
र्वाचीनभास्करेण--पवित्रश्रुतिचरणश्रुत्यादिश्रुतीनांप्र
स्फुटचक्राङ्कनपरतोपबृंहणपाद्मपुराणवचनानामन्यथा
सिद्धिमुपपादयितुकामेन--सर्वाश्रमेषुवसतांब्राह्मणानां

विशेषतः । विधिनावैष्णवंचक्रंधार्यंहिश्रुतिचोदनात् । दक्षिणेतुभुजेविप्रोविभृयाद्वैसुदर्शनम् । सव्येतुशङ्खंविभृयादितिब्रह्मविदोविदुः ॥ एवम्महोपनिषदिप्रोक्तंच क्रादिधारणम् । तथैवसाम्नियजुषिऋचिप्रोक्तंवरानने- इति--चरणंपवित्रंविततंपुराणंवाङ्मयंशुभम् । तेनचक्रेणसन्तमास्तरेयुःपातकाम्बुधिम् । पवित्रंब्राह्मणस्पत्यं जगद्वयासंहरेस्सदा । तेनातमातनूर्येषांनतेयान्तिपरंपदम् ॥ इति--शुद्धेनवन्हितप्तेनब्रह्मतेनपुनीहिनः । यत्तेपवित्रमर्चिष्मदग्नेतेनपुनीहिनः । येनदेवाःपवित्रेणआत्मानंपुनतेसदा । तेनसहस्रधारेणपावमान्यःपुनन्तुमा । प्राजापत्यंपवित्रंतुशतोद्यामंहिरण्मयम् । तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे । सनेमिचक्रमजरंचक्षुरस्यमहात्मनः । तस्मिन्हिविधृतेदेवामहोन्नतपदंययुः । इत्येवंश्रुतयस्सर्वाःकथयन्तिवरानने ॥ इति--तस्माद्वैविधिवद्धार्याश्शङ्खचक्रादिहेतयः ॥ इतिचपाद्मपुराणोत्तरखण्डद्वितीयाध्यायवचनान्युदाहृत्योक्तम्--अत्रचक्रधारणस्यसकलवेदविहितत्वोक्तिर्नविशिष्यपवित्रमन्त्रस्यचक्रधारणपरत्वकल्पिकाभवितुमर्हति-- १ किञ्च--इयंवेद

विहितत्वोक्तिस्स्वोपदिष्टार्थेश्रद्धोत्पादनायार्थवादरूपैव-
ग्रामेमनसास्वाध्यायमधीयीतदिवानक्तंवेतिहस्माह
शौचआह्नेयइत्यादिवाक्येब्रह्मयज्ञावश्यकर्तव्यत्वज्ञाप
नायाह्नेयाद्युक्तिवन्निबध्यते--२ नचैतावन्मात्रेणपवित्र
मन्त्रस्यपाद्मपुराणबलेनचक्रधारणविधिपरत्वसिद्धिः
--३ दक्षिणेतुभुजेविप्रइत्यादिमहोपनिषद्वचनस्यापिन
तप्तचक्रधारणविधिपरत्वंदृश्यते--येनकेनचित्प्रकारेणच
क्रधारणविषयत्वेनैवचारितार्थ्यसम्भवात्--४ चरणंपवि
त्रमित्याद्युदाहृतपाद्मपुराणवचनजातस्यपवित्रश्रुतिच
रणश्रुतिश्रुत्यन्तरघटकतत्तत्पदानांचक्रधारणपरत्वौप
यिकसमन्वयप्रदर्शनपरत्वदर्शनेनपाद्मपुराणोपबृंहणा
यत्तंपवित्रश्रुतेश्चक्रधारणपरत्वमवर्जनीयमित्यपिनश
ङ्कयम्-देवावैयज्ञाद्रुद्रमन्तरायन्-सयज्ञमविध्यदित्यादि
कंप्रत्यक्षसिद्धार्थनिबन्धनपरंवैदिकोपाख्यानंप्रत्युपबृंह
णभूतानामृतत्प्रतिपाद्यभूतंदक्षयज्ञेदेवयजनाभावंरुद्र
कृतयज्ञहननंचतत्कालेप्रत्यक्षेणोपलब्धवद्भिर्महर्षिभि
स्तत्प्रकारमुपनिबध्यकृतानांपुराणादीनांप्रत्यक्षमूलक
तयातदानुगुण्येनतादृशोपाख्यानस्यार्थवर्णनावश्यकत्वे

पिमानान्तरानाधिगतार्थप्रतिपादनपरविधिवाक्योपबृं
हणपुराणादेःप्रत्यक्षमूलकत्वासम्भवेनपवित्रमन्त्रशक्ति
तात्पर्यनिर्णयानुकूलपुराणकर्तृबुद्धिपरिकल्पितन्यायमू
लत्वस्यैववक्तव्यतयान्यायस्यैवशरणीकरणीयत्वेनोपबृंह
णत्वेप्यनिराकरणीयप्रामाण्यासिद्धेः-न्यायस्यचासमी
चीनत्वेप्रत्यास्थेयतायादुर्वारत्वाच्चेति॥१६४॥तदप्यस
त्-विधिनावैष्णवंचक्रंधार्यंहिश्रुतिचोदनादितिचक्रधार
णस्यश्रुतिचोदितत्वमभिधायतदुपपादनायानेकश्रुती
रुदाहृत्यचक्रधारणपरतयातद्घटकपदयोजनाप्रदर्शनप्र
करणेपवित्रश्रुतेरपितथाविधपदयोजनायांप्रस्फुटंप्रदर्श्य
मानायामपिवेदविहितत्वोक्तेःपवित्रश्रुतिविषयत्वाभाव
वर्णनस्यश्रद्धोत्पादनमात्रार्थार्थवादरूपतावर्णनस्यचबा
लिशभाषितमात्रत्वात्-अर्थवादरूपत्वेपि-असतिप्रस्फु
टबाधकेऽर्थवादानामपिप्रतीयमानार्थेप्रामाण्यस्यदुर्वार
तया-ग्रामेमनसास्वाध्यायमधीयीतेत्यादिवाक्यनिद
र्शनेनास्यवाक्यस्यस्वार्थेप्रामाण्यासम्भववर्णनायोगा
त्-तादृशवाक्यस्यापिप्रस्फुटश्रुत्यन्तरविरोधादर्शनेनप्र
तीयमानार्थेप्रमाणतायानिर्बाधत्वेनदृष्टान्तासामञ्जस्या

म्—प्रस्फुटार्थकबहुलश्रुत्यन्तरैककण्ठयेनदक्षिणेतुभुजइ
त्यादिमहोपनिषद्वचनस्यापिसर्वशाखाप्रत्ययन्यायसर्व
वेदान्तप्रत्ययन्यायाभ्यांतप्तचक्रादिधारणविधिपरतायाः
दुर्वारत्वात्—प्रत्यक्षमूलत्वेवान्यायमूलत्वेवा—चरणंपवि
त्रमित्याद्युदाहृतपाद्मपुराणवचनानांमहर्षिनिबद्धवेदो
पबृंहणरूपाणामसतिप्रबलप्रमाणान्तरविरोधेकेनापि
प्रकारेणाधुनिकैःप्रत्याख्यानायोगेनतदनुरोधेनार्थवर्णन
स्यापरिहार्यतयापवित्रश्रुतेरुपबृंहणायत्ततप्तचक्रधारण
विधिपरतायादुर्वारत्वाच्च ॥ १६५ ॥ इदंपुनरत्रावधे
यम्-महर्षयोहितपःप्रभावयोगमाहिमदेवताप्रसादविशे
षादिभिर्यथावस्थितंवेदानामर्थजातंस्वयमवबुध्यतस्यै
वान्येषामपिसुग्रहत्वायस्मृतीतिहासपुराणादीन्युपबृंह
णानिनिबध्नन्ति—१ अतीन्द्रियाणामप्यर्थानांतपःप्रभा
वादिजन्यंज्ञानंप्रत्यक्षरूपमपिसम्भवितुमर्हत्येव-२ अतो
मानान्तरानधिगतार्थप्रतिपादनपरविधिवाक्योपबृंहण
स्यापिप्रत्यक्षमूलकत्वसम्भवान्न्यायमूलकत्वमेवेतिनिर्ब
न्धोनिर्निबन्धनः-३ अतएव-वाल्मीकेर्वेदोपबृंहणभूतश्री
रामायणप्रणयनोपयोग्यतीन्द्रियातीतानागतादिसर्वार्था

गोचरज्ञानंचतुर्मुखवरप्रसादयोगमाहिमतपःप्रभावादिज
न्यंयथावस्थितंप्रत्यक्षरूपंचोत्पन्नमितिश्रीरामायणेप्र
तिपाद्यते-४ यथोक्तंतत्रबालकाण्डे-तमुवाचततोब्रह्मा
प्रहसन्मुनिपुङ्गवम् ॥ श्लोकएवत्वयाबद्धोनात्रकार्याविचा
रणा ॥ मच्छन्दादेवतेब्रह्मन्प्रवृत्तेयंसरस्वती ॥ रामस्यचरि
रितंसर्वंकुरुत्वमृषिसत्तम ॥ धर्मात्मनोगुणवतोलोकेरा
मस्यधीमतः ॥ वृत्तंकथयधीरस्ययथातेनारदाच्छुतम् ॥
रहस्यंचप्रकाशंचयद्वृत्तंतस्यधीमतः ॥ रामस्यसहसौमि
त्रेराक्षसानांचसर्वशः ॥ वैदेह्याश्चैवयद्वृत्तंप्रकाशंयदिवा
रहः ॥ तच्चाप्यविदितंसर्वंविदितंतेभविष्यति ॥ नतेवाग
नृताकाव्येकाचिदत्रभविष्यति ॥ कुरुरामकथांपुण्यां
श्लोकबद्धांमनोरमामितिद्वितीयसर्गे=श्रुत्वावस्तुसम
ग्रंतद्धर्मात्माधर्मसंहितम् ॥ व्यक्तमन्वेषतेभूयोयद्वृत्तंतस्य
धीमतः ॥ उपस्पृश्योदकंसम्यङ्मुनिःस्थित्वाकृताञ्जलिः
प्राचीनाग्रेषुदर्भेषुधर्मेणान्वेषतेगतिम् ॥ रामलक्ष्मणसी
ताभीराज्ञादशरथेनच ॥ सभार्येणसराष्ट्रेणयत्प्राप्तंतत्र
तत्त्वतः ॥ हसितंभाषितंचैवगतिर्यायच्चचेष्टितम् ॥ त
त्सर्वंधर्मवीर्येणयथावत्संप्रपश्यति ॥ स्त्रीतृतीयेनचत

दायत्प्राप्तंचरतावने ॥ सत्यसन्धेनरामेणतत्सर्वंचान्व
वेक्षितम् ॥ ततःपश्यतिधर्मात्मातत्सर्वंयोगमास्थितः ॥
पुरायत्तत्रनिर्वृत्तंपाणावामलकंयथा ॥ तत्सर्वंतत्त्वतोदृ
ष्ट्वाधर्मेणसमहाद्युतिः ॥ अभिरामस्यरामस्यचरितंकर्तु
मुद्यतइतितृतीयसर्गे–कुशीलवौतुधर्मज्ञौराजपुत्रौयश
स्विनौ ॥ भ्रातरौस्वरसम्पन्नौददर्शाश्रमवासिनौ ॥ सतु
मेधाविनौदृष्ट्वावेदेषुपरिनिष्ठितौ ॥ वेदोपबृंहणार्थाय
तावग्राहयतप्रभुरितिचतुर्थसर्गेच–५ अत्रहिश्रीरामाय
णप्रणयनहेतुभूतवाल्मीकिगतज्ञानस्यचतुर्मुखवरप्रसा
दतपःप्रभावयोगमाहिमादिजन्यत्वंप्रत्यक्षरूपत्वमती
न्द्रियातीतानागतादिसर्वपदार्थगोचरत्वंयथावस्थितत्वं
श्रीरामायणस्यवेदोपबृंहणरूपत्वंचस्पष्टमभिहितम्–६
श्रीविष्णुपुराणेप्युक्तम्–प्रथमाध्याये--पुलस्त्यउवाच–
वैरेमहतियद्वाक्याद्गुरोरद्याश्रिताक्षमा ॥ त्वयातस्मा
त्समस्तानिभवान्शास्त्राणिवेत्स्यति ॥ सन्ततेर्नममो
च्छेदःक्रुद्धेनापियतःकृतः ॥ त्वयातस्मान्महाभागददा
म्यन्यंमहावरम् ॥ पुराणसंहिताकर्ताभवान्वत्सभविष्य
ते ॥ देवतापारमार्थ्यंचयथावद्वेत्स्यतेभवान् ॥ प्रवृत्तेच

निवृत्तेचकर्मण्यस्तमलामतिः ॥ मत्प्रसादादसन्दिग्धा
तववत्सभविष्यति ॥ ततश्चप्राहभगवान्वासिष्ठोमेपिता
महः ॥ पुलस्त्येनयदुक्तंतेसर्वमेतद्भविष्यति ॥ इति
पूर्वंवासिष्ठेनपुलस्त्येनचधीमता।यदुक्तंतत्स्मृतिंयातित्व
त्प्रश्नादखिलम्मम । सोहंवदाम्यशेषंतेमैत्रेयपरिपृच्छ
ते । पुराणसंहितांसम्यक्तांनिबोधयथातथामिति–७अ
त्रापिपराशरस्ययथावस्थितदेवतापारमार्थ्यज्ञानंसर्व
शास्त्रार्थविज्ञानंविष्णुपुराणकरणोपयोगिविज्ञानंचपुल
स्त्यवसिष्ठवरप्रसादतोजातमित्युक्तम्–८ एवम्महाभार
तेआदिपर्वणि–प्रथमाध्यायेप्युक्तम्–पुण्येहिमवतःपा
देमध्येगिरिगुहालये । विशोध्यदेहंधर्मात्माधर्भसंस्तरमा
श्रितः । शुचिस्सनियमोव्यासश्शान्तात्मातपसिस्थि
तः । भारतस्येतिहासस्यधर्मेणान्वीक्ष्यतांगतिम् । प्र
विश्ययोगंज्ञानेनसोपश्यत्सर्वमन्ततः । निष्प्रभेस्मिन्नि
रालोकेसर्वतस्तमसावृतइत्यादि–९ अत्रभगवद्वादरा
यणगतंभारतप्रणयनमूलभूतंज्ञानमापितपःप्रभावयोगम
हिमजन्यप्रत्यक्षरूपमितिस्पष्टम्–१० तत्रैवशान्तिपर्व
णिमोक्षधर्मेषुश्रीनारायणीयोपाख्याने–पराशरसुतः

श्रीमान्व्यासोवाक्यमथाब्रवीत् । मयाहिसुमहत्तप्तंतपः परमदारुणम् । भूतंभव्यंभविष्यच्चजानीयामितिसत्त माः । तस्यमेतप्ततपसोनिगृहीतेन्द्रियस्यच । नारायण प्रसादेनक्षीरोदस्यानुकूलतः । त्रैकालिकमिदंज्ञानंप्रादु र्भूतंयथेप्सितम् । तच्छृणुध्वंयथाज्ञानंवक्ष्येसंशयमुत्तम म् । यथावृत्तंहिकल्पादौदृष्टम्मेज्ञानचक्षुषा । परमात्मे तियंप्राहुस्सांख्ययोगविदोजनाः । महापुरुषसञ्ज्ञांसल भतेस्वेनकर्मणेत्यादिसप्तमाध्यायउक्तम्--११ अत्रापि नारायणप्रसादतोजातं व्यासस्यातीन्द्रियातीतानाग-तादिसर्वार्थविषयकंज्ञानमितिस्पष्टमुक्तम् --१२ गीता यामपि-एकादशाध्याये-दिव्यंददामितेचक्षुः पश्यमेयो गमैश्वरमित्यादिना-भगवत्प्रसादजन्यमर्जुनस्यप्रत्यक्ष रूपमेवज्ञानमिति--अर्जुनस्साक्षाद्देवविश्वमपश्यदिति चस्पष्टमुक्तम्-१३ एवंशारीरकमीमांसायामपिद्वितीया ध्यायप्रथमपादउक्तम्--इतरेषांचानुपलब्धेरिति१४ अ त्रापिमन्वादिस्मर्तॄणांकापिलस्येववेदान्तार्थसाक्षात्का रादर्शनेनकापिलस्मृतिप्रतिपादितरीत्यानवेदान्तार्थो ग्राह्यइतिव्यासाबादरायणेनस्मृतिमूलभूतंमन्वादिगतं

ज्ञानंयोगादिजन्यप्रत्यक्षरूपमेवप्रतिपाद्यमानंदृश्यते—
१५ तथाचमहर्षीणांतपःप्रभावयोगमहिमदेवताप्रसा
दादिभिर्वेदोपबृंहणमूलभूतस्यातीन्द्रियार्थविषयस्यप्रत्य
क्षरूपस्यापिज्ञानस्यसम्भवावगमात्--मानान्तरानधिग
तार्थप्रतिपादनपराविधिवाक्योपबृंहणस्यापिप्रत्यक्षमूल
कत्वंसम्भवत्येवेतितत्प्रामाण्यंदुरपह्नवमेव १६ किंच--
न्यायमूलत्वेपिमहर्षिनिबद्धवेदोपबृंहणानांनाधुनिकैः
केवलयुक्तितःप्रत्याख्यानंसम्भवदुक्तिकम्--न्यायाधी
नस्यापिमहर्षिगतवेदोपबृंहणमूलभूतज्ञानस्यतपःप्रभा
वादिसहकारेणोत्पन्नस्ययथावस्थितत्वसम्भवात् अन्ये
षांतथाविधज्ञानस्यतादृशसहकारविरहेणायथावस्थित
त्वसम्भावनायादुर्वारत्वाच्च--। १७ नचैवंतर्हिमहर्षी
णामेवस्मृतिषुपरस्परविरोधएकतरप्रत्याख्यानंचकथंस
म्भवतइतिवाच्यम्-तपःप्रभावादितारतम्येनज्ञानतार
तम्यस्यमहर्षिष्वपिसम्भवेनतदुपपत्तेः। १८ पवित्रश्रुते
स्सुदर्शनपरत्वौपयिकास्मदुक्तन्यायस्याविचाल्यतासुद
र्शनान्यपरत्वौपयिकप्रतिपक्षन्यायस्यातिशिथिलतापि
चप्रागेवोपपादिता—१९ तस्मात्प्रत्यक्षमूलत्वेन्यायमूल

त्वेवामहर्षिनिबद्धवेदोपबृंहणानामाधुनिकैः कथंचिद
पिप्रत्याख्यानासम्भवेन दर्शितपाद्मपुराणोपबृंहणायत्तं
पवित्रश्रुतेस्सुदर्शनधारणाविधिपरत्वंनकथंचिदपिप्रत्या
ख्यातुंशक्यमितिसिद्धंभवतीति ॥ १६६ ॥ नचैवं
विधिवाक्यप्रतिपाद्यार्थस्यापिप्रत्यक्षादिप्रमाणान्तरवे
द्यत्वेविधिवाक्यानाम्मानान्तरानधिगतार्थप्रतिपादक
त्वाभावेनापूर्वार्थप्रतिपादकत्वलक्षणंविधायकत्वमेवभ
ज्येतेतिवाच्यम्--यदायेनयोर्थोमानान्तरादनधिगतः
तदातंप्रतितादृशार्थप्रतिपादकत्वस्यसर्वत्रविधिवाक्ये
ष्वव्याहतत्वात्--एकस्यैवाग्निहोत्रादिविधेयस्यनानाशा
खागतविधिवाक्यवेद्यत्वदर्शनेनसामान्यतोमानान्त
रानधिगतार्थप्रतिपादकत्वस्यस्वाभिन्नप्रमाणजन्यधी-
विषयत्वसामान्याभाववदर्थप्रतिपादकत्वलक्षणस्यकु
त्राप्यसम्भवाच्च ॥ १६७ ॥ एवमुपबृंहणानांसर्वप्रका
रेणवेदार्थप्रतिपत्त्यनुपकारकत्वेशारीरकमीमांसायांना
नासूत्रेषुविप्रतिपन्नातीन्द्रियवेदार्थव्यवस्थापकतयाभ
गवताबादरायणेनस्मृत्याद्युदाहरणंपूर्वतन्त्रेप्रमाणलक्ष
णेवेदोपबृंहणस्मृतीतिहासपुराणादीनांप्रतिपादनंचानि

रर्थकमेवस्यादितिस्वारसिकानुकूलप्रमाणभूतस्मृतिपु
राणाद्युपबृंहणानुरोधेनवेदार्थानङ्गीकरणंदुराग्रहमूलमे
वेतिसुधियांसुगमम् ॥ १६८ ॥ यदप्युक्तमर्वाची
नभास्करेण--स्मृतिपुराणतन्त्रादिषुयानितापरूपकर्मा
ण्युपदिष्टानि-१ तद्विषयतयैवायम्मन्त्रोयोजनीयस्स्या
त्-२सन्तिहिबहवस्तापाः-३ग्रीष्मेपञ्चाग्निमध्यस्थस्सू
र्याभिमुखमासीतइत्यादिस्मृतिप्रतिपन्नवैखानसधर्म
भूतपञ्चाग्निसूर्यादितापः-४ तथायोगशास्त्रविहितप्रा
णायामसंक्षुभितजाठराग्निसन्तापः-५ सुरापानमरणा
न्तिकप्रायश्चित्तभूततप्तसुरागोमूत्रादिपानसंपादितसक
लदेहसन्तापः-६ मृतशरीरसंस्कारात्मकाश्चिताग्निदाहः
-७ अग्निवैद्यमतःपरमित्यादिवैद्यशास्त्रप्रतिपन्नसन्निपा
तादिरोगनिवर्तकाग्निवैद्यदाहः-८ श्रोत्रियस्यपारलौकि
कज्ञानवतस्संपातायातपापानुष्ठानसंपन्नपश्चात्तापः -९
ब्रह्महत्यादिमहापातकिनांदेशान्तरगमनेपितत्कृतपाप
परिज्ञानार्थतप्तकबन्धभगमुद्रादितापश्च-१० सम्भाव्य
तेचतेषांसर्वेषांतापानांतप्तपदेनप्रत्यायनम्-११ युज्यते
चपवित्रमंत्रोत्तरार्धगततत्पदद्वयेनयोग्यताबलेनबुद्धि

मागतस्यतत्तत्तापविशेषसाध्यफलस्यपरामर्शः--१२ प
वित्रशब्दश्च--पूतंपवित्रम्मेध्यञ्चेत्यमरकोशाभिधानात्-
अग्निःपवित्रम्--समापुनात्वित्यादिवैदिकप्रयोगाच्च--अ
ग्न्यादिस्वरूपरश्मिजालादिपराभावितुमर्हति--१३ ब्रह्म
णस्पतिशब्देनचाग्न्यादिसम्बोधनंकर्तुंशक्यम्-१४ अ
ग्न्यादीनांतत्तदवयवाभिमानिदेवतात्वेन --गात्राणिपर्ये
षीतिगात्रव्याप्तिवचनमप्युपपद्यते--१५ तथाच--हेब्रह्म
णस्पते--अग्ने--ते--पवित्रम्--मेध्यम्--यत्स्वरूपम्-रश्मि
जालंवा--तेन--अतप्ततनूः--तत्तदुचितफलम्नाश्नुते--इ
त्यादियोजनाभेदायथासम्भवमूहनीयाइति॥ १६१॥
तदप्यसत्-ब्रह्मणस्पतिशब्दस्याग्न्यादिपरतायाश्शक्त्या
दिभिस्स्वरसतोऽसम्भवात्--पवित्रशब्दस्यदेवतास्वरूपप
रत्वेतइतिषष्ठ्याअभेदार्थकतायाअस्वारसिकत्वात्-वि
शेष्यवाचकपदान्तरनिरपेक्षंस्वयमेवविशेष्यवाचकपद
त्वेनस्फुटंप्रतीयमानस्यात्रत्यपवित्रशब्दस्यस्वरूपरश्मि
जालादिविशेष्यवाचकपदान्तराध्याहारेणान्वयस्याति
क्लिष्टत्वात्--प्रभुशब्दस्वरसप्रातिपन्नसर्वनियन्तृत्वस्या
ग्न्यादिषुबाधात्-अग्न्यादिष्वेकैकस्यैकैकावयवप्रवेशस्य

प्रामाणिकत्वेपिविश्वशब्दपर्युपसर्गबलेन--गात्राणिपर्यै
षिविश्वतइत्यनेनस्वरसतःप्रत्याय्यमानायाःप्रतियोगिवै
यधिकरण्याघटितव्यापकतायाःपरिपूर्णविश्वगात्रव्या
प्तिरूपायाअग्न्यादिष्वेकैकस्मिन्सर्वथैवासम्भवात्--त
त्पदद्वयस्यप्रकरणानुपस्थिततत्तत्तापफलबोधकतास्वी
कारस्याक्लिष्टत्वात्--बहन्तइत्यस्यास्वारसिकत्वाच्चोक्तयो
जनानांदुराग्रहविधुरव्युत्पन्नमात्रधीगोचरत्वासम्भवा
च्च ॥ १७० ॥ पवित्रमन्त्रस्यासम्बद्धप्रकरणाद्यनुप
लब्धातिविप्रकृष्टनानाविधतापपरत्वसम्भवंवदतः--बहु
प्रमाणसिद्धसौदर्शनतापपरत्वमेकंपरमपवदतोऽस्यदुरा
ग्रहोहिसुमन्दधियामपिसुग्रहः ॥१७१॥ किंबहुना-१
पवित्रशब्दस्यवेदनिघण्टुव्याकरणनिर्वचनादिभिस्सुदर्श
नसंज्ञारूपतायाःप्रागुपपादितत्वात्--पवित्रमित्याग्नेरि
त्यादिश्रुत्यातदनुयायिपञ्चरात्रस्मृतिपुराणादिभिश्चयो
जनाप्रदर्शनपूर्वकंप्रस्फुटमेवमन्त्रशरीरस्यव्याख्याततता
याःप्रागुपपादितत्वाच्चतद्विरोधेनस्वेच्छयापवित्रमन्त्र
स्यार्थान्तरकल्पनंनकथंचिदपिसम्भवति-२ नखल्वेते
ननिगूहितमप्यस्यमन्त्रस्यपरस्सहस्रप्रमाणगणसिद्धं

सुदर्शनपरत्वमनभिव्यक्तंभवति--३ यथानिमीलितलोच
नेष्वपिघूकेषुसहस्रभानुर्नास्तमितोभवतीतिसुधीभिरव
धेयम् ॥ १७२ ॥ यदप्याहार्वाचीनभास्करः--पवि
त्रशब्दस्यव्याकरणबलात्सुदर्शनेशक्तिर्नसिध्यति--१ प्र
त्युतान्यत्रैवशक्तिःसिध्यति--पुवस्सञ्ज्ञायाम्---३---२
--१८५ ॥ कर्तरिचर्षिदेवतयोः--३--२ १८६ ॥ इ
तिसूत्रद्वयविवरणदशायांवृत्तिकारप्रदर्शितोदाहरणेनद
र्भाग्न्यादिष्वेवपवित्रशब्दस्यशक्तिसिद्धेः--२ यथोक्तंवृ
त्तिग्रन्थे--पुवस्सञ्ज्ञायाम्--पुवइतिपूङ्पूञोस्सामान्येन
ग्रहणम्--पवतेर्धातोःकरणेकारकेइत्रप्रत्ययोभवतिसमु
दायेनचेत्सञ्ज्ञागम्यते--दर्भःपवित्रम्--बर्हिष्पवित्रम्=
कर्तरिचर्षिदेवतयोः--पुवइतिवर्तते--पुवःकरणेकर्तरिचेत्र
प्रत्ययोभवति--ऋषिदेवतयोर्यथासङ्ख्यंसम्बन्धः--ऋ
षौकरणेदेवतायांकर्तरि--पूयतेऽनेनेतिपवित्रोयमृषिः--
देवतायाम्--अग्निःपवित्रंसमापुनातु--वायुस्सोमस्सूर्य
इन्द्रःपवित्रंतेमापुनन्त्विति--३ अत्रहिदेवताविषयशक्ति
रग्निवायुसोमसूर्येन्द्रविषयैवदर्शिता--४ नसुदर्शनविषया
पि--५ किञ्च--देवतायामेवकर्तरीत्रप्रत्ययोभवतिनमनु

ष्यादिष्वितिनियमार्थत्वात्सूत्रस्य--नाग्निसोमादिष्वपि पवित्रशब्दस्यतत्तद्विशेषरूपेणवासामान्यरूपेणवाशक्ति रितिकुतस्तावद्देवताविशेषेसुदर्शने--पवित्रशब्दस्यश क्तिसिद्धिः--६ वस्तुतःपवित्रशब्दस्यदेवतासामान्येश क्त्याश्रयणेपिसुदर्शनत्वेनरूपेणसुदर्शनेविशिष्यशक्ति ग्राहकप्रमाणाभावेनसुदर्शनवाचित्वकल्पनमयुक्तमि ति ॥ १७३ ॥ तदयुक्तम्--उपस्थितकतिपयोदा हरणप्रदर्शनमात्रेणोदाहरणान्तरासद्भावनिर्णयायोगा त्--देवतातदितरसाधारण्येनपुवःकर्तरीत्रप्रत्ययस्यसूत्रा न्तरेणाप्राप्ततया---कर्तरिचर्षिदेवतयोरितिसूत्रस्यानिय मार्थतास्वीकारायोगेनतद्विधायकतायाअवर्जनीयतया पवित्रशब्दस्यदेवताशक्तिपरतायादुर्वारत्वात्--सामान्य रूपेणविशेषरूपेणवाऋषिदेवताविषयशक्तिव्यवस्थाप नस्याविवक्षितत्वेसूत्रेऋषिदेवतयोरितिनिर्देशस्यनिरर्थ कत्वापाताच्च ॥ १७४ ॥ अत्रेदमवधेयम्--अग्निः पवित्रमित्यादावाग्निवाय्वादिपदसमभिव्याहृतपवित्रश ब्दस्यनाग्नित्ववायुत्वाद्यवच्छिन्नपरत्वंवक्तुंशक्यम्--त थासति-घटःकलशइतिपर्यायपदद्वयसमभिव्याहारस्ये

व--अग्निःपवित्रमित्यादिपदसमभिव्याहाराणामपिनि
राकाङ्क्षत्वेनबोधाजनकत्वप्रसङ्गात्--१ कोशव्याख्याना
दिगतनानापर्यायपदसमभिव्याहारस्थलेपूद्देश्यवाचकप
र्यायपदस्यतत्तच्छब्दपरतायाःविधेयवाचकपर्यायपदस्य
तत्तदर्थवाचकपरतायाश्चस्वीकारवदत्रापिपवित्रपदस्यश
ब्दपरतायाः--अग्न्यादिपदस्याग्न्यादिवाचकत्वावच्छिन्न
परतायाश्चस्वीकारोपिनसाधुः--तथासतिस्वरसतःप्रती
यमानस्याग्न्यादिशब्दपवित्रशब्दयोरुद्देश्यविधेयवाच
कभावस्यनिष्कारणमन्यथाकर्तव्यत्वप्रसङ्गात्--तथाकर
णेनपवित्रशब्दस्यकथञ्चिदग्नित्वाद्यवच्छिन्नेशक्तिप्रति
पादनपरत्वसम्भवेपि--अग्निः पवित्रमित्यादीनाम्--स
मापुनात्वित्याद्युत्तरवाक्यार्थोपष्टम्भकतायाःप्रतीयमा
नायाअनिर्वाहात्--अग्न्यादीनांशुद्धिकर्तृत्वादिप्रतिपा
दनेसत्येवतन्निर्वाहसम्भवात्-प्रत्युत--पवित्रशब्दस्योद्दे
श्यवाचकत्वे--समापुनात्वित्यत्रतच्छब्देनतस्यैवपराम
र्शनीयतयावाक्यार्थान्वयबाधप्रसङ्गाच्च--२तस्माच्छुद्धि
करंवस्त्वित्येतावन्मात्रपरत्वंतत्रपवित्रशब्दस्यवक्तव्यम्
--३ सामान्यतोवस्तुत्वविवक्षयैवचनपुंसकलिङ्गत्वमपि

साधुसङ्गच्छते-४इत्थंच-अग्निःपवित्रंसमापुनात्वित्यादी
नांपवित्रशब्दस्याग्नित्वाद्यवच्छिन्नेशक्तिग्राहकत्वाभावे
नतदुपष्टम्भैकबलेनाग्न्यादिपरतांपवित्रशब्दस्यस्वीकृ
त्य-कर्तरिचर्षिदेवतयोरितिसूत्रविषयतयातदुदाहरणंनै
वसङ्गतम्-५परन्तु-प्राक्तृतीयपरिच्छेदाष्टमादिवाक्यो
दाहृतश्रुतिवेदनिघण्ट्वादिप्रमाणगणैस्सुदर्शनसञ्ज्ञात्वे
नप्रतिपन्नःपवित्रशब्दोऽत्रसूत्रविषयतयोदाहर्तुंयोग्यः-६
पुवस्सञ्ज्ञायाम्--३-२-१८५कर्तरिचर्षिदेवतयोः-३-२-
१८६--इतिसूत्रद्वयस्यविवरणंतावदित्थमवगन्तव्यम्--
सामान्यतस्सञ्ज्ञायांपवतेर्धातोः करणेइत्रप्रत्ययस्स्या
त्-ऋषिदेवतयोस्सञ्ज्ञायांतुपवतेर्धातोः करणेकर्तरिचे-
त्रप्रत्ययस्स्यादिति-७इहऋषिशब्दस्यवेदमन्त्रपरत्वमा
श्रित्य-ऋषौकरणेदेवतायांकर्तरीतियथासङ्ख्यंव्याख्या
नंचायुक्तम्-तथासति-करणविषयेत्रप्रत्ययान्तऋषिविष
यपवित्रशब्दस्य-पुवस्सञ्ज्ञायामितिपूर्वसूत्रेणैवानिर्वाहे
ण-कर्तरिचर्षिदेवतयोरितिसूत्रेचकारऋषिशब्दग्रहणवै
यर्थ्यात्-कर्तरिदेवतायामित्येवतत्सूत्रप्रणयनसम्भवात्-
चेतनवाचिदेवताशब्दसहचारितऋषिशब्दस्यचेतनरूप

ऋषिविषयतायाएवन्याय्यत्वाच्च-८नचपूर्वंसूत्रंसञ्ज्ञावि
षयम्--उत्तरसूत्रन्तुसञ्ज्ञार्थम्--अतएव-सञ्ज्ञायामिति
नानुवर्त्यतउत्तरसूत्रइतिवाच्यम्--प्रतिरोधकाभावेनपूर्व
सूत्रतउत्तरसूत्रे--सञ्ज्ञायामित्यनुवृत्तेर्दुर्निरोधत्वात्--प्र
त्युत--ऋषिदेवतयोरितिनिर्देशेनव्यवस्थितविषयताया
एवोत्तरसूत्रस्यापिदर्शनेनसञ्ज्ञाविषयत्वस्यदुरपह्नवत्वा
त्--अन्यथा--ऋषिदेवतयोरितिनिर्देशस्यैवानावश्यकत्वा
च्च--९ विषयविशेषप्रतिनियतशक्तिकत्वमेवहिशब्दा
नांसञ्ज्ञात्वंनाम--१० नच--देवतावृत्तिर्वाऋषिवृत्ति
र्वाकश्चिदसाधारणधर्मोनपवित्रशब्दशक्यतावच्छेदकत
यासूत्रविवक्षितः--येनसञ्ज्ञात्वमवर्जनीयमापतेत्--अ
पितु--वस्तुतऋषिदेवतानिष्ठशुद्धिकरणत्वकर्तृत्वएवसा
मान्यरूपेणतत्प्रतिपाद्यतावच्छेदकतयासूत्रविवक्षिते--
तावन्मात्रबोधनार्थैवच-ऋषिदेवतयोरित्युक्तम्-इत्थंच-
अग्निःपवित्रमित्यादौपवित्रशब्दस्यशुद्धिकर्तृमात्रपरत
या-अग्न्यादिशुद्धिकर्तृत्वेवमादेरवबोधस्यजननेपिविशे
ष्यभूताग्न्यादिदेवतासम्बन्धियकर्तृत्वस्यैवबोध्यमानत
यातादृशप्रयोगघटकपवित्रशब्दस्योक्तसूत्रोदाहरणतास

द्गच्छते-देवताभिन्नविषयेतुकर्तृविषयेत्रप्रत्ययान्तपवित्र शब्दस्येदृशप्रयोगोनसम्भवतीत्येतावदेवसूत्राभिप्रेतम् अतोनदेवतासामान्येवादेवताविशेषेवापवित्रशब्दशक्ति व्यवस्थापनंसूत्राभिप्रेतमितिसुदर्शनेपिनानेनशक्तिस्सिध्यती तिवाच्यम्--सञ्ज्ञायामित्यननुवर्तनेपि-ऋषिदेवतयो र्वाच्ययोःपुवःकरणेकर्तरिचेत्रप्रत्ययस्स्यादित्येवस्वरसत स्सूत्रार्थसम्भवेन--ऋषिदेवतारूपविशेष्यवाचकपदान्त रसमभिव्याहारइत्यर्थस्यकथंचिदपिशब्देनालाभात्-- प्रत्युतप्रातिनियतविषयविशेषनिर्देशस्यसूत्रेषुसर्वत्ररूढि ग्राहकतायाएवदर्शनेनेहापि-ऋषिदेवतयोरित्यस्यरूढि ग्राहकतायाअवर्जनीयत्वात्--रूढिग्राहकत्वेचशब्दस्यस ञ्ज्ञारूपतायादुर्वारतयापूर्वसूत्रात्स्वरसतःप्रसक्तायाः-- सञ्ज्ञायामित्येतदनुवृत्तेर्दुर्निरोधत्वेनपवित्रशब्दस्यसुद र्शनाख्यदेवताविशेषशक्तेरुक्तसूत्राभिप्रेतायाःकथञ्चिद प्यपह्नवायोगाच्च--११ प्रमदसम्मदौहर्षे=३--३--६८= नौवृधान्ये=३--३--४८=अवेग्रहोवर्षप्रतिबन्धे--३--३- ५१=परौभुवोऽवज्ञाने--३--३--५५-प्रभौपरिवृढः-७--२ २१-हलसूकरयोःपुवः-३-२-१८३=एवमादिषुसूत्रेषुसर्व

शब्दादिविशेषग्राहकत्वमेवाहिप्रतिनियताविषयविशेषनिर्दे
शस्यपश्यामः–१२ किंच–कर्तरिचर्षिदेवतयोरित्यनुशा
सनेनपवित्रशब्दस्यकथम्भूताशक्तिपरिच्छित्तिर्जायतइ
तिपृच्छामः-१३ऋषिदेवतयोर्वाच्ययोः-यथासङ्ख्यंतद
न्वाधिकरणकर्तृवाचकःपवित्रशब्दघटकःपवतेरित्रप्रत्ययइ
त्येवमितिचेत्–१४ किंतत्रऋषिदेवतयोर्वाच्यत्वंसमभि
व्याहृतपदान्तरेणाविवक्षितम्–आहोस्वित्–पवित्रशब्दे
नैवसमुदायशक्त्येतिविवेचनीयम्–१५ तत्रनाद्यःकल्प
स्सम्भवति--सूत्रान्तरेष्विवात्रापिविवक्षितार्थविशेषस्य
प्रकृतपदबोध्यतयाविवक्षितत्वस्यैवस्वरसतोलाभेनाप्र
कृतपदान्तरबोध्यतयाविवक्षितत्वालाभात्--निष्कारणं
स्वरसतोलभ्यमानार्थप्रहाणायोगात्--श्रुतिस्मृतिषुस्व
र्थंप्रधानतयाबहुलंप्रयुज्यमानस्यकेवलस्यऋषिदेवता
विषयस्यपवित्रशब्दस्याबोधकत्वप्रसङ्गाच्च–१६ द्वितीय
कल्पेतुऋषिदेवतयोस्स्वासाधारणधर्मपुरस्कारेणैवसमु
दायशक्त्यापवित्रशब्दवाच्यतयापवित्रशब्दस्याविषयावि
शेषप्रतिनियतशक्तिकत्वरूपसञ्ज्ञात्वानपायेनास्मदपे
क्षितार्थसिद्धिर्निष्प्रत्यूहैव–१७ नचऋषिदेवतयोर्नस्वा

साधारणधर्मपुरस्कारेणपवित्रशब्दवाच्यत्वमिहाविवक्षि
तम्--अपितुप्रत्ययोपस्थाप्यकरणत्वकर्तृत्वरूपसाधार
णधर्मपुरस्कारेणैवेतिवाच्यम्--शब्दस्यसाधारणधर्मा
त्रावच्छिन्नोपस्थापकत्वेविषयाविशेषव्यवस्थितेर्दुस्सम्पा
दत्वात्--अन्यथापङ्कजादिपदानामपितथात्वस्वीकारस
म्भवेनयोगरूढमात्रविलयप्रसङ्गाच्च ऋषिदेवतारूपविष
यविशेषव्यवस्थित्यर्थंपवित्रशब्दस्यासाधारणधर्माव
च्छिन्नोपस्थापकताया आवश्यकत्वात्---असाधारणध
र्मावच्छिन्नोपस्थापकत्वमन्तरेणैवविषयविशेषव्यवस्थि
तेस्सम्पादनीयत्वेतुविशेष्यवाचकपदान्तरसमभिव्या
हारापेक्षाया अवर्जनीयत्वात्--तदपेक्षायांचप्रथमकल्प
एवपर्यवसानेनतत्रोक्तदोषाणांदुरुद्धरत्वात्--विषयविशे
षानिर्देशस्थलेप्रकृतपदस्यैवानिर्दिष्टविषयविशेषवृत्त्यसा
धारणधर्मावच्छिन्नोपस्थापकतायाःसूत्रान्तरस्वारस्या
नुरोधेनेहापिस्वरसतःप्राप्ताया अकारणमपह्नवायोगाच्च
-१८ नचैवमपिपवित्रशब्दस्यऋषित्वदेवतात्वरूपसामा
न्यधर्मावच्छिन्नेसमुदायशक्तेरुक्तसूत्रतस्सिद्धावपिसुदर्श
नत्वावच्छिन्नेसमुदायशक्तिर्नानेनासिध्यतीतिवाच्यम्--

यथोक्तरीत्याप्रतिनियतविषयविशेषव्यवस्थितशक्तिक
स्यपवित्रशब्दस्यसञ्ज्ञारूपत्वसिद्धौपूर्वसूत्रात्प्रसज्यमा
नायाः--सञ्ज्ञायामित्यनुवृत्तेर्दुर्निरोधतया--ऋषिदेवत
योस्सञ्ज्ञायामित्यनेनसुदर्शनत्वरूपविशेषधर्मावच्छि
न्नविषयसञ्ज्ञायास्सुसङ्ग्रहत्वात्--सञ्ज्ञाशब्दस्ययावद्धा
र्मसामान्यधर्मावच्छिन्नापेक्षयाविशेषधर्मावच्छिन्नएवप
क्षपाताधिक्येनविशेषतस्तादृशसञ्ज्ञायाएवोपस्थापक
त्वाच्च--१९ अपिच--इदंसूत्रम्--अमुकधर्मावच्छिन्नेऽस्य
समुदायशक्तिरितिपवित्रशब्दस्यप्रतिनियतयत्किञ्चिद्वि
शेषाकारेणऋषिदेवतासञ्ज्ञारूपत्वंप्रतिपादयितुंनप्रवृत्त
म्--२० अपितु--ऋषिदेवताविषयेसामान्यतस्सञ्ज्ञारू
पत्वज्ञापनपूर्वकंतादृशंसञ्ज्ञारूपतापन्नपवित्रशब्दघटक
स्येत्रप्रत्ययस्यार्थविशेषपरंविशेषाकारेणशक्तिंप्रतिपादयि
तुंप्रवृत्तम्--२१तथाच--यद्धर्मावच्छिन्नविषयऋषिदेवता
सञ्ज्ञारूपत्वंप्रमाणान्तरासिद्धम्--तद्धर्मावच्छिन्नविषय
ऋषिदेवतासञ्ज्ञापरएवात्रत्यसञ्ज्ञाशब्दोभवितुमर्हती
तिप्रागुदाहृतप्रमाणगणोपपादितसुदर्शनत्वावच्छिन्नवि
षयसञ्ज्ञापरत्वमस्यदुरपह्नवमेव-२२इत्थंपुवस्सञ्ज्ञाया

मितिपूर्वसूत्रात्--कर्तरिचर्षिदेवतयोरित्युत्तरसूत्रेसञ्ज्ञा
यामित्यनुवृत्तेरवश्यंभावेन-ऋषौकरणेदेवतायांकर्तरीति
यथासङ्ख्यंसम्बन्धइतिकाशिकाकारव्याख्यानमनुप
पन्नमेव--तथासतिपूर्वोक्तरीत्यापूर्वसूत्रेणैवचारितार्थ्यं
सम्भवेनोत्तरसूत्रेचकारऋषिशब्दयोर्वैयर्थ्यप्रसङ्गस्यदु
र्वारत्वात्--२३ततश्चेत्रप्रत्ययप्रतिपाद्ययोःकर्तृकरणरूपा
र्थयोर्यथासम्भवमृषिदेवतयोस्समावेशएवसूत्राभिप्रेतोन
यथासङ्ख्यंसम्बन्धइतिसिद्धम्भवति-२४ अतएव-कर्त
रिकृत्-३-४-६७--इतिसूत्रभाष्ये--ऋषिदेवतयोस्तुकञ्चि
त्समावेशवचनंज्ञापकमसमावेशस्येतिवार्तिकमुपादाय-
यदयंकर्तरिचर्षिदेवतयोरितिसिद्धेसतिसमावेशार्थंचका
रंशास्ति--तज्ज्ञापयत्याचार्यः-नभवतिसमावेशइतिव्या
कुर्वताभाष्यकारेण--कर्तरिचर्षिदेवतयोरितिसूत्रस्यऋ
षिदेवताविषयपवित्रशब्दघटकेत्रप्रत्ययेकर्तृकरणरूपार्थ
द्वयसमावेशपरत्वमेवभाषितम्--२५ कैयटग्रन्थेप्युक्तम्
अत्रचयथासङ्ख्यंवार्तिककारस्यानभिमतम्--यथास
ङ्ख्येहिचशब्दस्यज्ञापकत्वंनस्यात्समावेशाभावादिति-
२६ भाष्यकारेणान्यादृशस्यानिजाशयस्यकाप्यप्रदर्शना

र्वार्त्तिककाराशयएवभाष्यकाराशयइत्यपिसिद्धंभवति-
२७तदेतत्सर्वमालोच्यैवतत्त्वबोधिनीकारोपि--कर्त्तरिच
र्षिदेवतयोरितिसूत्रस्यकौमुदीकारेणकाशिकामनुसृत्यय
थासङ्ख्यान्वयेनव्याख्यानेपिस्वयंसमावेशाभिप्रायेणै
व--कर्त्तरिकरणेचेत्यर्थइतिव्याख्यानंकृत्वा--काशिकानु
सारेणयथासङ्ख्यंव्याचष्टे--ऋषौकरणइति--कर्त्तरिक
दितिसूत्रभाष्यकैयटयोस्तुयथासङ्ख्यंनेतिगम्यतइति
शब्दकौस्तुभेस्थितामितिवदन्--कौमुदीकारस्यापिभाष्य
कैयटाभिमतसमावेशपक्षएवनैर्भर्ययथासङ्ख्यपक्षेतद
भावंचव्यवृणोत्- २८ उदाहृतवार्त्तिकभाष्याद्यनुरोधेन
सूत्रस्यकर्तृकरणरूपार्थद्वयसमावेशपरतायाआवश्यक
तयातदनुरोधेनापिदेवताशब्दसहचरितऋषिशब्दस्यचे
तनविषयत्वमेवोचितम्--नाचेतनविषयत्वम्--अचेतन
स्यकरणतायास्स्वरसप्राप्तत्वेपिकर्तृतायाअतथात्वात्--
चेतनस्यतुयथार्हमुभयोस्सम्भवाच्च-२९ इत्थंच-पुंवरस
ञ्ज्ञायामितिपूर्वसूत्रम्सामान्यतऋषिदेवतेतरविषयेस
ञ्ज्ञायांपवतेरित्रप्रत्ययंकरणवाचिनमनुशास्ति--१कर्त्त
रिचर्षिदेवतयोरित्युत्तरसूत्रम्--सामान्येनऋषिदेवतावि

षयेसञ्ज्ञायांप्रवर्तेःकर्तृकरणवाचिनंतमनुशास्ति--२ अ
तःप्रथमसूत्रस्यऋषिदेवतेतद्विषयसञ्ज्ञारूपपवित्रशब्दा
स्सर्वएवोदाहरणंभवन्ति--३ द्वितीयसूत्रस्यऋषिदेवताावि
षयसञ्ज्ञारूपपवित्रशब्दास्सर्वएवोदाहरणंभवन्ति--४
ततश्चप्रथमसूत्रेणचक्राख्यभगवद्दिव्यायुधविशेषेपवित्र
शब्दस्यकरणविषयसञ्ज्ञारूपतानिर्व्यूढाभवति--तत्रा
पितच्छब्दस्यबहुलंप्रयोगदर्शनेनतत्सञ्ज्ञारूपतायाः--
उक्तसूत्रविषयतायाश्चदुरपह्नवत्वात्--५द्वितीयसूत्रेणता
दृशदिव्यायुधाभिमानिदेवताविशेषेपवित्रशब्दस्यकर्तृ
करणविषयसञ्ज्ञारूपताचनिर्व्यूढाभवति--कर्तृत्वकरण
त्वयोरुभयोर्देवतायांसम्भवात्---उक्तदेवताविशेषेपित
च्छब्दस्यबृहद्ब्रह्मसंहिताद्वितीयाध्याये—त्वामाहप्रथमा
वाणीममपाणिविभूषणम् । पवित्रंचरणंनेमिंलोकद्वार
म्महौजसमितिसुदर्शनंप्रतिभगवदुक्त्यादिलक्षणप्रमा
णप्रसिद्ध्याद्यनुरोधेनसञ्ज्ञारूपतायाः-उक्तसूत्रविषयता
याश्चदुर्वारत्वाच्च—६ एवंद्वितीयसूत्रस्यऋषिविषयमुदाहर
णंचक्राङ्कितऋषिविषयपवित्रशब्दोभवितुमर्हति—चेतन
रूपऋषौयथाहँकर्तृत्वकरणत्वयोरुभयोस्सम्भवात्--च

ऋाङ्कितऋषिविषयेतच्छन्दस्यसञ्ज्ञारूपतायाःप्रागुपपा
दितत्वाच्च—७ अतएवचयजुरारण्यकप्रथमप्रपाठकदश
मानुवाकान्ते—अथपवित्राङ्गिरसइतिमन्त्राविशेषद्रष्टृम
हर्षेराङ्गिरोविशेषस्यपवित्रसञ्ज्ञयानिर्देशस्सङ्गच्छते—८
स्वीक्रियतेच—मन्त्ररूपऋषिविषयसञ्ज्ञारूपतापिपवि
त्रशब्दस्य—प्रथमसूत्रेणतत्सिद्धेः—९ अतएवच—विष्णु
स्मृतौषट्पञ्चाशाध्याये—अथातस्सर्ववेदपवित्राणिभव
न्ति—येषांजपैश्चहोमैश्चद्विजातयःपापेभ्यःपूयन्तइति—
चतुष्षष्टितमाध्याये—स्नातश्चपवित्राणियथाशक्तिजपे
दितिचप्रयोगात्शंखधर्मशास्त्रेनवमाध्याये—ततोजपे
त्पवित्राणिपवित्रांवाथशक्तितइति—दशमाध्याये—सर्व
वेदपवित्राणिसम्प्रवक्ष्याम्यतःपरम्—येषांजपैश्चहोमैश्चपू
यन्तेमानवास्सदेतिचप्रयोगाच्चपवित्रशब्दस्यशुद्धिकर
णमन्त्रत्वावच्छिन्नेशक्तेर्दुर्वारत्वेपिनक्षतिः—१० एवमन्य
त्रापिप्रयोगस्यानन्यथासिद्धत्वेप्रथमसूत्रानुरोधिनीद्विती
यसूत्रानुरोधिनीवाक्काचित्पवित्रसञ्ज्ञासिध्यतुकामम्—
११ तावतानास्माकंकाचिदस्तिक्षतिः—पवित्रशब्दस्यसु
दर्शनविषयसञ्ज्ञारूपतायाःपवित्रमन्त्रस्यसुदर्शनपरत्व

स्यैवमुख्यतायाश्चानिर्बाधत्वादित्यवधेयम्--३० नच--प
वित्रशब्दस्यसुदर्शनत्वावच्छिन्नेसमुदायशक्तिस्वीकारे--
अग्निःपवित्रम्--समापुनातु-वायुस्सोमस्सूर्यइन्द्रःपवित्र
म्--तेमापुनन्तु--इत्यादावग्न्यादिदेवताविषयपवित्रशब्द
प्रयोगोनोपपद्यते--देवतात्वरूपसामान्यधर्मावच्छिन्नेस
मुदायशक्तिस्वीकारेतुतदुपपत्तिस्सम्भवति--सम्भवतिच
सुदर्शनविषयप्रयोगस्याप्युपपत्तिः--देवतात्वरूपसामा
न्यधर्मावच्छिन्नेसुदर्शनत्वरूपविशेषधर्मावच्छिन्नेचस
मुदायशक्तिद्वयस्वीकारेतुगौरवम्--अतस्सामान्यधर्माव
च्छिन्नएवशक्तिरुचिता-नविशेषधर्मावच्छिन्नइतिवाच्य
म्--पवित्रशब्दस्य--अनन्यथासिद्धबहुप्रमाणप्रयोगासि
द्धायास्सुदर्शनत्वावच्छिन्नविषयशक्तेरपह्नवायोगात्--
योगरूढशब्दानांयोगशक्तिमात्रतात्पर्येणापिप्रयोगदर्शने
नतथाप्रकृतेपिशुद्धिकर्तृत्वकरणत्वरूपयोगशक्यताव
च्छेदकमात्राभिप्रायेणवा-गौणवृत्त्यावा-अग्निःपवित्रम्-
समापुनात्वित्यादिप्रयोगोपपत्तिसम्भवेनतदर्थंदेवता
त्वावच्छिन्नेसमुदायशक्तिकल्पनानावश्यकत्वात्-अन्य
थापवित्रशब्दस्यशुद्धिकरणमात्रेशुद्धमात्रेचबहुलंप्रयोग

दर्शनेनतत्सर्वसाधारणशक्तिकल्पनाप्रसङ्गस्यदुर्वारत्वा
च्च--३१यज्ञोपवीतंपरमंपवित्रमितिमन्त्रेहिपवित्रशब्द
श्शुद्धिकरणमात्रपरःप्रयुक्तः-३२श्रीरामायणेयुद्धकाण्डेष
ड्विंशत्युत्तरशततमसर्गे--एतत्तुदृश्यतेतीर्थंसागरस्यमहा
त्मनः। सेतुबन्धइतिख्यातंत्रैलोक्येनाभिपूजितम्--ए
तत्पवित्रंपरमंमहापातकनाशनमित्यत्रापिपवित्रशब्द
श्शुद्धिकरणमात्रपरःप्रयुक्तः--३३अमरकोशेद्वितीयका
ण्डेब्रह्मवर्गे--पवित्रःप्रयतःपूतइति--तृतीयकाण्डेविशेष्य
निघ्नवर्गे--पूतंपवित्रम्मेध्यंचेतिचपवित्रशब्दश्शुद्धपरःप्र
तिपाद्यते--३४ शाण्डिल्यस्मृतौचतुर्थाध्याये--निर्धनां
श्चरतोलोकेवृत्त्यर्थमिहसात्विकान्। नावमन्येततैर्लो
कंपवित्रीकुरुतेहरिरिति--पाद्मोत्तरखण्डेद्वितीयाध्याये-
तेवैष्णवाभुवनमाशुपवित्रयन्तीति--नैषधीयकाव्येपिप्र
थमसर्गे--पवित्रमत्रातनुतेजगद्युगइतिचपवित्रशब्दस्य
शुद्धेप्रयोगोदृश्यते--३५तदेतत्सर्वम्--अनुशासनान्तर
विरहेणदर्शितानुशासनासिद्धशक्त्येकदेशमात्रविवक्षणेन
धात्वर्थैप्रेरणांशप्रहाणविवक्षणेननिरूढलक्षणास्वीकारे
णपुवइतियोगविभागमाश्रित्याश्रयकरणादिमात्रविषये

स्यापिदुरपह्नवबहुलप्रयोगबलादसञ्ज्ञायामपीत्रप्रत्यय विधानस्वीकारेणवायथानिर्वोढव्यम्-तथा-अग्निःपवित्र मित्यादिप्रयोगोपिनिर्वोढुंशक्यएवेतिनतदर्थंशक्त्यन्तरं कल्पनीयम्--३६किंबहुना--शुद्धमात्रेशुद्धिकरणादिमा त्रेचपवित्रशब्दप्रयोगस्यसर्वतःप्रसिद्धस्यदुरपह्नवत्वात्— विशेष्यवाचकपदान्तरसमभिव्याहृतपवित्रशब्दस्यत द्विषयत्वसम्भवेनान्यथासिद्धताया दुर्वारत्वाच्च--अग्निःप वित्रमित्यादिप्रयोगमात्रेणनकथञ्चिदपिपवित्रशब्दस्यदे वतात्वावच्छिन्नेसमुदायशक्तिःसिद्ध्यतीतिसम्यगवधेय म्--३७यद्यपि--नरशब्दस्यमनुष्यत्वरूपसामान्यधर्माव च्छिन्नेऽर्जुनत्वरूपविशेषधर्मावच्छिन्नेचशक्तिद्वयंयथा प्रामाणिकम्--यथाच-पुरुषशब्दस्यात्मसामान्येविष्णौ चपृथक्पृथक्शक्तिःप्रामाणिकी--तथापवित्रशब्दस्यदेव तात्वावच्छिन्नेसुदर्शनत्वावच्छिन्नेचपृथक्पृथक्समुदा यशक्तिस्वीकारेपिनास्माकंकाचिदस्तिक्षतिः--३८तथा पिसुदर्शनत्वावच्छिन्नेशक्तिग्राहकानन्यथासिद्धप्रयोगप्र माणोपलम्भवद्देवतात्वरूपसामान्यधर्मावच्छिन्नेसमु दायशक्त्यन्तरग्राहकानन्यथासिद्धप्रयोगप्रमाणानुपल

म्भेनतथाविधसमुदायशक्त्यन्तरंनसेद्धुमर्हति--३९ सुद
र्शनत्वावच्छिन्नेशक्तिग्राहकोनन्यथासिद्धःप्रमाणगण
स्तुप्रागेवोदाहृतः--४० प्रयोगोप्यनन्यथासिद्धस्तद्विष
योदृश्यते--४१ यथोक्तंपराशरस्मृतौविशिष्टधर्मशास्त्रे--
द्वितीयाध्याये--पवित्रेणाङ्कयेत्पूर्वंबाहुमूलंचदक्षिणम् ।
शङ्खेनप्रतपेत्सव्यंगदयाफालमध्यमामिति--४२ बृह
द्धारीतस्मृतावपिप्रयुक्तमष्टमाध्यायेश्रौतभगवद्धर्मदीक्षा
प्रकरणे--आचार्योविष्णुमभ्यर्च्यपवित्रंचापिपूजयेत् ।
पुरतोवासुदेवस्यइध्माधानान्तमाचरेदिति--४३ पाद्मो
त्तरखण्डद्वितीयाध्याये--दिवस्पतेस्सुविततंपवित्रंयस्य
दक्षिणे । नतप्यतेभुजेसम्यक्तस्यशोचन्तिहिक्रिया
इति--होमाग्निसन्तप्तपवित्रलाञ्छितामूलेतुबाहोःपर
मात्मनोहरेरितिचप्रयुक्तम्--४४ अत्रविशेष्यवाचकपदा
न्तरविधुरसुदर्शनविषयपवित्रशब्दप्रयोगोनन्यथासिद्धः
पवित्रशब्दस्यसुदर्शनत्वावच्छिन्नेशक्तिव्यवस्थापकः--
४५ नचैवंदेवतात्वावच्छिन्नविषयसमुदायशक्तिग्राहक
मनन्यथासिद्धंप्रयोगंकोशादिप्रमाणंवाक्वचिदुपलभाम
हे--४६ नच--अग्निःपवित्रमित्यादिवाक्येपवित्रशब्दस्य

पवित्रपदवाच्यत्वावच्छिन्नबोधकत्वस्वीकारेतस्यवाक्य
स्य—अग्न्याद्यसाधारणधर्मावच्छिन्नेपवित्रशब्दशक्ति
ग्राहकतासम्भवत्येवेतिवाच्यम्—तथासतिपवित्रशब्द
स्याग्निवाय्वाद्यसाधारणनानाशक्तिकल्पनाप्रसङ्गात्—
प्रागुक्तरीत्यानिर्वाहेणान्यथासिद्धस्याग्न्यवाक्यस्यश
क्तिग्राहकतायाएवायोगात्—अनन्यथासिद्धप्रयोगप्रमा
णसत्त्वेकथंचित्क्वचिदन्यत्रापिपवित्रसञ्ज्ञासिद्धावपिक्ष
त्यभावस्यप्रागेवावेदितत्वाच्च—४७ तस्मात्पवित्रशब्दस्य
प्रागुक्तरीत्याप्रथमसूत्रेणसुदर्शनाख्यभगवद्दिव्यायुधवि
शेषे—द्वितीयसूत्रेणतदभिमानिदेवताविशेषेचयोगरूढ
सञ्ज्ञारूपतादुरपह्नवैवासिध्यतीति ॥ १७५ ॥ अस्मदु
दाहृतःपवित्रशब्दस्याविशिष्यसुदर्शनेशक्तिग्राहकवेदानि
घण्टादिप्रमाणगणः—प्राचीनेनभवन्मतस्थेनैवद्वारकाश
ङ्करमठपतिपरम्पराघटकेनाच्युताश्रमसन्न्यासिनाराम
नाममाहात्म्ये—पवित्रमित्यग्निरित्यादिश्रुतिम्—पवित्रं
चरणंचक्रंलोकद्वारंसुदर्शनम्—पर्यायवाचकाह्येतेचक्रस्य
परमात्मनइतिवचनंचोदाहरतापवित्रचरणादिशब्दस्य
सुदर्शनेशक्तेर्निर्धारणात्त्वयाऽर्वाचीनेनदुरपह्नवप्रामाण्य

इतितादृशशक्तिसिद्धिर्निष्प्रत्यूहैव ॥ १७६ ॥ य
द्प्यर्वाचीनभास्करेणवैष्णववैभवासहिष्णुतानिबन्धनं
निजहृदयगतंनिखिलमपिदुराग्रहमुद्वमतोक्तम्--अ
तप्तेतितपसन्तापइत्यस्यलुङिआत्मनेपदप्रथमपुरुषैक
वचनम्--यस्यतनूः--अङ्गानि--नातप्त--नदग्धवान्--स
आमएवब्राह्मणोत्तमः--तत्--पदम्--अश्नुते--एवमत
प्तानांफलमुक्त्वातप्ताङ्गानामनिष्टफलमाह--शृतासइति
तच्छन्देनौचित्यात्कुम्भीपाकस्यपरामर्शः--एवंचब्राह्म
णोत्तमैस्तप्तमुद्रानधार्येतिफलितोऽर्थइति ॥ १७७ ॥
तदेतन्नूनमनेनदुराग्रहान्धकारान्धीकृतहृदयेनयथोक्त
स्वाभिमतार्थवर्णनेप्रकृतपदवाक्यसन्दर्भादिसमन्वया
सम्भवंस्वस्यपदवाक्यसन्दर्भस्वभावकोविदविदग्धाविबु
धपरिहासपात्रताप्रसङ्गंप्रसह्यवेदस्यापार्थकरणेस्वस्याव
र्जनीयभाविकुम्भीपाकसम्भवंचानालोचयतैवोक्तम्--
॥ १७८ ॥ तथाहि--अतप्तेतितिङन्तमितिस्वीकृत्यपद
द्वयकरणमसङ्गतम्--पवित्रमन्त्रस्ययजुष्यारण्यकघटक
स्यपदकारप्रवृत्त्यविषयत्वेपिबह्वृचैर्ऋग्वेदेपदकारप्रवृत्ति
विषयेऽस्मिन्मन्त्रे--अतप्ततनूरित्यस्यैकपदत्वेनैवपाठा

त्--शाखान्तरैककण्ठचेनार्थास्वीकारेसर्वशाखाप्रत्ययन्यायसर्व वेदान्तप्रत्ययन्याययोस्समुद्रघोषमात्रायितत्वापत्तेश्च ॥१७९॥ अतप्तेत्यस्यतिङन्तत्वमेवाश्रित्यापि--अतप्ततनूरित्यन्तस्यैकप-दत्वसमासत्वपूर्वनिपातानांछान्दसत्वकल्पनंचातिबालिशकृत्य म्--स्वरसतस्सम्भवतिगत्यन्तरेनिष्कारणमुक्तलक्षणकोलाहल स्यकल्पनासम्भवात् ॥ १८० ॥ किंच--तपऐश्वर्येवेतिदिवा दिगणपटकस्यैश्वर्यार्थकधातोरकर्मकस्यात्मनेपदित्वसम्भवेपि-- तपसन्तापइतिभौवादिकस्यसन्तापार्थकस्यतपदाहइतिचौरादि कस्यदाहार्थकस्यवासकर्मकस्यधातोरात्मनेपदंनसम्भवति--उद्वि भ्यांतपः १--३--२७--इत्यनुशासनेनअकर्मकादित्यनुवृत्त्याकथं चिदर्थान्तरपरतामापद्याकर्मकतामापन्नस्यैवतपधातोरुपसर्गविशे षपूर्वकस्यात्मनेपदाविधानात्---स्वाङ्गकर्मकाच्चेतिवक्तव्यमितित दनुसारिवार्तिकबलेनसकर्मकस्यापितस्यकथंचिदात्मनेपदसम्भवे पि--उद्विभ्यामुपसर्गाभ्यांपरस्यैवतस्यतत्सम्भवेनकेवलस्यतदस म्भवात्--एवम्--स्वमङ्गंस्वाङ्गमितिव्युत्पत्त्यास्वाङ्गशब्दस्यप्रकृ तक्रियाकर्त्रवयवपरतयासम्प्रतिपवित्रशब्दार्थसुदर्शनस्यैवतपति क्रियाकर्तृत्वात्तादृशक्रियायास्सुदर्शनावयवकर्मकत्वाविरहेणोक्त वार्तिकबलेनापीहात्मनेपदनिर्वाहासम्भवात्--उक्तवार्तिकस्या

प्युक्तोपसर्गविशेषसापेक्षत्वेनैवचपवित्रशब्दार्थसुदर्शनवाचितृती
यान्ततत्पदंकर्तृविषयप्रथमान्तयत्पदंचाध्याहृत्य—यस्तेनतनूर्ना
तप्तेतिकथंचित्प्रकारान्तरेणव्याख्यानेपिनिस्तारासम्भवात्—तप
स्तपःकर्मकस्यैव--७--३--८८--इत्यनुशासनेनापितपःकर्मक
स्यैवतपधातोः-कर्तुःकर्मवद्भावविधानात्—कर्तुःकर्मवद्भावानिब
न्धनात्मनेपदस्यापिशरीरावयवकर्मकतपधातोर्दुर्वचत्वाच्च ॥
॥ १८१ ॥ एवम्--अतप्ततनूरित्यत्रअतप्तेत्यस्यातिङन्तत्व
तनूरित्यस्यद्वितीयान्तत्वंचस्वीकृत्यपदच्छेदस्वीकारे—पवित्रंय
स्यतनूर्नातप्तेतिवा--यस्तेनतनूर्नातप्तेतिवान्वयस्यसतदश्नुतइत्य
न्वयस्यचनिर्वाहाययत्तत्पदाध्याहारोत्यन्तास्वारस्यापादकोदो
षः ॥ १८२ ॥ एवंतनूशब्दस्यबहुवचनान्तस्यमुख्यार्थशरीरवा
चित्वेकर्तुरेकस्यबहुशरीरासम्भवेनान्वयानुपपत्तिभियालक्षणया
शरीरावयवपरत्वकल्पनमपिदोषः ॥ १८३ ॥ चक्रेणैकेनब
हवयवतापनस्याचारासिद्धतयाशरीरावयवलाक्षणिकत्वस्वीका
रेप्यसामञ्जस्यंदुर्वारम् ॥ १८४ ॥ एवम्आमस्तन्नाश्नुते—शृ
तासइद्वहन्तस्तत्समाशतेति—आमशब्दितस्यापक्वस्यतच्छब्दवा
च्यार्थाप्राप्तेः—शृतासइतिशब्दितानांपक्वानांतच्छब्दवाच्यार्थप्रा
प्तेश्चप्रतिपादनस्यैवशब्दभङ्गीस्वरसलभ्यतयातच्छब्दयोर्द्वयोरेका

र्थवाचित्वेस्वरसवाहिनोःपरस्परभिन्नार्थकत्ववर्णनम्-नञोऽस्वा
रसिकस्थलान्वयवर्णनम्द्वितीयतच्छब्दस्यकेवलनिजवैष्णवविद्वेषमूलदुराग्रहमात्रेणात्यन्तानुपस्थितकुम्भीपाकपरत्ववर्णनंचा
त्यन्तमस्वारसिकमित्यापण्डितपामरमतिस्फुटम् ॥ १८५ ॥
इत्थमापण्डितपामरमतिस्फुटानुपपत्तिबाहुल्यम्-अतप्ततनूरि
त्यस्यप्रकरणादितःप्रस्फुटमेकपदत्वेनप्रतीयमानस्यऋग्वेदेपदका
रैरेकपदत्वेनपठ्यमानस्यचपदद्वयत्वकल्पनेप्राप्नुवन्तींप्रबलतमानु
पपत्तिंवाविगणय्यार्वाचीनभास्करकृतमिदंव्याख्यानंबुद्धिपूर्वक
वेदापार्थकरणमूलदुर्वारकुम्भीपाकप्रापकतदीयघोरपातकपरिपा
कमूलकमेवेति-अतएवच-तदीययोजनान्तराणिदुर्वादान्तरा
णिचसर्वाणिदुराग्रहैकमूलतयैवक्लेशतोपिनविश्वस्यादर्तुंयोग्यानी
तिचापण्डितपामरंसुगममेववर्ततइतिनात्रनिरूपणप्रयासंबहुलमा
द्रियामहे ॥ १८६ ॥ तस्मान्नकथंचिदपिसुदर्शनधारणपरत्वमप
लप्यान्यपरतयैवप्रतिवादिभिर्नेतुंशक्यापवित्रश्रुतिरितिसिद्धम् ॥
॥ १८७ ॥ अथैतत्पवित्रश्रुतेर्यथोक्तार्थपरत्वंयजुरारण्यकैका
दशानुवाकगतपवित्राङ्गिरोदृष्टमन्त्रचतुष्टयघटकैतन्मन्त्रपूर्वोत्तर
मन्त्रव्याख्यानपूर्वकंदुर्धर्षंस्थाप्यते ॥ १८८ ॥ पवित्रवन्तःपरि
वाजमासतेपितैषांप्रत्नोअभिरक्षतिव्रतम् । महत्समुद्रंवरुणस्ति

रोदधेधीराइच्छेकुर्वरुणेष्वारभम् ॥ इतिप्रथमोमन्त्रः ॥ १८१॥
अस्यविवरणमित्थंबोध्यम् ॥ पवित्रवन्तः—चक्रधारिणः—वा
जम्—पक्षम्—पर्यासते—परितःप्राप्नुवन्ति—यद्वा—परिभ्रमयन्ति
अथवा-परिवाजम्—परितःस्थिताःवाजाःपक्षाःयस्मिन्कर्मणि
तद्यथाभवतितथा—आसते—उपविशन्ति—पक्षत्रयेपि—ऊर्ध्वप्रदे
शगमनायप्ररूढपक्षाः पक्षिणइवचक्रधारिणोपिमोक्षार्थंपरमपदा
ख्योर्ध्वलोकगमनायप्ररूढपक्षावर्तन्तइत्यर्थः-चक्राङ्कनमहिम्नामो
क्षलोकप्राप्तयेलब्धदृढपरिकरास्सिद्धसन्नाहानिश्शङ्कंवर्तन्तइति
यावत्-अतएवहि-चमूषच्छयेनइतिश्रुत्यन्तरेपिभगवदायुधधारि
णोमुमुक्षोश्श्येनशकुनसमाधिस्संसारसागरमतीत्यपरमपदाख्यपर
मोर्ध्वलोकगमनंचप्रतिपाद्यते-एषाम्भगवदसाधारणचक्रलाञ्छ
नधारणेनभगवदनन्यदेवत्वलक्षणपारमैकान्त्यभाजाम्—व्रतम्—
अनन्यदेवयाजिलक्षणंव्रतम्—प्रत्नः—पुराणः—पिता—अर्वाचीन
कर्मोपाधिकपितृभ्यःप्राचीनप्राचीननिखिलजगन्निरुपाधिकपितृभूत
श्रीमन्नारायणः ॥ त्वम्माताসর্বलोकानांदेवदेवोहरिः पितेत्यादि
परस्सहस्रप्रमाणगणप्रसिद्धंहिभगवतोनिखिलजगन्निरुपाधिकपि
तृत्वम्—अभिरक्षतिअसहिष्णुभ्यःकामक्रोधमोहादिविनिपातने
नविघ्नंचिकीर्षयानिर्निमेषदत्तावधानेभ्योपिदेवतान्तरेभ्योनिर्विघ्नं

निर्वर्तयाति—देवतान्तराणिहि—परमैकान्तिषुस्वाराधनप्रहाण
स्वोत्कृष्टपदगमनोद्यमादिभिर्लब्धासूयानितदीयव्रतविघ्नकरणे
प्रवर्तन्ते—भगवांस्तद्विघ्ननिरसनेनभक्तान्रक्षतीतिचप्रसिद्धम्-
उक्तंहिश्रीभागवतैकादशस्कन्धेचतुर्थाध्याये—त्वांसेवितुस्सुरकृ
ताबहवोऽन्तरायास्स्वौकोविलङ्घ्यपरमंव्रजतःपदंते । नान्य
स्यबर्हिषिबलीन्ददतस्स्वभागान्धत्तेपदंत्वमवितायदिविघ्नमू
र्ध्नीति——कामादिभिर्देवैःश्रीविष्णुधर्मेद्वितीयाध्यायेप्युक्तम्-
श्रूयतेकिलगोविन्देभक्तिमुद्वहतांनृणाम् । संसारन्यूनताभीता
स्त्रिदशाःपरिपन्थिनइति——सत्वंप्रहरवामावामायिवज्रंपुरन्दर ।
नाहमुत्सृज्यगोविन्दमन्यमाराधयामिभोः । नचापिवज्रं
वज्रीवात्वंनचापिसुरासुराः । शक्तानिहन्तुमीशानेहृदयस्थे
जनार्दनइतिचांबरीषेण——सर्वचित्ताकर्षिसांसारिकविषय
व्यामोहसागरंकथमयमुत्तरतीत्यतआह——वरुणइत्यादि——
वरुणः——नारायणः = कॄदारिभ्यउनन्——३——इत्युणा
दितॄतीयपादानुशासनेनोनन्प्रत्ययान्तवृञ्धातुनिष्पन्नोयंश
ब्दः——वृणोति——जगदावृणोतीतिव्युत्पत्त्या = येनावृतंखं
चदिवंमहींचेतिश्रुत्युक्तरीत्या——जगदावरणानुकूलापरिच्छेद्य
शक्तिमान्वा——वृणुते—स्वाश्रितान्निजकरुणयाद्दढंस्वीकरो

तीतिव्युत्पत्त्या = नायमात्माप्रवचनेनलभ्योनमेधयानबहुना
श्रुतेन । यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूं
स्वामितिश्रुत्युक्तरीत्या—स्वप्राप्त्यर्थंनिजकरुणाविशेषेणस्वा
श्रितजनसुहृदस्वीकरणशीलोवानारायणइहवरुणशब्देनोच्य
ते = सहस्रनामाध्याये—पठितश्चायंशब्दोनारायणनामतया
वरुणोवारुणोवृक्षः—७१—इतिश्लोके = महस्समुद्रम्—
महान्तंसमुद्रम्—संसारसागरम्—महश्शब्दोमहत्परश्छन्द—
सिप्रयुज्यते—अतएव—महोदेवोमर्त्यां३आविवेशेत्यत्र—महान्दे
वश्शब्दइतिपतञ्जलिनामहश्शब्दोमहत्परोव्याख्यातः—तिरो
दधे—आच्छादयति—निरतिशयभोग्यंस्वात्मानंप्रकाश्यतद
न्यंकृत्स्नमपिभोग्यतयानभासयति—परमात्मनियोरक्तोविर
क्तोऽपरमात्मनीतिह्युच्यते = अतोभगवद्भक्तेषुसांसारिकविष
यव्यामोहनिपातनेनव्रतभञ्जनप्रयत्नोदेवतान्तराणांनसफलोभव
तीतिभावः—वरुणेषु—वरन्तिप्राणिजातमितिवरुणानिलो
काः—तेषु—इच्छब्दोऽवधारणार्थः—धीराइत्—धीम
तामग्रेसराएव—आरभम्—पारमैकान्त्यलक्षणंयथोक्तव्रत
मारब्धुम्—यद्वा—इच्छब्दइदंशब्दार्थेछान्दसः—आरभ
मितिक्रियाकर्मभूतव्रतवाचीबोध्यः—शेकुः—शक्नुवन्ति—

तस्यधीराःपरिजानन्तियोनिमिति—तंधीरासःकवयउन्नय
न्तीतिचाहिश्रूयते = वदन्तोपिगुणान्विष्णोःकुर्वन्तोपिचत
त्क्रियाःमन्दपुण्यानविन्दन्तिपारमैकान्त्यसम्पदमितिभरद्वाज
संहितायामुक्तम् = अपूजनेनिग्रहभयात्—क्षुद्रफललोभात्—
परत्वसंदेहात्——परापरदेवतैक्यभ्रमाच्चाहिप्रायशस्सर्वेलोकाः
क्षिप्रक्षुद्रफलप्रदानिक्षुद्रदेवतान्तराण्यालम्बन्ते—उक्तान्हेतू
नुत्तीर्यभगवतिपुण्डरीकाक्षेसुदृढमवगाढपरत्वाधियोहिपुरुषादुर्ल
भतमालोके—अतएवहि—भगवताप्युच्यतेगीतासु—वासु
देवस्सर्वमितिसमहात्मासुदुर्लभइति—अतस्तादृशानामेवतद्भ्रत
प्रवृत्तिर्नसर्वसाधारणीतिभावः—छन्दसिलुङ्लङ्लिटः— ३
४—६—इत्यनुशासनेन—तिरोदधे—शकुरित्यत्रकालव्य
त्ययः—शकिणमुल्कमुलौ—३—४—१२—इत्यनुशासनेन
शक्नोतौधातावुपपदेछन्दसितुमर्थेणमुल्कमुलौप्रत्ययौभवतइ
त्यर्थकेन—आरभामित्यत्रतुमुन्नर्थेकमुल्प्रत्ययः—प्रकृत्याऽ-
न्तःपादमव्यपरे—६—१—११५—इत्यनुशासनेन—ऋक्
पादमध्यस्थएङ्प्रकृत्यास्यादतिपरे—नतुवकारयकारपरेऽती
त्यर्थकेन—प्रनोआभिरक्षतीत्यत्रैङःप्रकृतिवद्भावइति ॥११०॥
पवित्रंतेविततंब्रह्मणस्पते । प्रभुर्गात्राणिपर्येषिविश्वतः। अ

तमतनूर्नतदामोअश्नुते । शृतासइद्वहन्तस्तत्समाशत ॥ इतिद्वितीयोमन्त्रः ॥ १९१ ॥ अस्यविवरणमित्थंबोद्धव्यम्—हेब्रह्मणस्पते—विष्णो—ते—तव—यत्पवित्रम्—सुदर्शनम्—विततम्—अरनेमिज्वालाद्यवयवबाहुल्येनविस्तीर्णम्—यद्वा—आस्तिकजनेषुव्याप्तम्अस्तिसुदर्शनव्याप्तिः किन्निमित्तेत्यत्राह—प्रभुरित्यादि—प्रभुः—सर्वस्वामिभूतस्त्वम्—प्रभुरितिसाभिप्रायंविशेषणम्—तेनसुदर्शनेन—विश्वतः—विश्वेषांवर्णानाम्—गात्राणि—शरीराणि—पर्येषि—व्याप्नोषि—स्वयंस्वामित्वात्—स्वदासानांस्वचिह्नधारणस्यावश्यकत्वाच्चतद्गात्राणिस्वासाधारणचिन्हस्वावताराविशेषभूतसुदर्शनेनलाञ्छितानिकृत्वातत्पूर्वकंतत्सान्निध्यविशेषंव्याप्तिविशेषरूपंस्वयमेवकरोषीतियावत्-सर्ववर्णानामधिकारोभगवद्व्याप्तिविशेषश्चप्रागुदाहृतप्रमाणसिद्धोबोद्धव्यः—व्याप्तिप्रकारफलंदर्शयति—अतप्ततनूरित्यादि-तेनात प्ततनूःअतएव-आमः-तत्-ब्रह्म-नाश्नुते—शृतासः—तप्ततनवस्सन्तः-इद्वहन्तः-पवित्रंवहन्तएव-तत् समाशत-प्राप्नुवन्ति—आमोअश्नुतइत्यत्रैङःप्रकृतिभावः—पूर्वमन्त्रव्याख्यानोदाहृतानुशासनायत्तोबोध्यः-अन्येचेहवक्तव्याअंशाःप्रागेवोक्ताइहाप्यनुसन्धेयाः-इयमपिकाचियोजनास्वरसतरसम्प्र

वतीतीयमिहोपदर्शितासम्भवद्योजनान्तराणितुग्रन्थान्तरतोऽवगन्तव्यानीतिग्रन्थगौरवभियेहोपरम्यतइति ॥ ११२॥ ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणाम्माहिषोमृगाणाम् । श्येनोगृध्राणा ᳚ स्वधितिर्वनाना ᳚ सोमःपवित्रमत्येतिरेभन् ॥ इतितृतीयोमन्त्रः॥ ११३॥अस्यविवरणमित्थंबोध्यम्—अत्रसोमशब्दोनारायणपरः—सूते—स्वाश्रितानांमहानन्दलक्षणम्मोक्षमुत्पादयतीति षूङ्प्राणिप्रसवइतिधातुमूलव्युत्पत्त्या—सुनोति—स्वाश्रितानानन्दसागरेमज्जयतीतिवा—स्वयमानन्दसागरेमज्जतीतिवा—षुञ्अभिषवइतिधातुमूलव्युत्पत्त्यावासर्वथासोमशब्दआनन्दयितृत्वानन्दमयत्वप्रवृत्तिनिमित्तकःपरब्रह्मभूतंनारायणमाचष्टे—एषह्येवानन्दयातीति = यतोवाचोनिवर्तन्ते—अप्राप्यमनसासह-आनन्दंब्रह्मणोविद्वान्-नबिभेतिकुतश्चनेतिचश्रुतेरानन्दयितृत्वमानन्दमयत्वंचकाष्ठापन्नंपरब्रह्मणोऽसाधारणोधर्मः—आनन्दमयोभ्यासादितिसूत्रकारेणाप्यानन्दमयःपरमात्मानिर्णीतः। सूतेजगदितिवासोमोनारायणः—पठितश्चसोमशब्दोपिसहस्रनामाध्यायेनारायणनामतया—सोमपोमृतपस्सोमइति—८४श्लोके—असाधारणधर्मावच्छिन्नपरत्वमन्तरेणचभगवन्नामान्तर्भावोनोपपद्यते अतोऽसाधारणधर्मान्तरस्यरूढिनिमित्तत्वाद्वा—उक्त

धर्माणामेवतथात्वाद्वानारायणपरइहसोमशब्दः——ब्रह्मादिविभू
तिकत्वादिप्रतिपादनाल्लिङ्गाच्चायमिहनारायणपरएव—यद्यद्विभू
तिमत्सत्त्वंश्रीमदूर्जितमेववा । तत्तदेवावगच्छत्वंममतेजोंशस
म्भवमितिभगवद्गीतोक्तरीत्यातत्तच्छक्तिविशिष्टानांसर्वेषांभगव
दात्मकत्वेनभगवच्छरीरभूततयातदीयतत्तच्छक्तिनिदानभूतंपर
मैश्वर्यंभगवतएवेतिप्रतिपादयत्ययम्मन्त्रः———देवानांब्रह्मा
सर्वदेवानियन्तृत्वशक्तिविशिष्टचतुर्मुखशरीरकतयातद्रूपेणवर्त्त
मानः——तदैश्वर्यनिदानैश्वर्यसम्पन्नोऽयमेवेतियावत्——शरीर
वाचकानांशब्दानांशरीरिवाचकत्वव्युत्पत्त्याऽयंनिर्देशः——एव
मुत्तरत्रापिबोध्यम्——कवीनांपदवीः——मार्गः——अङ्यन्तो
प्यस्तिपदवीशब्दः——अतोनसुलोपः——अथवा——पदवीम्
ईर्ते——गच्छतीतिपदवीः——ईरगतौकम्पनेचेतिधातोःकर्तरिक्वि
प् सर्वथाकवीनांमार्गप्रवर्तकोवाल्मीक्यादिःकवीनांपदवीः——
कवीनांकवनचातुर्यप्रवर्तनौपयिकविलक्षणज्ञानशक्तिसम्पन्न
वाल्मीक्यादिरूपेणवर्तमानः——विप्राणामृषिः——तपोमाहिम्ना
सर्वविप्रातिशायिविलक्षणशक्तिसम्पन्नऋषिरूपेणवर्तमानः——
मृगाणाम्माहिषः——मदमाहिम्नास्वेतरमृगपरिभवकरणौपयिकश
क्तिविशेषसम्पन्नमहिषरूपेणवर्तमानः—गृध्राणांश्येनः—पक्ष्यन्त

रेभ्यो हठादामिषादिग्रहणचतुराणां गृध्राणामपि हठादामिषादि ग्रहणशक्तश्येनरूपेण वर्तमानः—वनानां स्वधितिः—तरुगुल्म लतादिलक्षणदुरुच्छेदविस्तृतरूपाणां वनानामसहायच्छेदनश क्तिसम्पन्नपरश्वधरूपेण वर्तमानः—एते सर्वे निर्देशास्सादृश्यमुखे नप्रदर्शिततत्तच्छक्तिसजातीयसर्वशक्तिप्रदर्शनपरास्सर्वविधश क्त्यन्तरोपलक्षणपराश्च वेदितव्याः—सोमः—नारायणः—रेफ न्—युद्धं कुर्वन्—यद्यपि—रिफ कत्थनयुद्धनिन्दाहिंसादाने ष्विति धातोश्शविकरणिनो न गुणस्सम्भवति—तथापि भ्वादेराकृ तिगणत्वेन भौवादिकोप्ययं भवितुमर्हतीति गुणसङ्गतिः—यद्वा—रिफ कुत्सन इति सौत्रोयं धातुरिति तत्सङ्गतिः—रेफन्—निरस नेनाविरोधिनः कुत्सां गमयन्—सर्वथाविरोधिनिरसनादुक्तस्सान्नि तियावत्—पवित्रम्—सुदर्शनम्—अति—अधिकम्—एति प्राप्नोति—विरोधिनिरसनसमयेष्वतिशयेन धत्ते—यत्तु—सकलप वित्रमत्येति—सकलपावनवस्त्वतिशायित इत्यर्थ इति व्याख्यान म्—ननु सकलपदाध्याहारसापेक्षत्वात्—अध्याहारासंवलि तपवित्रशब्दस्य विशेष्यवाचकपदान्तरासमभिव्याहृतस्य रूढि प्राबल्येन रूढार्थप्रहाणायोगात्—कथंचित्प्रहाणेपि पवित्रातिल ङ्घित्वस्यापवित्रत्वपर्यवसानप्रसङ्गाच्च—पवित्राङ्गिरोदृष्टमन्त्र

चतुष्टयघटकैतन्मन्त्रपूर्वमन्त्रयोःप्रथमे—पवित्रवन्तःपरिवाजमा
सतइत्यादिकेमन्त्रेपवित्रवन्तइत्यत्र—पवित्रन्तेविततंब्रह्मणस्प
तइत्यादिकेद्वितीयमन्त्रे—पवित्रंतइत्यत्रचपवित्रशब्दस्यब्रह्म
णस्पतिशब्दितदेवताविशेषसम्बन्धिप्रतिनियतयाकिञ्चिदर्थवि
शेषरूढत्वदर्शनात्तस्यचसुदर्शनरूपतायाःप्रागुपपादितत्वात्प्रकर
णानुरोधेनात्रापिपवित्रशब्दस्यतत्परतायाएवन्याय्यत्वात्—
पवित्रवत्यश्चतस्रउत्तरास्मिन्नित्येतन्मन्त्रचतुष्टयविनियोगपर
बोधायनकल्पसूत्रेचतुर्णामपिमन्त्राणांयत्किंचिदेकपवित्रपदा
र्थप्राधान्यपरत्वावगतेः—उक्तरीत्याऽर्थकरणेतदनिर्वाहेणतादृश
सूत्रानुगुण्यविरहाच्चानुपपन्नम्—तथाच—यथोक्तलक्षणना
नाविधशक्तिसम्पन्नःपरब्रह्मभूतोनारायणोपिशत्रुनिरसनपरिक
रतयासुदर्शनंधत्तइतिसुदर्शनस्तुतिरनेनमन्त्रेणफलिताभवतीति
॥ ११४ ॥ असतस्सद्येततक्षुः । ऋषयस्सप्तात्रिश्चयत् ।
सर्वेत्रयोअगस्त्यश्चनक्षत्रैश्शङ्कृतोऽवसन् ॥ इतिचतुर्थोमन्त्रः
॥ ११५ ॥ अस्येत्थंविवरणंबोध्यम्—येसप्तऋषयः—
ते—अत्रिश्च—चकारेणानुक्तसमुच्चायकेनागस्त्योपिगृह्यते—
वक्ष्यमाणानुरोधात्—एते—यत्—यतः—असतः—चक्रा
ङ्कितत्वादिलक्षणभगवदैकान्त्यविधुरप्राणिजातरूपाज्जगतः—

सत्—चक्राङ्कितत्वादिलक्षणभगवदैकान्त्यभाक्प्राणिजातरू
पंजगत्—ततक्षुः—विभिद्यनिष्पादयामासुः—यद्यपि—
तक्षूतनूकरणेइत्यस्यतक्षत्वचनइत्यस्यवाधातोः—काष्ठंतक्ष
तीत्यादौछेद्यकर्मकत्वंदृष्टम्—तथापि—वृक्षात्स्तम्भंतक्षति—
काष्ठात्त्वचंतक्षतीत्यादिप्रयोगदर्शनात्—छेदननिष्पाद्यकर्मक
त्वमप्यनयोरस्ति—अतएव—किंस्विद्वनंकउसवृक्षआसीद्य
तोद्यावापृथिवीनिष्टतक्षुरित्यादिश्रुत्यन्तरेऽपिछेदननिष्पाद्यकर्म
कःप्रकृतप्रयोगसमानविषयएवप्रयोगोदृश्यते—तथाच—य
था—वनेकतिपयवृक्षाणांवास्यादितश्छेदनेनस्तम्भादिनिष्पाद
नम्—तथाशास्त्रार्थोपदेशतआशयविभेदनेनपरविद्याङ्गचक्रा
ङ्कनादिलक्षणपञ्चसंस्कारप्रापणपूर्वकंजगतिसत्त्वप्रधानानांकेषां
चित्परविद्यानिष्ठानांनिष्पादनमिहविवक्षितम्—भरद्वाजसंहि
तायांपरिशिष्टप्रथमाध्याये—तत्रकेचित्परंतत्त्वंतमोमीलितदृ
ष्टयः। अपश्यन्तोऽभिजानन्तिधर्मस्यनपरांगतिम्। केचित्तुसत्त्व
सम्पन्नाःकेशवेनावलोकिताः।सारासारविदःप्राज्ञाःपरंधर्मंविजा
नते। यएकान्त्यगताविष्णौभगवत्यात्मभावने। तेवैष्णवा
भागवतास्सन्तइत्यपितेस्मृताः। नियोक्ताभगवान्विष्णुर्नियो
गस्तस्यवैश्रुतिः। नियोज्यास्सत्त्वनिष्ठास्तेमुख्यामोक्षार्थचिन्त

काः । अन्यथैवाभिमन्यन्तेसर्वमेतत्कुदृष्टयः । यतोदूरतरा स्तेहिपरस्यपरमात्मनइतिवचनैस्सत्त्वरजस्तमःप्रकृतिप्राणिजा तमयेजगतिसत्त्वप्रकृतीनामेवपरापरतत्त्वधर्माधर्मपरिज्ञानेनभग वत्यैकान्त्यभाजांसच्छब्दवाच्यताकथनात्—परिशिष्टद्वितीया ध्याये—तापःपुण्ड्रस्तथानाममन्त्रोयागश्चपञ्चमः । अमीपरमसं स्काराःपारमैकान्त्यहेतवइतिवचनेन—न्यासोपदेशचतुर्थाध्या ये—यःप्रपन्नोपिलक्ष्मीशंनचक्रादिभिराङ्कितः। नवहत्यूर्ध्वपुण्ड्रंवा नैकान्त्यंतस्यसिध्यतइतिवचनेनचभगवदैकान्त्यस्यचक्राङ्कना दिलक्षणसंस्कारैकनिबन्धनत्वावगमाच्चसच्छब्दस्यचक्राङ्कना दिलक्षणसंस्कारसम्पन्नवैष्णवगोष्ठीविषयत्वसिद्धेः-इतरगोष्ठ्या असच्छब्दवाच्यतायाअर्थवशसम्पन्नत्वाच्चसदसद्गोष्ठीद्वयंहिश्रु त्युपबृंहणसंहितावचनैरपिप्रसिद्धंप्रतिपाद्यते--तस्मादितियत्तदो र्नित्यसम्बन्धादापततिं-सर्वे-सप्तर्षयः-अत्रयः-अत्रिमहर्षयः--पू जायांबहुवचनम्-अतएवाहि-पूर्वमपि-सप्तर्षयइतिसामान्यतस्स प्तर्षिमध्यगतत्वेनात्रेरपिग्रहणेसत्यपि—अत्रिश्चेतिपृथग्ग्रहणमौ त्कृष्ठ्यद्योतनार्थंकृतम्—अगस्त्यश्चेत्येते-यद्वा—अत्रयइतिबहु वचनान्तपदम्—अत्रिप्रधानास्सप्तर्षयइत्यर्थेलाक्षणिकम्-अग स्त्यश्चेत्येतेसर्वे—शंकृतः—इत्थंलोकोपकारकाः—अतएव—नक्ष

त्रैस्सहावसन् —दिविनक्षत्ररूपेणवासमलभन्त— यतएते
शास्त्रार्थविशेषोपदेशेनयथोक्तरीत्यासदसद्गोष्ठीविभागपूर्वकंलो
कक्षेमंचक्रुः—ततएवैतेदिविनक्षत्ररूपेणशाश्वतींस्थितिमलभ
न्तेतिभावः—उपनिषत्प्रतिपन्नाःपरविद्याश्चकाङ्क्षनादिलक्षण
पञ्चसंस्काराद्यङ्गोपाङ्गसहिताःप्रतिपादयतोवेदब्रह्मकाण्डक
ल्पसूत्रभावमापन्नस्यपञ्चरात्रशास्त्रस्यप्रचारंसप्तर्षयश्चक्रुरितिम
हाभारतेशान्तिपर्वणिश्रीनारायणीयोपाख्यानेप्रस्फुटंप्रतिपादि
तम्—यथोक्तंतत्रशान्तिपर्वणिषट्त्रिंशदाधिकत्रिशततमेनाराय
णीयोपाख्यानेद्वितीयेचाध्याये—येहितेऋषयःख्यातास्सप्त
चित्रशिखण्डिनः । तैरेकमतिभिर्भूत्वायत्प्रोक्तंशास्त्रमुत्तमम् ।
वेदैश्चतुर्भिस्समितंकृतम्मेरौमहागिरौ । आस्यैस्सप्तभिरुद्गीर्णं
लोकधर्ममनुत्तमम् । मरीचिरत्र्याङ्गिरसौपुलस्त्यःपुलहःक्रतुः
वसिष्ठश्चमहातेजास्तेहिचित्रशिखण्डिनः । सप्तप्रकृतयोह्येता
स्तथास्वायंभुवोष्टमः । एताभिर्धार्यतेलोकस्ताभ्यश्शास्त्रंविनि
स्सृतम् । एकाग्रमनसोदान्तामुनयस्संयमेरताः । भूतभव्य
भविष्यज्ञास्सत्यधर्मपरायणाः । इदंश्रेयइदंब्रह्मइदंहितमनुत्त
मम् । लोकान्संचिन्त्यमनसाततश्शास्त्रंप्रचक्रिरे । तत्रध
र्मार्थकामाहिमोक्षःपश्चाच्चकीर्तितः । मर्यादाविविधाश्चैवदि

विभूमौचसंस्थिताः । आराध्यतपसादेवंहरिंनारायणंप्रभुम् ।
दिव्यंवर्षसहस्रंवैसर्वेतेऋषिभिस्सह । नारायणानुशिष्टाहितदा
देवीसरस्वती । विवेशतानृषीन्सर्वान्लोकानांहितकाम्यया ।
ततःप्रवर्तितासम्यक्तपोविद्भिर्द्विजातिभिरिति---ततस्तेलोकापि
तरस्सर्वलोकार्थचिन्तकाः । प्रावर्तयन्ततच्छास्त्रंधर्मयोनिंस
नातनमितिच—नारायणीयोपाख्यानस्यकृत्स्नस्यैवपञ्चरात्र
शास्त्रविषयतयाप्रकरणवशादेवोक्तशास्त्रंपञ्चरात्रशास्त्रमितित
त्रैवस्पष्टमवगम्यते—उक्तशास्त्रस्याधिकारिदौर्लभ्येनसत्त्वप्रचु
रदेशकालेषुप्रादुर्भावस्यअन्यदातिरोधानस्यचतत्रैवस्पष्टमभि
धानेनतच्छास्त्राधिकारिणस्सन्तः—अनधिकारिणोऽसन्तइ
त्यप्युक्तप्रायम्—एवमत्रेरिवागस्त्यस्याप्यसाधारणसंहिताविशे
षप्रवर्त्तकतायाअपिदर्शनेनतयोःप्राधान्येनपृथङ्निर्देशोपिश्रुतौदृ
श्यते—उक्तभारताद्युपबृंहणानुरोधेनास्यमन्त्रस्ययथोक्तएवा
र्थःप्रामाणिकः—यत्तु—असच्छब्देनजगत्कारणमव्यक्ताव
स्थापन्नमुच्यते—सच्छब्देनव्यक्तदशापन्नंजगत्—इति—
असतः—जगत्कारणादव्यक्तात्सकाशात्—सत्—व्यक्तं
जगत्—ततक्षुः—तक्षणोपलक्षितंनिष्पादनंकृतवन्तइतिच
सायनव्याख्यानम्—तत्त्वनुपादेयम्---प्रकरणाननुगुणत्वा

त्—असम्बद्धत्वात्—पवित्रवन्तः—पवित्रंते—ब्रह्मादे
वानाम्—असतस्सत्—इतिचतस्रःपवित्रवत्यउत्तरस्मिन्नि
तिबोधायनकल्पसूत्रेणचतुर्णामपिमन्त्राणांपवित्रप्राधान्यपर
त्वरूपस्यपवित्रवत्त्वस्यप्रतिपादनेनतद्विरोधात्—सप्तर्षीणांच
तुर्मुखसृष्ट्यनन्तरंतद्दत्ताधिकारभाजामर्वाचीनव्यष्टिसृष्टावधि
कारसम्भवेपिचतुर्मुखोत्पत्तेरपिप्राचीनायाम्—असच्छब्दवा
च्यादविभक्तनामरूपादव्यक्ताद्विभक्तनामरूपस्यमहदहङ्कारादि
तत्त्वजातलक्षणस्यसच्छब्दवाच्यस्यव्यक्तजगतोविभज्योत्पाद
नलक्षणयांसमष्टिसृष्टौचतुर्मुखस्याप्यनधिकारेणसप्तर्षीणामधि
काराभावस्यकैमुत्यन्यायसिद्धतयावाक्यार्थासङ्गतेश्च=अ
न्यदपिसायनव्याख्यानासामञ्जस्यमेतत्प्रकरणस्थंसुधीभिरव
हिताचित्तैर्द्रष्टव्यम्—चक्राङ्कितमहिमतन्मूलकमहर्षिमहिमप्र
तिपादकतयाताद्दशसर्वमहिमनिदानभूतंपवित्रशब्दवाच्यंसुदर्श
नमेवस्तुतंभवतीतिनास्माकंप्रकरणानुगुण्यविरोधइति॥ १९६
तथाच—पवित्राङ्गिरससम्बन्धिनांचतुर्णामपिमन्त्राणांपरस्परै
ककण्ठ्यानुरोधाद्विनियोजकबोधायनसूत्रानुरोधाच्छ्रुत्यन्तर
स्मृत्यादिप्रमाणगणानुरोधाच्चपवित्रशब्दितसुदर्शनवैभवपरत्वमे
वस्वारसिकमितिसिद्धंभवति ॥ १९७ ॥ इत्थंसुदर्शनवैभ

वपराणाममीषाम्मन्त्राणामारुणकेतुकचयनोपकरणत्वंतुतत्तद नुगुणानुसन्धानपूरणतस्तत्प्रकरणस्थमन्त्रान्तराणामिवानिर्वह तीतिप्रागेवावेदितम् ॥ १९८ ॥ इत्थंचपूर्वोत्तरमन्त्रार्थस्व रसपर्यालोचनेनापिपवित्रश्रुतेस्सुदर्शनधारणैकविषयत्वंसिध्य ति ॥ १९९ ॥ एवमस्याःश्रुतेः—रामार्चनचन्द्रिकायां पञ्चमेपटले—आनन्दवनसन्यासिना—रामनाममाहात्म्येष ष्ठप्रकरणेद्वारकाशंकरमठपातिपरम्पराघटकेनाच्युताश्रमसन्या सिनाचतप्तचक्राङ्कनप्रमाणतयोदाहरणंकृतम् ॥ २०० ॥ इत्थंस्मार्तमतस्थैरपिप्राचीनैर्निबन्धनकारैरस्याःपवित्रश्रुतेस्त प्तचक्राङ्कनपरत्वस्वीकारदर्शनेनार्वाचीनकृतविरुद्धव्याख्यान मात्रहैकमूलकमितिविदांकुर्वन्तुविमत्सराविद्वांसः॥ २०१ ॥

इति श्रीभगवद्धर्मदर्पणेपवित्रश्रुतेस्सुदर्शनधारण परत्वदुर्धर्षतास्थापनंनामसप्तमःपरिच्छेदः ।

अथ भगवद्धर्मदर्पणेऽष्टमपरिच्छेदः।

अथचरणंपवित्रमित्यादिमन्त्रद्वयस्यकाठकगतस्यप्रतिवा
द्युक्तार्थान्तरकल्पनादिभिस्सुदर्शनधारणपरत्वंदुर्धर्षमितिस्था
प्यते ॥ १ ॥ इमौहिमन्त्रौकृष्णयजुर्ब्राह्मणेतृतीयाष्टके
दशमादिद्वादशान्तप्रपाठकत्रयात्मकेकाठकेतृतीयप्रपाठकेतृती
यानुवाकेपठ्येते ॥ २ ॥ अत्राहार्वाचीनभास्करः—एवंच
रणश्रुतिरपिनचक्रधारणेप्रमाणम्—तस्याअपिप्रकरणार्थपर्या
लोचनायामर्थान्तरपरत्वावगमात्—तथाहि—देवेभ्योवैस्व
र्गोलोकस्तिरोभवदित्युपक्रम्य—तंतपोऽब्रवीत्—तंश्रद्धा
ब्रवीत्—तंसत्यमब्रवीत्—तम्मनोब्रवीत्—तंचरणम
ब्रवीदित्यादिवाक्यसमुदायेनचातुर्होत्रचयनाङ्गभूताअपाधा
ख्याःपञ्चेष्टीर्विधाय—तावाएताःपञ्चस्वर्गस्यलोकस्यद्वारः
अपाधाअनुवित्तयोनाम—तपःप्रथमांरक्षति—श्रद्धाद्वितीं
याम्—सत्यंतृतीयाम्—मनश्चतुर्थीम्—चरणंपञ्चमीमित्यु
क्त्वा—अनुहवैस्वर्गंलोकंविन्दति—कामचारोऽस्यस्वर्गेलोके
भवतीत्युपसंहृतम्—तत्रमनसाप्रायपाठान्मनोवदिन्द्रियमेवच
रणशब्देनगृह्यते—नान्यत्—विशयेप्रायदर्शनादित्यत्रप्राय

दर्शनस्यैवनियामकत्वोक्तेः—तथाच—चरणंपञ्चमीमितिब्रा
ह्मणवाक्योपात्तंचरणमेवतस्मिंश्चरणयागेपुरोनुवाक्यायाज्या
त्वेनविनियुक्ताभ्याम्—चरणंपवित्रम्—लोकस्यद्वारमिति
मन्त्राभ्यामभिधीयते—मन्त्रब्राह्मणयोरैकार्थ्यादिति ॥ ३ ॥
तदसत्—तंचरणमब्रवीत्—प्रजापतेचरणेनवैश्राम्यसि—
अहमुवैचरणमस्मि—मांनुयजस्व—अथतेसत्यंचरणंभवि
ष्यति—अनुस्वर्गंलोकंवेत्स्यसीति—सएतमाग्नेयमष्टाकपालं
निरवपत्—चरणायचरुम्—अनुमत्यैचरुम्—ततोवैतस्य
सत्यंचरणमभवत्—अनुस्वर्गंलोकमविन्दत्—इतितत्रचतु
र्थानुवाकेचरणशब्दवाच्यस्यप्रजापतिसंवादतदिष्टफलप्रदत्वप्र
तिपादनात्—चरुहोमोद्देश्यताप्रतिपादनात्—चरणंपञ्चमी
मित्यत्ररक्षतीत्यनुवृत्त्यारक्षकत्वप्रतिपादनाच्चतत्रयष्टव्यदेवता
विशेषरूपतायाएवस्पष्टमवगमनेनचरणशब्दस्याचेतनेन्द्रियवा
चकतायाःकथंचिदपिवक्तुमशक्यत्वात्—अस्मदुक्तसुदर्शनदे
वतापरत्वस्यैवन्याय्यत्वात्—मनआदिपदस्यापितत्प्रकरण
स्थस्यदेवताविशेषपरत्वेनभवदभिमतप्रायपाठस्यापितत्रदुर्लभ
त्वाच्च ॥ ४ ॥ इदमनावधेयम्—विशयेप्रायदर्शनात्
२ ३ १६ इतिपूर्वतन्त्रद्वितीयाध्यायतृतीयपादसूत्रे—सन्दि

ह्यमानार्थकंयत्पदंयद्धर्मव्याप्यधर्मावच्छिन्नवाचकस्वसमान-
स्थानप्रतिपन्नबहुपदसमभिव्याहृतम्भवति—तत्तद्धर्मव्याप्यध
र्मावच्छिन्नवाचकंनिर्णेयमितिहिन्यायोऽभिमतः- १ -अत्रप्र
करणेमनश्शब्दस्यैकस्येन्द्रियत्वव्याप्यधर्मावच्छिन्नवाचकत्वे
पितपश्श्रद्धासत्यशब्दानामताहृशत्वेनताहृशबहुपदसमभिव्याहृ
तत्वाभावान्नात्रचरणशब्दउक्तन्यायेनेन्द्रियविशेषपरोनिर्णेतुं
शक्यः-२-न्यायशरीरेपदेबहुत्वानिवेशेचसत्यादिशब्दानामपि
मनश्शब्दसाहचर्येणेन्द्रियविशेषपरत्वप्रसङ्गोदुर्वारः-३-प्रकरण
पठितानांपञ्चानामपिशब्दानांप्रसिद्धरूढ्याऽन्यार्थकत्वप्रतीतेः
प्रजापतिसंवादकर्तृत्वादिप्रतिपादनेनदेवताविशेषपरताप्रतीतेश्च
सान्दिह्यमानार्थकताह्यविशिष्टा-४-अतःप्रतीयमानेष्वर्थेषुप्रकर
णौचित्यानौचित्यपर्यालोचनयानिर्णीतार्थकपदप्रायपाठेनैव
विप्रतिपन्नपदस्याप्यर्थोनिर्णेयः-५-इत्थंचतपश्श्रद्धादिशब्दानां
तद्वाच्येषुप्रजापतिसंवादकर्तृत्वफलप्रदत्वहविरुद्देश्यत्वादिधर्मश्र
वणेनदेवतापरतायाअवर्जनीयतयादेवतात्वव्याप्यधर्माव-च्छि
न्नपरताहृशपदसमभिव्याहारेणविप्रतिपन्नस्यचरणपदस्यापिदे
वतात्वव्याप्यसुदर्शनत्वावच्छिन्नपरत्वंभवदभिहितन्यायेनैवसु
साधंभवति-६-अत्रत्यतपश्श्रद्धादिशब्दादेवताविशेषपराः-७-त

अतपश्शब्दोब्रह्मपरः-छान्दोग्योपनिषदिपञ्चमप्रपाठकेदशमख
ण्डे-तद्यइत्थंविदुर्येचेमेरण्येश्रद्धातपइत्युपासतइत्यत्र मुण्डकोप
निषदिप्रथममुण्डकेद्वितीयखण्डे तपश्श्रद्धेयेह्युपवसन्त्यरण्येशा
न्ताविद्वांसोभैक्षचर्यांचरन्तइत्यत्र—परमंयोमहत्तपइत्यत्रसहस्र
नामाध्याये—एवमन्यत्रापिबहुषुस्थलेषुचतपश्शब्दस्यब्रह्मपरत्व
वदत्रापितत्सम्भवात्—प्रकृतस्थलएव तपसेचरुमित्यत्रविवक्षि
तचरूद्देश्यदेवताभूततपोविषयेयाज्यामन्त्रे—प्रथमजंदेवंहवि
षाविधेम।स्वयम्भुब्रह्मपरमंतपोयत्।सएवपुत्रस्सपितासमाता।त
पोहयक्षंप्रथमं सम्बभूवेत्येवंरूपे—तपश्शब्दवाच्यस्यब्रह्मलि
ङ्गदर्शनेनब्रह्मशब्दनिर्देशेनचतपश्शब्दस्यपरब्रह्मविषयतायास्स्प
ष्टमेवावगमाच्च—८—एवमत्रश्रद्धाशब्दोलक्ष्मीपरः—श्रीविष्णुपु
राणेप्रथमांशनवमाध्याये—मेधाश्रद्धासरस्वतीत्यत्रश्रद्धाशब्द
स्यलक्ष्मीविषयेप्रयोगात्—महाभारतेशान्तिपर्वणि—अष्टा
विंशत्यधिकद्विशततमाध्यायेश्रीवासवसंवादे—अहंश्रद्धाचमे
धाचसन्नतिर्विजितिस्स्थितिरितिलक्ष्म्यैवात्मनःश्रद्धाभिमानि
देवतात्वेनश्रद्धाशब्देननिर्देशात्—एवमत्रैवप्रकरणे—श्रद्धायै
चरुमित्यत्रविवक्षितचरूद्देश्यदेवताभूतश्रद्धाविषये—श्रद्धया
देवोदेवत्वमश्नुते—श्रद्धाप्रतिष्ठालोकस्यदेवी—सानोजुषाणो

पयज्ञमागात्——काममत्सामृतंदुहाना = इतिपुरोनुवाक्या मन्त्रे——श्रद्धादेवीप्रथमजाऋतस्य । विश्वस्यभर्त्रीजगतः प्रतिष्ठा । ताꣳश्रद्धाꣳहविषायजामहे । सानोलोकममृतंदधातु । ईशानादेवीभुवनस्याधिपत्नी ॥ इतियाज्या मन्त्रेच—अस्येशानाजगतोविष्णुपत्नीत्यादिश्रुत्यन्तरप्रतिपन्नलक्ष्मीधर्मप्रतिपादकत्वदर्शनाच्च-९-एवमत्रसत्यशब्दोपिब्रह्मपरः अत्रैवप्रकरणे——सत्यायचरुमित्यत्राविवक्षितचरूद्देश्यदेवताभूतसत्यविषये——आगात्सत्यꣳहविरिदंजुषाणम् । यस्माद्देवाजज्ञिरेभुवनंचविश्वे । तस्मैविधेमहविषाघृतेन ॥ अथा देवैस्सधमादम्मदेम । इतिपुरोनुवाक्यामन्त्रे——यस्यप्रतिष्ठोर्वन्तरिक्षम् । यस्माद्देवाजज्ञिरेभुवनंचसर्वे । तत्सत्यमर्चदुपयज्ञंनआगात् । ब्रह्माहुतीरुपमोदमानम् ॥ इति याज्यामन्त्रेच——सत्यशब्दवाच्यस्यपरब्रह्मासाधारणधर्मप्रतिपादनात्——साक्षाद्ब्रह्मशब्देनैवनिर्देशात्——बृहदारण्यकोपनिषदष्टमाध्यायाद्वितीयब्राह्मणे—तेयएवमेतद्विदुर्येचामीअरण्येश्रद्धाꣳसत्यमुपासतइत्यत्रसत्यशब्दस्यब्रह्मणिप्रयोगात्——छान्दोग्योपनिषदष्टमप्रपाठकतृतीयखण्डे-तस्यहवाएतस्यब्रह्मणो नामसत्यमितीतिसत्यशब्दस्यब्रह्मनामत्वाभिधानाच्च-१०--एव

मत्रत्यमनश्शब्दोपिवासुदेवादिभगवद्व्यूहान्तर्गतप्रद्युम्नविषयः तस्यमनोभिमानिदेवतात्वात्——परमकारणात्परब्रह्मभूताद्वासुदेवात्सङ्कर्षणोनामजीवोजायते । सङ्कर्षणात्प्रद्युम्नसंज्ञम्मनाजायते । तस्मादनिरुद्धसञ्ज्ञोऽहङ्कारोजायते ॥ इतिपञ्चरात्रवचने—महाभारतशान्तिपर्वणिचत्वारिंशदधिकत्रिशततमेश्रीनारायणीयोपाख्यानेषष्ठेचाध्याये समनस्सर्वभूतानांप्रद्युम्नः परिपठ्यतइत्यत्र——सङ्कर्षणाच्चप्रद्युम्नोमनोभूतस्सउच्यतइत्यत्रचप्रद्युम्नस्यमनस्तत्त्वाधिष्ठायिदेवतात्वेनमनश्शब्दवाच्यत्वावगमनात्——एवमत्रैवप्रकरणे——मनसेचरामित्यत्राविवक्षितचरुद्देश्यदेवताभूतमनोविषये——मनसोवशेसर्वमिदंबभूव । नान्यस्यमनोवशमन्वियाय । भीष्मोहिदेवस्सहसस्सहीयान् । सनोजुषाणउपयज्ञमागात् ॥ इतिपुरोनुवाक्यामन्त्रेआकूतीनामधिपतिंचेतसांच । सङ्कल्पजूतिंदेवंविपश्चितम् । मनोराजानमिहवर्धयन्तः । उपह्वयेस्यसुमतौस्याम । इतियाज्यामन्त्रेच——मनश्शब्दवाच्यस्यदेवत्वविपश्चित्त्वप्रार्थनाविषयत्वादिदेवासाधारणधर्मप्रतिपादनेनमनश्शब्दस्यकेवलेन्द्रियवाचकत्वासम्भवेनदेवताबोधकत्वस्यावश्यकतयाप्रसिद्धमनोभिमानिप्रद्युम्नदेवताविषयत्वस्यदुर्वारत्वाच्च—११—इत्थंचात्रमनश्शब्द

स्यमद्युम्नदेवताबोधकत्वेनेन्द्रियत्वव्याप्यधर्मावच्छिन्नबोधक
त्वाभावात्तपश्श्रद्धादिशब्दानामपितथात्वाभावाच्च भवदनुकूल
भायदर्शनमेवासिद्धम्-१२-सिद्धंचप्रत्युतास्मदनुकूलमेवप्रायद
र्शनम्—तपआदिशब्दानांदेवतात्वव्याप्यधर्मावच्छिन्नबोधक
त्वात्-तस्यताद्दशशब्दसहचरितचरणशब्दस्यसुदर्शनदेवतापर
त्वौपयिकत्वाच्च-१३-एतेन-यद्वाचरणशब्दआचारवचनः-रम
णीयचरणारमणीयांयोनिमापद्यन्तइत्यादिश्रुत्यादिषुचरणशब्द
स्याचारेप्रयोगदर्शनात्-अनुष्ठेयतपश्श्रद्धासत्यसाहचर्याच्च-
नचमनसाप्रायपाठबाधः—अनुष्ठेयैकप्रवणसङ्कल्पविकल्पात्म
कमनसएवमनश्शब्देनाभिधानात्-एवंचप्रायपाठानुरोधाच्चरण
शब्दस्यानुष्ठेयाचारपरत्वमेवयुक्तम्—नत्वननुष्ठेयसुदर्शनपरत्व
मितिवर्णनमपिनिरस्तम् = तंतपोब्रवीत् = तंश्श्रद्धाब्रवीत्
तंस्सत्यमब्रवीत् = तम्मनोब्रवीत् = तंचरणमब्रवीत् = इ
त्यादिभिः = तपसेचरुम् = श्रद्धायैचरुम् = सत्यायचरुम्
मनसेचरुम् = चरणायचरुम् = इत्यादिभिश्चप्रकरणस्थवा
क्यैःप्रजापतिसंवादकर्तृत्वचरूद्देश्यदेवतात्वादिधर्माणांदेवतावि
शेषरूपचेतनासाधारणानांतपश्शब्दादिशब्दवाच्येषुप्रतीतेः-एव
मन्येषामपिदेवताविशेषासाधारणधर्माणांप्रागुदाहृततत्ताद्विषयपु

रोनुवाक्ययायाज्यारूपमन्त्रैः प्रतिपाद्यमानतायाः प्रागुपपादनेचात्र त्यतपश्श्रद्धादिशब्दानांदेवताविशेषपराणांसतामनुष्ठेयाचेतनक्रियामात्रपरत्वस्यकथंचिदपिवक्तुमशक्यत्वेनानुष्ठेयपरानेकपदसाहचर्यरूपानुष्ठेयप्रायपाठस्याप्यसिद्धेः—अर्चिमत्—ज्योतिष्मत्—भ्राजमानम्—महस्वत्—इत्यादिविशेषणानांचरणपदस्यपादेन्द्रियपरत्वइवाचारपरत्वेप्यन्वयासामञ्जस्यस्यदुर्वारत्वात्—सुदर्शनपरत्वएवसङ्गतत्वेनरथकाराधिकरणन्यायेनयोगाद्रूढेर्बलीयस्तयाचचरणशब्दस्याचारविषययोगमाश्रित्यप्रागुदाहृतवेदनिघण्टूपबृंहणादिप्रमाणगणसिद्धसुदर्शनविषयरूढेः कथञ्चिदपिपरित्यागायोगाच्च—१४—अतएव—धानुष्कयज्वनात्रिवेदीभाष्यकारेणस्वभाष्ये—चरणशब्दः सुदर्शनाभिधायीति—भट्टभास्करेणज्ञानयज्ञाख्यस्वभाष्ये—चरणशब्दोदेवताविशेषपरइतिचव्याख्यातम्—१५—तस्मान्नकथञ्चिदप्यत्रत्यचरणशब्दस्यसुदर्शनादन्यपरत्वंसुवचमिति ॥ ५ ॥

नचात्रतपस्सत्यशब्दयोरुक्तरीत्यापरब्रह्मपरत्वेयागभेदासिद्धिः देवताभेदाभावात्—व्रीहियवयोरन्यतरस्यद्रव्यस्यचोदकशास्त्रेणोभयत्रतुल्यतयैवप्राप्त्याद्रव्यभेदस्याप्यभावादितिवाच्यम्—त्यज्यमानहविरुद्देश्यतावच्छेदकतपस्सत्यशब्दयोग

शक्यतावच्छेदकाविशेषणभेदेनताहशाविशेषणावाच्छिन्नहाविरुद्दे
श्यत्वभेदात्तन्निबन्धनयागभेदसम्भवात्——ईदृशभेदानिबन्धन
यागभेदस्यपूर्वतन्त्रेसुप्रसिद्धत्वाच्च ॥ ६ ॥ किंबहुना——तप
श्श्रद्धादिशब्दवाच्यानामचेतनत्वेतदुद्देश्यकयागस्यशास्त्रेणविधा
नायोगाद्देवतापलापवादस्याप्रामाणिकत्वाच्चतपश्श्रद्धादिशब्दा
नांदेवतापरत्वंदुर्वारमेवेतिचरणशब्दस्यपादेन्द्रियपरत्वमाचारप
रत्वंचनकथञ्चिदपिसम्भवदुक्तिकम्——नापितदानीम्मन्त्रघटक
पदानामीषदप्यन्वयसामञ्जस्यंसम्भवतीतिविमृशन्तुविद्वांसः ७।
नच——तपश्श्रद्धादिशब्दानामचेतनभूततत्तत्पुरुषधर्मपरत्वमे
वास्मदुक्तरीत्यावर्णनीयम्——नतुभवदुक्तरीत्यातत्तद्देवताविशे
षपरत्वम्—तथासतिष्टाक्यार्थसमन्वयोनसम्भवति—तथाहि—
तपश्श्रद्धासत्यमनश्चरणदेवताकानांयागानामकरणे——तपश्श्र
द्धादीनांप्रजापतेश्चसंवादरूपेषु—तंतपोब्रवीदित्यादिषु तत्तत्प्रक
रणेषु अथतेसत्यंतपोभविष्यति अथतेसत्याश्रद्धाभविष्य
तिअथतेसत्यंसत्यंभविष्यति अथतेसत्यम्मनोभविष्यति—अथ
तेसत्यंचरणंभविष्यति——इत्यादिवाक्यैःप्रजापतेस्स्वसम्बन्धि
तपश्श्रद्धादीनांसत्यत्वसिद्धिपूर्वकस्वर्गप्राप्तिरूपंफलंभविष्यती
त्युक्तम्——ततश्चतत्तद्यागेकृते——ततोवैतस्यसत्यंतपोऽभवदि

त्यादिभिस्तत्तत्प्रकरणवाक्यैःप्रजापतेस्तादृशफलंजातमितिपर
कृतिन्यायेनोक्तामरोचनांकृत्वाऽन्यस्यापितत्तद्यागकर्तुः = स
त्यꣳहवाअस्यतपोभवति—अनुस्वर्गंलोकंविन्दति—यएतेनहवि
षायजते—इत्यादिभिस्तत्तत्प्रकरणवाक्यैस्तादृशफलंसिध्य
तीतिप्रतिपाद्यते = अत्रतपश्श्रद्धादिशब्दवाच्यानांदेवताविशे
षरूपत्वेतेषांप्रजापतिसम्बन्धित्वंतत्तद्यष्ट्रन्तरसम्बन्धित्वंप्रजाप
तिनातत्तद्यष्टृभिश्चतत्तद्यागकरणानन्तरंसत्यत्वसिद्धिश्चेत्येतत्प्र
तिपाद्यमानंनकथञ्चिदप्युपपद्यते—तत्तत्पुरुषधर्मरूपत्वेतुसर्व
मुपपद्यतइतिवाच्यम्—तत्तत्प्रकरणगतेषु = अथतेसत्यंतपो
भविष्यतीत्यादिषुतपःप्रभृतिचरणान्तपदार्थपरेषुवाक्येषुषष्ठ्य
न्तयुष्मच्छब्दसमभिव्याहृतसत्यपदानांकालसम्बन्धित्वरू
पसत्यत्वावच्छिन्नपरत्वेतपश्श्रद्धादिगततादृशसत्यत्वस्यपूर्वमेव
सिद्धस्यतत्तद्यागसाध्यत्वाभावेनानुपपत्तेस्तथापिदुर्वारतयाफल
जनकत्वरूपसत्यत्वावच्छिन्नपरतायाएवस्वीकर्तव्यत्वेनतथास
तिषष्ठ्यन्तयुष्मच्छब्दस्यसन्निहितसत्यशब्दएवसुसङ्गतान्वय
लाभेनव्यवहिततपश्श्रद्धादिशब्दैस्साकमन्वयार्थमपकर्षणानाव
श्यकतयातपश्श्रद्धादिशब्दवाच्यानांप्रजापत्यादिसम्बन्धित्वाप्र
तीत्याऽनुपपत्तिलेशाभावात्—प्रत्युत—व्यवहितान्वयदोष

मप्यविगणय्य षष्ठ्यन्तयुष्मच्छब्दमपकृष्य तपश्श्रद्धादिशब्दैस्सा कमन्वयेतेषांचाचेतनभूतपुरुषधर्ममात्रपरत्वेचस्वीकृते—तंतपो ऽन्नीदित्यादिषु तत्तत्प्रकरणेषु = अहमुवैतपोऽस्मि—मांनुयज स्व = अहमुवैश्श्रद्धास्मि—मांनुयजस्व—अहमुवैसत्यमस्मि— मांनुयजस्व = अहमुवैमनोस्मि—मांनुयजस्व—अहमुवैचरण मस्मि—मांनुयजस्व—इतिवाक्यैस्तपश्श्रद्धादीनांप्रजापतिंप्रति स्वसञ्ज्ञायष्टव्यतयोःकथनप्रतिपादनेनतदनुपपत्तेर्वेजलेपायित त्वापत्तेश्च ॥ ८ ॥ यदिचतद्दोषपरिहाराय तपश्श्रद्धादिशब्दा नांतपश्श्रद्धाद्यभिमानिदेवतापरत्वंस्वीक्रियते—तदातासां— प्रजापत्यादिसम्बन्धित्वान्वयानुपपत्तिस्तवापिदुरुद्धरैवेतिषष्ठ्य न्तयुष्मच्छब्दस्यास्मदुक्तरीत्यासत्यशब्दएवान्वयस्स्वीकरणी यइतिपर्यायेणास्मत्पक्षएवपरिगृहीतोभवति—देवतापरताया आवश्यकत्वेरूढ्यादिवृत्त्याऽस्मदुक्तदेवताविशेषपरतयाऽन्य— त्रप्रसिद्धानाममीषांशब्दानामिहतदन्यपरत्वेप्रमाणस्यतत्परग्र— हणेकारणस्यचदुर्लभतयातत्परतयैवाविश्रमात् ॥ ९ ॥ नचतपश्श्रद्धादिशब्दानांतपःप्रभृतितत्तत्पदार्थाभिमानिदेवतात्व रूपेणतत्तद्देवतोपस्थापकत्वंस्वीकृत्यतदेकदेशभूततपश्श्रद्धादि षुषष्ठ्यन्तयुष्मच्छब्दार्थस्यान्वयस्वीकारेनास्माकंक्षतिरितिवा

च्यम्—तपस्सत्यशब्दयोर्ब्रह्मणि चरणशब्दस्य सुदर्शने च रूढेस्सत्वेन तेषां शब्दानामन्यार्थपरत्वं स्वीकृत्य तत्परतायाः प्रहाणे कारणाभावेन तत्परत्वस्वीकारस्यावर्जनीयतया तत्स्वीकारे च भवदभिमतरीत्या षष्ठ्यन्तयुष्मच्छब्दार्थस्यैकदेशान्वयासम्भवात्—कथञ्चित्तत्सम्भवेपि व्यवहितान्वयैकदेशान्वयरूढिपरित्यागलक्षणदोषत्रयप्रसङ्गाच्चास्मदभिमतरीत्या युष्मच्छब्दार्थान्वयस्वीकारस्यैव युक्तत्वात् ॥ १० ॥ किं बहुना[1]—तपश्श्रद्धाद्यभिमानिदेवतानां प्रकरणोक्ताभिरिष्टिभिरिष्टानां स्वाभिमानगोचरतपश्श्रद्धादिनिष्पादनद्वारा प्रकरणविवक्षितपरलोकप्राप्तिसाधनत्वसम्भवेन तदभिप्रायद्योतनोद्देशेन तपश्श्रद्धादिशब्दानां तपश्श्रद्धाद्यभिमानिदेवतात्वावच्छिन्नपरत्वस्य कथंचित्सम्भवदुक्तिकत्वेपि पादेन्द्रियाभिमानिदेवतायाश्चरणयागेनेष्टायाः पादेन्द्रियनिष्पादनद्वारेणैव प्रकरणाभिमतपरलोकप्राप्तिसाधनतायावक्तव्यतया पादेन्द्रियस्य परलोकगत्यनुपकारकत्वेन कथञ्चिदपि तदसम्भवाच्चरणशब्दस्य पादेन्द्रियाभिमानित्वविशिष्टदेवतात्वावच्छिन्नपरत्वं न कथञ्चिदपि प्रकरणसङ्गतं सम्भवदुक्तिकम्[2]-चरणशब्दस्य पादेन्द्रियपरत्वे अर्चिमत्-ज्योतिष्मद्भ्राजमानम्महस्वत्-इति विशेषणानामन्वयानुपपत्तिश्च दुरुद्धरा[3] =

एवम्—येनपूतस्तरतिदुष्कृतानीतिशुद्धिकरणत्वेनप्रसिद्धत्वान्निर्दे
शःपवित्रशब्दनिर्देशोलोकस्यद्वारमितिनिर्देशश्चपादेन्द्रियतदभि
मानिदेवतयोर्नकथञ्चिदपिसङ्गतः—४—आचारतदभिमानिदेव
तयोःकथञ्चिदेतत्सम्भवेपि—अर्चिमदित्यादिविशेषणान्वया
नुपपत्तिर्दुर्वारैव—५-अतश्चरणशब्दस्याचाराभिमानित्वविशिष्ट
देवतात्वावच्छिन्नपरत्वमपिनसम्भवदुक्तिकम्-६-सुदर्शनपरत्वे
तुसर्वमिदंसुसंगतंभवति—चरणंशार्ङ्गिणश्चक्रे इतिवेदनिघण्टु
वचनात्—सुदर्शनंसहस्रारंपवित्रंचरणंपविरिति—सुदर्शनंहरे
श्चक्रंपवित्रंचरणंपविरिति—पञ्चायुधानांप्रस्तावे = सुदर्शनमरं
चक्रंपवित्रंचरणंहरेरितिचनैघण्टुकवचनात् = पवित्रंचरणंने
मिःपविश्चक्रंसुदर्शनम्—सहस्रारंप्राकृतघ्नंलोकद्वारम्महौजसम्।
नामानिविष्णुचक्रस्यपर्यायेणनिबोधमइतिपाद्मोत्तरखण्डद्विती
याध्यायवचनात् = पवित्रंचरणंचक्रंलोकद्वारंसुदर्शनम्।पर्या
यवाचकाह्येतेचक्रस्यपरमात्मनइतिश्रीशास्त्रवचनाच्च—सुदर्शनं
स्यचरणपवित्रलोकद्वारादिशब्दवाच्यतायाअवगमात्-ज्वाला
दिमत्त्वप्रसिद्धेः—तापसंस्कारलक्षणशुद्धिविशेषकरणतायाःप्रागु
क्तप्रमाणगणप्रसिद्धत्वाच्च ७ इत्थंचरणशब्दस्यरथकाराधिकर
णन्यायेनरूढिपरित्यागायोगेनसुदर्शनपरतायाआवश्यकतयात

त्र युष्मच्छब्दार्थान्वयासम्भवेनास्मदुक्तरीत्यैवतदर्थान्वयोन्या
य्यः—८-विशयेप्रायदर्शनात्—२—३—१६—इतिपूर्वतन्त्राद्वि
तीयाध्यायतृतीयसूत्रेपिनतावत्प्रायदर्शनमात्रेणार्थनिश्चयोभव
तीत्यभिप्रेतम्——तस्यलिङ्गमात्रत्वेनश्रुतिन्यायाप्रतिकूलोवा
धित्वाऽर्थनिश्चायकत्वायोगात्-९-अपितु-प्रतिकूलश्रुतिन्या
ययोरसतोस्सतिचसन्देहेऽनुकूलन्यायतःप्राप्तौचसत्यांतत्सह
कृतमेवप्रायदर्शनमर्थनिश्चायकंभवतीत्येवाभिप्रेतम् १०अतएव
तत्सूत्रशाबरभाष्येप्युक्तम्——ननुलिङ्गंप्रायदर्शनम्——कथम
नेनासिद्धिरिति——उच्यते—यथाप्रायदर्शनेनासिध्यति——तथा
वर्णयितव्यम्-कथञ्चप्रायदर्शनंहेतुः—न्यायतःप्राप्तौसत्यामिति
-तस्मादेवंन्यायप्राप्तेप्रायदर्शनंद्योतकंभवतीतिच-११-इहचप्रा
गुदाहृतप्रमाणगणसिद्धरूढिबलेनचरणशब्दस्यसुदर्शनविषयश्रु
तिरूपतायादुर्वारत्वेनप्रतिकूलाश्रुतिरस्ति-१२—लोकस्यद्वारम
र्चिमत्पवित्रम्-ज्योतिष्मद्भ्राजमानम्महस्वीदतिविशेषणानांसु
दर्शनेसङ्गतेःपादेन्द्रियादावसङ्गतेश्चप्रतिकूलन्यायोपिदुरपह्नवो
जागर्ति-१३-अतोन्यायतःप्राप्तिरपिसुदर्शनस्यैवदृश्यते १४-न
पादेन्द्रियादेः-१५-एवंसतिश्रुतितदनुकूलन्यायप्राप्तंसुदर्शनपर
त्वंनिरुध्यकथमिहप्रायदर्शनंचरणशब्दंपादेन्द्रियादिपरंनिश्चाय

यितुंशक्नोतीतिन्यायविदःपश्यन्तु—१६—तस्मात्प्रागस्मदुक्तरी
त्यैवयुष्मच्छब्दार्थान्वयोन्याय्यः-१७-किञ्च—व्यवहितान्वयै
कदेशान्वयदोषयोरगणनेषष्ठ्यन्तयुष्मच्छब्दार्थस्यविशेष्यवा
चकपदार्थान्वयेऽस्माकमपिवादोषः-अथतेसत्यंचरणंभविष्य
तीत्यत्रचक्राभिमानिदेवतारूपचरणशब्दार्थैकदेशचक्रेऽङ्कनवि
धयाधृतत्वलक्षणषष्ठ्यर्थसम्बन्धित्वान्वयसम्भवात्—षष्ठ्याउ
पास्योपासकभावलक्षणसम्बन्धपरत्वेतुसर्वत्रैवविशेष्यान्वयस
म्भवेनैकदेशान्वयदोषस्याप्यसम्भवाच्च-१८—तस्मान्नकथञ्चिद
पीहचरणशब्दस्यसुदर्शनपरत्वमपलपितुंशक्यंभवतीतिसुधीभि
रवगन्तव्यम् ॥ ११ ॥ किंच—चरणंपवित्रंविततंपुराणं
वाङ्मयंशुभम् । तेनचक्रेणसन्तमास्तरेयुःपातकाम्बुधिमिति
पाद्मोत्तरखण्डद्वितीयाध्यायवचनोपबृंहितत्वात्—बृहद्धारी
तस्मृतावष्टमाध्याये—श्रौतभगवद्धर्मदीक्षाविधौ—आज्यंहु
त्वाततश्चक्रंतदग्नौप्रतपेद्गुरुः । चरणंपवित्रमितितच्चक्रेणाङ्क
येद्भुजमितितप्तचक्राङ्कनेविनियोगात्—सनकस्मृतौ—वि
ष्णोर्नुकेनमन्त्रेणतापयित्वासुदर्शनम् । चरणंपवित्रमितितद्वा
भ्यामभिमन्त्रयेदितितापसंस्कारप्रकरणेतप्तसुदर्शनाभिमन्त्रणे
विनियोगाच्च—चरणंपवित्रमित्यादिमन्त्रद्वयस्यसुदर्शनपरत्वं

विनाऽन्यपरत्वंनकथञ्चिदपिप्रमाणशरणैर्वक्तुंशक्यम् ॥१२॥
किञ्च—तिरोहितलोकप्राप्त्यर्थंप्रवृत्ततयाप्रकरणप्रतिपन्नास्व
पाघाख्यासुपञ्चस्विष्टिष्वन्तर्भूताचरणोष्टिरियंपरलोकप्राप्त्युपाय
भूतदेवताविशेषविषयैवभवितुमर्हतीति—प्रागुदाहृतपाद्मोत्तरख
ण्डश्रीशास्त्रवचनेषुलोकद्वारसञ्ज्ञायास्सुदर्शनेप्रसिद्धत्वात्—
प्रकृतमन्त्रेपि—लोकस्यद्वारमित्यनेनतादृशसञ्ज्ञाप्रत्यभिज्ञाप
नात्—बृहद्ब्रह्मसंहितायांद्वितीयाध्यायेमहताप्रपञ्चेनसुदर्शनस
म्बन्धंविनाकेनापिप्रकारेणपरमपदस्यदुर्लभताम्—केनचि
त्कारणेनसुदर्शनस्यभगवत्सकाशाद्वरलाभञ्चप्रतिपाद्यतन्मूलक
तयैवलोकद्वारसञ्ज्ञासिद्धेश्चाभिधानात्—अर्थान्तरेतादृशस
ञ्ज्ञाप्रसिद्ध्यभावाच्चसुदर्शनैकविषयाचसाभवितुमर्हतीतिचनि
र्मत्सरंवाक्यार्थपर्यालोचनेप्रवृत्तौविद्विषामपिविदुषांनितरांसुग
मम् ॥ १३ ॥ बृहद्ब्रह्मसंहिताद्वितीयाध्यायेहिलक्ष्मीनारा
यणसंवादप्रकरणेकथितम्—श्रीनारायणउवाच—पूर्वकल्पे
महामायेत्वयासम्प्रार्थितोयदा । जीवानांदेहदानायस्वशक्त्या
ऽकरवंजगत् । सम्पन्नेषुसपालेषुलोकेषुपरमेश्वरि । स्वकर्म
फलभोगायतेह्यसज्जन्तभूयशः । मुक्तिद्वारमुखंतेषांपिनद्धम
जयाहरेः । नतेपश्यन्तिविभ्रान्तास्संसारध्वान्तवर्त्मनि । प

राङ्मुखाभवन्तोयेविषयास्वादलम्पटाः । तान्विलोक्यमहा
त्मानश्चक्रशङ्खादिहेतयः । कृतवन्तस्तपश्चर्यांजपन्तोमामत
न्द्रिताः । नित्यत्वात्तेनकाङ्क्षन्तइहामुत्रार्थसम्पदम् । तथा
पिकरुणाविष्टाः परदुःखेनकातराः । साधवोदीनहृदया
निसर्गात्तुभवन्तिहि । शुद्धसत्त्वात्मकाश्शान्तास्स्वानन्दावृत
मानसाः । एकेनवपुषाविष्णोःपाणिपद्मोपसेविनः । इतरेणै
ववपुषाकुर्वन्तिस्मपरंतपः । अतिदीर्घेणकालेनप्रसन्नोऽहमवमा
गतः ॥ श्रीभगवानुवाच ॥ किमर्थमिहतप्यध्वेहेतयोममव
ल्लभाः । अष्टाक्षरमहाविद्यामुपासीनाजितेन्द्रियाः । नित्या
नांनावशेषंहिप्राप्यंभोग्यम्मनागपि । सत्यसङ्कल्पवत्त्वात्किमु
च्यतामवशेषितम् ॥ हेतयऊचुः ॥ जयलक्ष्मीपतेदेवसर्व
कारणकारण । नित्यानन्दनिजाकारनास्माकमवशेषितम् ।
सदैकरूपास्तेपादपद्मैकरससेविनः । तथापिजीवान्संलक्ष्यमु
ह्यामोमाययावृतान् । निस्तारंनप्रपश्यामोदुस्तराद्भववारिधेः ।
वयंकर्तुंसमर्थास्स्मस्सर्वम्मोक्षंविनाप्रभो । मोक्षोहितेहस्तगतो
नान्योमोक्षस्यहिप्रभुः । सर्वंकर्तुंसमर्थास्स्मःप्रसादात्तेरमापते ।
तवाखिलजनावासमोहिन्यामाययासितम् । जगदेतन्नजाना
तिमोक्षद्वारम्मनागपि । रुदन्तिनरकेकेचित्केचिद्रोगाभिपी

डिताः । भ्रमन्तिमरुकान्तारेपिशाचाजलवर्जिताः । स्वर्गा
र्थिनोभवन्त्येकेकर्मैवप्रवदन्तिते । अन्यदेवसमत्वेनत्वामेके
समुपासते । आत्मानंत्वदभेदेनमाययाभेदमाश्रिताः । विमु
क्तकर्ममार्गास्तेतमएवाभियान्तिहि । त्वमात्मासर्वजीवानां
सखासित्वंरमापते । कोऽन्योमोचयितामीषामुपायंदेहिसत्त
म । प्रावोचंतदहंदेविचक्रंतेजोमयंमहत् ॥ श्रीभगवान् ॥
वत्ससंचिन्तितंसम्यकृत्वमेवोपायतांव्रज । आत्मानमनुगच्छं
स्त्वंसाक्षान्मत्प्रीतिभाजनम् । मयासंलालितःपाणौदीनानाम
नुकम्पया । आधारस्सर्वविद्यानामविद्यांनाशयाम्यहम् ।
कृत्वास्वतेजसोभिन्नंत्वामेकंसदृशम्मया । तेजसातवतीव्रेण
मायैषामामुपास्थिता । नहिशक्ताऽभिभवितुंदह्यमानासमन्त
तः । सर्वदाधारयाम्यङ्गकरेसर्वेश्वरोप्यहम् । कृतास्वतेज
सोभिन्नंत्वामेकंसदृशम्मया । त्वांविनानकरोम्यङ्गसंहारंदुष्टचे
तसाम् । प्रत्यक्षंपश्यतांसम्यकृस्वतन्त्रोपिसुदर्शन । खं
ण्डिताधारयाऽभीतेदैत्यदानवराक्षसाः । यास्यन्तिमत्पदंशुद्धं
विनाज्ञानेनचाध्वरैः । येतुत्वांश्रद्धयासम्यक्संताप्य
दक्षिणेभुजे । दक्षिणेधारयिष्यन्तिस्यात्तेभ्यः परमाग
तिः । त्वामाहप्रथमावाणीममपाणिविभूषणम् । पवित्रं

चरणंनेमिंलोकद्वारम्महौजसम् । मांप्रकोप्ययदंगन्तुमिच्छन्तिममवैष्णवम् । तानाशुधारयातेहंहत्वादद्यांपरांगतिम् । प्रसाद्यमामितोयेतुगन्तुमिच्छन्तिमानवाः । प्रताप्याचार्यरूपेणनयामिपरमांगतिम् । सुदर्शनगतिर्नृणांद्विधासन्निश्चितामया । तापेनधारयावापिसतामप्यसतामथ । गतिर्नास्तिगतिर्नास्तिगतिर्नास्तित्वयाविना । गतिर्नास्तिगतिर्नास्तिह्याचार्येणमयाविना ॥ इति—किञ्चिदुत्तरत्र—अनायुधासोअसुरानदेवाइतिवैश्रुतिः । इहामुत्रचतेषांवाआसुरोभावउच्यते । आसुरोविद्यतेभावोयावदेषांद्विजन्मनाम् । नतावदधिकारोस्तिममाराधनकर्मणि । नाधिकारोचनेयावन्मोक्षाशाविद्यतेकुतः । मुक्तिद्वारंत्वमेवातस्सहस्रारनिशामय ॥ इतिच ॥ १४ ॥ अत्राहि—त्वामाहप्रथमावाणीममपाणिविभूषणम् । पवित्रंचरणंनेमिंलोकद्वारंमहौजसमितिश्लोके । लोकस्यद्वारमितिप्रकृतानिर्देशमेवाविवक्षितंपवित्रचरणशब्दसहोपात्तलोकद्वारशब्देनप्रत्याभिज्ञाप्यतादृशसञ्ज्ञामूलमुपाख्यानमाभिधाय—मुक्तिद्वारंत्वमेवातस्सहस्रारनिशामयेतिदर्शितोपाख्यानसिद्धनिमित्तमूलकतयैवतादृशसञ्ज्ञाप्रवृत्तिरितिनिगमितम् ॥ १५ ॥ यथाचकाठकाहि

तायप्रपाठकाष्टमानुवाकेकठोपनिषत्प्रथमवल्ल्यांच श्रूयमाणे
नाचिकेतोपाख्यानेनाचिकेतस्सम्बन्धविशेषेणमृत्युवरप्रदानब
लादग्निविशेषस्यनाचिकेतसञ्ज्ञासिद्धिरभिधीयते——तथैवोदा
हृतबृहद्ब्रह्मसंहितास्थभगवद्दिव्यायुधोपाख्यानेपरमपदप्राप्तिहेतु
मोक्षमार्गसम्बन्धविशेषेणभगवद्दिव्यायुधाग्रगण्यस्यसुदर्शनस्य
भगवद्वरप्रदानबलेनलोकद्वारसञ्ज्ञासिद्धिरभिधीयतइतिलोक
स्यद्वारमित्ययंशब्दइहनकथञ्चिदप्यन्यगामीभवितुमर्हति १६॥
योग्निंनाचिकेतंचिनुतइत्यादौ——यएवंविद्वांश्चिनुतेनाचिकेत
मित्यादौचश्रुतिघटकाग्निविशेषविषयनाचिकेतसञ्ज्ञानाचिके
तस्सम्बन्धविशेषनिबन्धनामृत्युवरप्रदानात्सिद्धेतिहिस्पष्टमुक्तम्
कठोपनिषत्प्रथमवल्ल्याम्——एषतेग्निर्नाचिकेतस्स्वर्ग्योयमवृ
णीथाद्वितीयेनवरेण। एतमग्निंतवैवप्रवक्ष्यन्तिजनासइति १७॥
प्रकृतोपाख्यानेपि——वत्ससाश्चिन्तितंसम्यक्त्वमेवोपायतांव्रजे
ति——त्वामाहुःप्रथमावाणीसमग्राणिविभूषणम्——पवित्रंचरणं
नेमिंलोकद्वारंमहौजसामिति——गतिर्नास्तिगतिर्नास्तिगतिर्ना
स्तित्वयाविनेति——मुक्तिद्वारंत्वमेवातस्सहस्रारनिशामयेतिच
भगवदुक्त्याभगवद्दिव्यायुधराजस्यसुदर्शनस्यापिनिरवधिकद
यामूलसंसारिचेतनोज्जिजीवयिषायत्ततपःप्रवृत्तिविशेषप्रसन्नभ

गवद्दत्तवरमहिमनिबन्धनैवलोकद्वारसञ्ज्ञाप्रसिद्धिरितिहिस्पष्ट
मवगम्यते ॥ १८ ॥ उक्ताख्यानसिद्धचरितसजातीयच
रित्रविशेषयोःप्रतिकल्पनियतभावितयातदधीनयोर्द्वयोरपिसं
ज्ञयोरनादित्वश्रुतिघटकत्वोपपत्तिस्तुल्या ॥ १९ ॥ नन्वसु
दर्शनस्यलोकद्वारसञ्ज्ञेयंदर्शितोपाख्यानतएवमुक्तिलोकप्राप्त्यु
पायत्वनिबन्धनाऽवगम्यते—ताहशीसञ्ज्ञानेहोपकारिणीभ
विष्यति—देवेभ्योवैस्वर्गोलोकस्तिरोभवत् । तेप्रजापतिम
ब्रुवन् । प्रजापतेस्वर्गोवैनोलोकस्तिरोभूत् । तमन्विच्छे
ति—इत्युपक्रमेणात्रप्रतिपाद्यमानानामपाख्यानादिष्टीनां
स्वर्गलोकप्राप्त्यर्थतायाएवावगमादितिवाच्यम्—अत्रत्यस्व
र्गलोकशब्दस्य—तेहनाकम्महिमानस्सचन्ते—इत्यत्रनाकश
ब्दस्येव—कठोपनिषत्प्रथमवल्ल्याम्—स्वर्गेलोकेनभयंकि
ञ्चनास्तिनतत्रत्वंनजरयाबिभेति । उभेतीर्त्वाअशनायापिपा
सेशोकातिगोमोदतेस्वर्गलोके ॥ सत्वमग्निंस्वर्ग्यमध्येषिमृ
त्योप्रब्रूहितंश्रद्दधानायमह्यम् । स्वर्गलोकाअमृतत्वंभजन्तए
तद्द्वितीयेनवरेण—इत्यत्रत्यस्वर्गशब्दस्येवचपरमपदपरत्वात्-
देवशब्दस्यभगवदनन्यभक्तपरतासम्भवस्यप्रागुपपादिततयाऽत्र
त्यदेवशब्दस्यापितद्विषयत्वसम्भवेनस्वारस्यातिशयस्याप्यनप

वादात्—नाइष्टयइत्याचक्षतेपरोक्षेण । परोक्षप्रियाइवहिदे वाइतिवाक्यशेषेणास्मिन्प्रकरणेरहस्यभूतस्यार्थस्यपरोक्षानिर्देशेनैवनिर्दिश्यमानत्वावगमेनयथोक्तलक्षणार्थस्यैवैतत्प्रकरणाविवक्षितताया युक्तत्वात्—परमपदप्राप्त्यौपयिकविलक्षणशक्तिविशेषसम्पन्नस्यसुदर्शनस्यप्रसिद्धावार्चीनस्वर्गप्राप्त्यौपयिकतायाअपिकैमुतिकन्यायसिद्धायाः—देवासःपितरोयेनविधृतेनबाहुनासुदर्शनेनप्रयतास्स्वर्गंलोकमायन्नित्यादिप्रागुदाहृतश्रुत्यापिप्रतिपन्नायादुरपह्नवतया—ऽन्नत्यदेवस्वर्गशब्दयोःप्रसिद्धार्वाचीनदेवस्वर्गपरत्वेपिक्षत्यभावाच्च ॥ २० ॥ तस्मात्सर्वथाऽनयोर्मन्त्रयोस्सुदर्शनपरत्वंसौदर्शनकर्मविनियोगश्चेत्येतदेवमुख्यंभवितुमर्हतीतिनैतत्कथञ्चिदप्यन्यथाकर्तुंशक्यमितिसिद्धम् ॥ २१ ॥ इत्थंच—माधवीयवेदार्थप्रकाशान्तर्गतंचरणशब्दस्यविकल्पतःपादेन्द्रियाचारान्यतरपरत्वमाश्रित्य—चरणंपवित्रमित्यादिप्रथममन्त्रव्याख्यानम्—चरणशब्दस्यचरणाख्यदेवतास्वरूपपरत्वमाश्रित्य—लोकस्यद्वारमित्यादिद्वितीयमन्त्रव्याख्यानंचस्वमताभिनिवेशेनैवतथाकृतमितिसिद्धंभवति—अन्यथा—भट्टभास्करादिभिस्स्फुटमेवसुदर्शनाख्यदेवताविशेषपरतयाव्याख्यातयोःप्रमाणान्तरानुरोधेनशब्दस्वार

स्येन च तथैव प्रतीयमानयोरनयोर्मन्त्रयोरन्नैवं व्याख्यानेकारणा न्तरादर्शनात्—उभयोर्मन्त्रयोरेकार्थपरचरणशब्दघटिततयै कविषयत्वेन स्फुटमवगम्यमानयोः प्रथमे चरणशब्दस्य पादेन्द्रियाचारान्यतरपरतया—द्वितीये चरणशब्दस्य देवतास्वरूपपरतया च व्याख्याने कारणाभावात्—देवतास्वरूपस्य सुदर्शनदेवताभिन्नत्वस्वीकारे कारणाभावाच्च ॥ २२ ॥ एवं विशेषणान्वयासामञ्जस्यं पदानामस्वारसिकार्थपरतास्वीकारासामञ्जस्यं च तत्र द्रष्टव्यम् ॥ २३ ॥ एतेन—एतद्व्याख्यानमूलकतयास्वोत्प्रेक्षामूलकतया चार्वाचीनभास्करकल्पितास्सर्वा अपि योजना निरस्ता वेदितव्याः—उक्तदूषणानां सर्वत्र तुल्यत्वात्—स्वारसिकमुख्यार्थनिर्वाहे सम्भवति क्लिष्टकल्पनाया अयुक्तत्वाच्च ॥ २४ ॥ ताः खलु योजना अर्वाचीनभास्करेण दुराग्रहमात्रेणात्यन्तासम्बद्धमेव जल्पिताः—विदुषामुद्धृत्य परिहर्तुमप्ययोग्यत्वाद्ग्रन्थगौरवभयाच्चने होद्धृत्य विविच्य परिहृता इति वेदितव्यम् ॥ २५ ॥ प्राचीनैनैतन्मतस्थैर्यैव द्वारकाशङ्करमठपतिपरम्पराघटकेनाच्युताश्रमसंन्यासिना सुदर्शनधारणप्रमाणतया—चरणं पवित्रमित्यादिमन्त्रोदाहरणं कृतम्—रामनाममाहात्म्यग्रन्थ इत्यनेनापि तदर्वाचीनकृतानि विरुद्धव्याख्यानान्या

ग्रहमूलानीतिसुगमंसुधियाम् ॥ २६ ॥ तस्मात्——चरुं पवित्रमित्यादिमन्त्रद्वयस्यसर्वथासुदर्शनधारणपरत्वंदुर्धर्षमिति सिद्धम् ॥ २७ ॥ अथऋक्सामपठितस्यचमूषन्मन्त्रस्यः तिवादिदुर्वादैस्सुदर्शनादिदिव्यायुधधारणपरत्वंदुर्धर्षमितिस्था प्यते ॥ २८ ॥ अत्राहार्वाचीनभास्करः——चमूषन्मन्त्र स्यापिनचक्रधारणपरत्वम्——तस्यसोमप्रशंसापरत्वात्——त थाचानुक्रम्यते——प्रसेनानीश्चतुर्विंशतिर्दैवोदासिःप्रतर्दनइति— तस्यायमर्थः—प्रसेनानीरितिचतुर्विंशत्यृचंसूक्तंदिवोदासपुत्रस्य प्रतर्दनस्यराजर्षेरिदंत्रैष्टुभंपवमानसोमदेवताकमिति——तथाचा यमर्थः——चमन्तिभक्षयन्त्यत्रेतिचम्वश्चमसाः——तेषुसीदन्— श्येनः——शंसनीयः——शकुनः——शक्तः——विभृत्वा——पात्रे षुविभरणशीलः——गोविन्दुः——गवांलम्भकः——विन्दुरिच्छु रित्युप्रत्ययान्तोनिपातः——द्रप्सः——द्रवणशीलः——आयुधा नि——स्फ्यकपालादीनि——स्फ्यश्चकपालानिचाग्निहोत्रहवणी चशूर्पश्चकृष्णाजिनंचोलूखलंचमुसलंचशम्याचदृषच्चोपलाचै तानिवैदशयज्ञायुधानीतिश्रुतौस्फ्यादीनामायुधशब्देनोपादा— नात्——बिभ्रत्——धारयन्—अपाम्—उदकानाम्—ऊर्मिम्— ——प्रेरकम्——समुद्रम्——अन्तरिक्षलोकंवा——सचमानः—

महिषः—महान्—एवंविधस्सोमः—तुरीयं । धाम—पृथिव्यन्तरि
क्षद्युलोकापेक्षयातुरीयंचन्द्रमसः स्थानम्—विवक्ति—सेवते—
इति ॥ २९ ॥ तदसत्—यथापाठक्रममेकैकप्रकरणग
तसर्वमन्त्राणांविनियोगस्थलेषु—तेषांसाक्षात्स्वाभिमतार्थपर
त्वासम्भवेपिमन्त्राणांजपपाठादिभिरदृष्टविशेषाधायकताया
स्स्वाभाविकतयाजपपाठादिमूलादृष्टद्वारायथाकथंचित्स्वाभिम
तार्थातिशयाधायकताया अपिसम्भवमात्राभिप्रायेणैवमहर्षिभि
स्तत्रतत्रविनियोगात् तत्तत्प्रकरणगतसर्वमन्त्राणांतादृशविनि
योगपरमोद्देश्यभूतैकार्थपरतास्वीकारस्यानावश्यकत्वात्—
अशक्यत्वात्—वैदिकसम्प्रदायासिद्धत्वाच्चतादृशविनियोग
मात्रेणमन्त्राणांसर्वथास्ववटकशब्दसन्दर्भाद्यलभ्यार्थविशेषप
रतोन्नयनस्यतदुपष्टम्भेनातिक्लिष्टकल्पनयातादृशासंबद्धार्थवर्ण
नस्यचवैदिकसम्प्रदायानभिज्ञाव्युत्पन्नकृत्यमात्रत्वात् ॥ ३० ॥
अतएवाहिबौधायनकल्पसूत्रे—एतेनारुणकेतुकोव्याख्यातो
यावन्मन्त्रमाविष्टकाइतियजुर्वेदारण्यकप्रथमप्रपाठकस्थानां
सर्वेषाम्मन्त्राणांस्वस्वप्रतिनियतभिन्नाभिन्नार्थानामेवसतामारु
णकेतुकाग्निचयनोपयोगिमनःकल्पितजलमयेष्टकोपधानकर्मणि
विनियोगवर्णनंसङ्गतम् ॥ ३१ ॥ तेषांमन्त्राणांस्वरसतस्स्व

स्वशब्दसंदर्भादिलभ्यंप्रतिनियतंतन्तमर्थमपहायसाक्षादुक्तेष्टका
परत्ववर्णनंनकेनापिकृतमिति——विनियोगनिर्वाहश्चतत्तदनुस
न्धानाविशेषपूरणादिभिर्यथाकथञ्चित्सङ्गतःकृतस्तत्रतत्रतैस्तै
रितिचप्रागेवावेदितम् ॥ ३२ ॥ इदमत्रावधेयम्——स्वस्व
पदसन्दर्भादिभिःपरस्परविभिन्नार्थकतयाप्रस्फुटमवगम्यमानानां
बहूनाम्मन्त्राणांसमुदायस्ययथापाठक्रममेवसामान्यतःक्वचिदे
कत्रविनियोगोनतेषांसर्वेषाम्मन्त्राणामेकार्थपरताव्यवस्थाप
कोभवितुमर्हति-स्वारसिकप्रस्फुटशब्दस्वभावमतिलङ्घ्यबहूना
मतिक्लिष्टकल्पनयाऽर्थान्तरकल्पनस्यान्याय्यत्वात्—अन्यथा
सर्वस्यसर्वार्थपरताप्रसङ्गस्यदुर्वारत्वात्——लाघवेनानुसन्धान
विशेषपूरणादिभिर्बहूनामेकरूपेणैवनिर्वाहस्यन्याय्यत्वाच्च——
अपितुमन्त्रव्यक्तिविशेषस्यपाठक्रमापेक्षानियममन्तरेणैवक्वचि
द्विषयविशेषेव्यावृत्ततयाविनियोगएवतादृशविषयविशेषपरता
व्यवस्थापकोभवितुमर्हति——तथाच——उक्तानुक्रमणिकाया
उदाहृतबोधायनकल्पसूत्रवत्प्रकरणपठितसर्वमन्त्राणांसमुदाय
स्ययथापाठक्रममेवसामान्यतोविनियोगप्रदर्शनपरतावगमेननता
दृशाविनियोगमात्रेणचमूषन्मन्त्रस्यस्वारसिकस्वशब्दसंदर्भादि
स्वभावमतिलङ्घ्यसोमपरतावर्णनमावश्यकम्—यथावस्थित

स्वार्थपरतामविहायैवानुसन्धानपूरणादितस्समुदायसामान्यावि
नियोगनिर्वाहन्यायस्येहापिसम्भवेनयथाकथंचित्सोमप्रशंसापर
तायास्सूपपादत्वादिति ॥ ३३ ॥ शब्दसन्दर्भादिस्वरसपर्या
लोचनेचचमूषन्मन्त्रस्यनकथंचिदपिसोमपरत्वंसम्भवति ३४॥
नहिखल्वस्मिन्मन्त्रेकश्चिदपिसोमासाधारणश्शब्दोदृश्यते। ३५॥
अतोत्राश्रुतत्वात्सन्दर्भालभ्यत्वाच्चात्यन्तानुपस्थितस्यसोमइति
विशेष्यवाचकपदस्याध्याहरणमयुक्तमेव ॥ ३६ ॥ किञ्च
कृष्णयजुर्ब्राह्मणेतृतीयाष्टकद्वितीयप्रपाठके तृतीयस्यामितो
दिविसोमआसीदितिश्रवणेनसोमस्यपृथिव्यादितृतीयस्थानाव
स्थिततायाएवश्रुतिप्रसिद्धतया अस्यमन्त्रस्यसोमपरत्वेतुरी
यंधाममहिषोविवक्तीत्येतदत्यन्तविरुद्धम् ॥ ३७ ॥ यत्तु
चान्द्रमसलोकस्यतुरीयत्वंच यमःपृथिव्याः वायुरन्तरि
क्षस्य सूर्योदिवः चन्द्रमानक्षत्राणाम् इत्येतैर्मन्त्रैरवग
म्यतइत्युक्तम् ॥ ३८ ॥ तदसत्—कृष्णयजुस्संहितातृतीयका
ण्डचतुर्थप्रश्नपञ्चमानुवाके अग्निर्भूतानामधिपतिस्समावत्वि
न्द्रोज्येष्ठानांयमःपृथिव्यावायुरन्तरिक्षस्यसूर्योदिवश्चन्द्रमान
क्षत्राणांबृहस्पतिर्ब्रह्मणोमित्रस्सत्यानांवरुणोपाᳬसमुद्रस्स्रोत्या
नामन्नᳬसाम्राज्यानामधिपतितन्मावतुसोमओषधीनाᳬसविता

प्रसवानां रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणाना-
मधिपतयस्ते मावन्तु इत्यत्र तत्तन्मन्त्रैरग्न्यादीनां मरुतां पर्य-
न्तानां भूतादितत्तन्नियन्तव्यात्प्रति नियन्तृत्वविशेषमात्रस्यैव
प्रतिपिपादयिषितत्वादूर्ध्वाधोवस्थितस्थानविशेषावस्थितत्वप्र-
तिपादनस्यानभिप्रेतत्वात् अन्यथाऽग्निमारभ्य चन्द्रमसः पर्य-
न्तगणने चन्द्रमसः षष्ठस्थानस्यैव स्वीकार्यत्वप्रसङ्गेन तथापि वि-
रोधस्य दुष्परिहरत्वात् तृतीयस्यामितो दिवि सोम आसीदि-
ति प्रागुदाहृतश्रुत्या सोमस्य पृथिवीमारभ्य गणनीयस्थानेषु तृतीय-
स्थानावस्थितताया एव स्पष्टं प्रतिपाद्यमानतया तद्विरोधप्रसङ्गा-
च्च ॥ ३९ ॥ वस्तुतः चन्द्रमसो नक्षत्राधिपत्यमात्रं प्रतिपा-
द्यते चन्द्रमा नक्षत्राणामिति मन्त्रे न तु स्थानविशेषवासि-
त्वमित्यापण्डितपामरमतिस्फुटमेवेति न किञ्चिदेतत् ॥ ४० ॥
किंच-मन्त्राणां क्वचित्तत्तद्देवताभिमानविशेषगोचरार्थपरतामा-
त्रेणोपचारतोऽपि तत्तद्देवताकत्वाश्रयणदर्शनाद्यथा कथंचित्तत्तद्दे-
वतास्मारकशब्दार्थादिवर्दितानामपि केषांचिन्मन्त्राणां नवग्रह-
कर्मसु गौणविनियोगस्य प्रागुपदर्शितत्वाच्च न तावन्मात्रेण तेषां तत्त-
द्देवतापरत्वम्मुख्यमिति केनचिद्दङ्कुंशक्यम् ॥ ४१ ॥ नापि
च शब्दस्वभावेन स्वरसतस्सम्भवन्मुख्यमन्यपरत्वमपलपितुं वाश-

क्यम् ॥ ४२ ॥ अतः—चमूषन्मन्त्रस्यकाचित्सोमदेवताक
कर्मविनियोगमात्रेणनावश्यंतद्घटकपदानांबलादसम्भवदपिसोम
परत्वम्मुख्यंस्वीकर्तुंशक्यम्—शब्दस्वभावस्यपुरुषप्रयत्नेनव्य
त्यासयितुमशक्यत्वात्प्रागुक्तनयेनोपचारतोऽपिसोमदेवताक
त्वाश्रयणनिर्वाहसम्भवाच्च ॥ ४३ ॥ भूरादिव्याहृतीनाम
ग्निवाय्वादिदेवताकत्वंहितत्तद्देवताभिमानविशेषविषयभूरादि
लोकविशेषपरतामात्रनिबन्धनंप्रसिद्धम् ॥ ४४ ॥ नचतत्र
भूरादिशब्दानामग्नित्वाद्यवच्छिन्नपरत्वमेवेति—तत्तल्लोकपरत्वं
नास्त्येवेतिचकेनचिद्वैदिकेनाश्रीयते ॥ ४५ ॥ सम्भवतिच
चमूषन्मन्त्रस्यापियथाकथंचित्सोमप्रशंसापरत्वम्—भरद्वाज
संहितान्यासोपदेशतृतीयाध्याये—अग्निषोमौहिचक्राब्जौस
वएवतदात्मकाइतिचक्राब्जयोरग्नीषोमयोश्चाभिमानविशेषादि
भिस्तादात्म्योपदेशात्—अस्मिन्मन्त्रेगोविन्दुरायुधानिबिभ्र
दितिभगवद्दिव्यायुधानांधारणस्यमोक्षहेतुताप्रतिपादनेनतत्प्र
शंसायाअवगमात्—अग्नीषोमतादात्म्यापन्नचक्राब्जप्रशंसा
याअपितदन्तःपातित्वाच्च ॥ ४६ ॥ तस्मादस्यमन्त्रस्यकाचि
त्सोमप्रशंसाविनियोगमात्रेणनमुख्यतयासोमपरत्वमसम्भवदपि
बलात्कल्पनीयमितिनिर्बन्धोऽस्तिप्रागुदाहृतमन्त्रान्तरप्रसिद्धौ

पचारिकविनियोगान्तराणामिवास्यापिविनियोगस्यौपचारिक त्वसम्भवात्——अन्यथामुख्यार्थविनियोगपरश्रीपञ्चरात्रादि प्रबलप्रमाणान्तरविरोधेनसोमप्रशंसाविनियोगपरशास्त्रबाधप्रस ङ्गाच्च ॥४७॥ एवंचमूशब्दस्यसमाजपरतयारूढस्ययोगेनपात्र परत्वस्वीकारोप्ययुक्तः-सम्भवतिरूढार्थपरत्वेतत्प्रहाणस्य रथ काराधिकरणन्यायविरुद्धत्वात्।४८।एवंगोविन्दुरित्यस्य-वि न्दुरिच्छुः-३-२-१६९-इतिसूत्रनिपातसिद्धोप्रत्ययान्तशब्दघ टितत्वंप्रथमान्तत्वंचाश्रित्यगवांलम्भकइत्यर्थवर्णनमप्ययुक्त म्-उक्तसूत्रस्य-इच्छार्थकधातुसाहचर्येणज्ञानार्थकधातोरेवोप्र त्ययान्तत्वनिपातनपरत्वात्—तथैववैयाकरणैर्व्याख्याततत्वात् ज्ञातातुविदुरोविन्दुरित्यमरकोशेनापिविन्दुशब्दस्यज्ञातृपरता या-एवबोधनाच्चतस्यशब्दस्यज्ञानार्थकविदधातुनिष्पन्नतायाए वावगमेनलाभार्थकत्वायोगात्——कर्त्रर्थकोप्रत्ययान्तविन्दति धातुनिष्पन्नतामाश्रित्यतस्यशब्दस्यकथंचित्प्रापृपरतायास्सम्भ वद्युक्तिकत्वेपिप्रापयितृपरत्वासम्भवात्-प्रापृत्वस्यसोमेऽन्वया सामञ्जस्याच्च॥४९॥एवंद्रप्सपदस्यांशपरत्वप्रसिद्ध्याकस्यद्रप्स इत्याकाङ्क्षोदयात्——आयुधानीत्यत्र-कस्यायुधानीत्याका ङ्क्षोदयाच्चतद्वारकतयाभगवत्परषष्ठ्यंतशब्दरूपतैवचगोविन्दु

रित्यस्यस्वारसिकी ॥ ५० ॥ एवंरूढिप्रहाणेनद्रप्सपदस्ययोगतोद्रवणशीलपरत्वंयज्ञायुधानीत्यत्रयज्ञपदसमभिव्याहारेणायुधशब्दस्यस्फ्यकपालादियज्ञोपकरणपरत्वसम्भवेपिनिरुपपदायुधशब्दस्यतत्परत्वंचनस्वीकर्तुमुचितम्—रथकाराधिकरणविरोधादेव ॥ ५१ ॥ ऊर्मिमित्यस्यप्रेरकमित्यर्थवर्णनंसमुद्रपदस्यान्तरिक्षलोकपरत्ववर्णनंचास्वारसिकम् ॥ ५२ ॥ एवंसोमस्यप्रत्यक्षसमुद्रप्रवेशादिपूर्वकंतुरीयधामगमनस्यतदातदासंपद्यमानताप्रतिपादकत्वकल्पनंप्रमाणान्तरानुपलब्धमसम्बद्धम् ॥ ५३ ॥ तस्मादस्यमन्त्रस्यसर्वपदानामतिक्लिष्टकल्पनयार्थीविभिद्यसोमपरतयामुख्ययोजनाकल्पनप्रयत्नोनकथंचिदपिसफलोभवति ॥ ५४ ॥ नचभवत्पक्षेपिश्येनशकुनादिशब्दानांरूढार्थप्रहाणेनयौगिकार्थमात्रस्वीकारदोषोदुर्वारइतिवाच्यम्——सम्भवतिसमुचितगत्यन्तरेतादृशार्थस्वीकारस्यान्याय्यत्वेपितदसम्भवेतत्स्वीकारस्यन्याय्यत्वानपायात्——चक्राङ्कितभगवद्भक्ताग्रेसरस्यवैष्णवपरमपदायोर्ध्वगमनशैघ्र्यशालिनश्श्येनशकुनतुल्यतयाश्येनशकुनसमाधेरपिविवक्षिततयाश्येनशकुनशब्दयोस्सर्वात्मनारूढार्थप्रहाणाभावाच्च ॥ ५५ ॥ नचैवमपिभवत्पक्षेगोविन्दुरित्यस्यषष्ठ्यन्तत्वाश्रयणंकथञ्चिदपि

सङ्गतंभवति—गोविन्दशब्दस्य—गोविन्दस्येत्येवषष्ठ्यन्तरू
पसम्भवात्-तृज्वद्भावाश्रयणमपिनयुक्तम्-तृज्वत्क्रोष्टुः-७-१-
९५-इत्यनुशासनेनक्रोष्टुशब्दस्यैवगोविन्दशब्दस्यकेनाऽप्यनुशा
सनेनतृज्वद्भावविधानादर्शनात्-तृज्वद्भावाश्रयणेपिचगोविन्दु
रितिरूपंनसिद्ध्यति-शेमुचादीनाम्-७-१-५९-इत्यनुशासनेनै
व-शप्रत्ययेपरेमुचादीनांनुमागमोभवतीत्यर्थकेनमुचाद्यन्तःपा
तिनोविन्दतेर्नुमागमस्यवक्तव्यतयातृच्प्रत्ययेतस्यतदासिद्धेरिति
वाच्यम्—व्यत्ययोबहुलम्—३—१—८५—इतितृती
याध्यायप्रथमपादपञ्चाशीतितमसूत्रमहाभाष्येभगवतापतञ्जलि
ना—व्यत्ययइति—बहुलमितिचयोगविभागंकृत्वा—बहुलमि
त्येतद्व्याकुर्वता—छन्दसिविषयेसर्वेविधयोभवन्तीतिव्याख्या
नेनगोविन्दुरित्यत्रनुमागमतृज्वद्भावयोस्सम्भवेनषष्ठ्यन्तत्वस्वी
कारेक्षतिविरहात् ॥ ५६ ॥ तत्रहिपतञ्जलिना—योगविभा
भागः कर्तव्यः—व्यत्ययः—व्यत्ययोभवतिस्यादीनामिती
त्यादिनाप्रथमदलंसनिदर्शनंव्याख्याय—ततोबहुलम्—छ
न्दसिविषयेसर्वेविधयोभवन्तीत्यादिनासनिदर्शनंद्वितीयदलम
पिव्याख्यातम् ॥ ५७ ॥ वस्तुतस्तु—अनुपसर्गाल्लिम्पवि
न्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च—३—१—१३८-

इतिसूत्रभाष्येभाष्यकारशिक्षितेन—गवादिषुविन्देस्सञ्ज्ञायामि
तिवार्तिकानुशासनेनशप्रत्ययान्ततयानिष्पन्नस्यैवसञ्ज्ञारूपस्य
गोविन्दशब्दस्यकृदन्तकार्यार्थंतृज्वद्भावाश्रयणेपिशप्रत्ययान्त
त्वानपायेनस्थानिभूतशप्रत्ययबलेनैव-शेमुचादीनामित्यनुशास
नायत्तनुमोनिष्प्रत्यूहतयातृज्वद्भावमार्गेछान्दसंकल्पनीयम्—
नतुनुमागमोपितथाकल्पनीयइतिबोध्यम् ॥ ५८ ॥ इत्थं
च—तृज्वद्भावेनादन्तंक्रोष्टुशब्दमृदन्तंभावयित्वातस्यकृदन्त
कार्यस्वीकारवच्छान्दसतृज्वद्भावाश्रयणेनादन्तंगोविन्दशब्द
मृदन्तंभावयित्वातस्यापिकृदन्तकार्यस्वीकाराद्गोविन्दुरितिष
ष्ठ्यन्तरूपंनिष्प्रत्यूहंसिद्ध्यतीतिनकश्चिद्दोषः ॥ ५९ ॥ एते
न—गोविन्दशब्दस्यतृज्वद्भावाश्रयणेनतृजन्तस्याविन्देर्यद्रूपंतद्रूप
स्यैवप्राप्तेर्गोविन्दितुरितिरूपंप्राप्नोतीत्यर्वाचीनभास्करोक्तंनिरस्त
म् ॥ ६० ॥ नचैवमपि—गोविन्दशब्दस्यकार्यविशेषार्थं
तृज्वद्भावाश्रयणेपिशप्रत्ययान्तत्वानपायेननुमागमसिद्धावपितृ
च्प्रत्ययकार्यस्येडागमस्यदुर्वारतयागोविन्दितुरितिरूपसम्भवेपि
गोविन्दुरितिरूपंकथंसम्भवतीतिवाच्यम्—विन्दतेर्व्याघ्रभू
त्यादिमतेसेट्त्वेपिभाष्यादिमतेऽनिट्तयागोविन्दुरितिरूपसिद्धे
र्निष्प्रत्यूहत्वात्—छान्दसत्वेनसर्वदोषपरिहारसम्भवेनेयाद्विचा

रविशेषस्यापीहानावश्यकत्वाच्च ॥ ६१॥ यदप्युक्तमर्वाचीनभा स्करेण--बहुलंछन्दसीत्येकेनैवसूत्रेणछन्दसिसर्वविधीनांनियमा भावासिद्धावपि-यत्प्रतिप्रकरणंमहताप्रयासेन-वाछन्दसि--विभा षाछन्दसि-बहुलंछन्दसीतिबहूनिसूत्राणिकरोति-तज्ज्ञापयति भगवान्पाणिनिः--सर्वत्रस्वेच्छयाछान्दसत्वंनकल्पनीयमिति- तस्मादिहासत्यपिविशेषविधानेगोविन्दशब्दस्यतृज्वद्भावकल्पनं नयुज्यतइति ॥ ६२ ॥ तदप्यसत्---छन्दसोदंस्यादितिवि शिष्यविधानाभावस्थले---भाषातश्छन्दसिक्वापिकार्यभेदस्या नभिमतत्वे---व्यत्ययोबहुलम्---३---१---८५---इति प्रा गुदाहृतसूत्रभाष्येभगवतापतञ्जलिनायोगविभागेनछन्दसिसामा न्यतस्सर्वविधिसम्भवनिर्वाहकतयासूत्रव्याख्यानानावश्यकत्वा त्---भाषातोविलक्षणानांछन्दसिदृश्यमानानांसर्वेषांकार्यभेदा नांसम्प्रतिपाणिनिकृतछान्दसविधानमात्रेणानिर्वाहाच्च ॥ ६३ ॥ परंतुपाणिनिकृतानिछान्दसतत्तद्विशेषविधानानिछन्दसिप्रायिक सम्भवकार्यभेदमात्रविषयाणि---योगविभागेनपतञ्जलिनाछ न्दसिसर्वविधिनिर्वाहकतयाव्याख्यायमानं---व्यत्ययोबहुल मित्यनुशासनंतुछन्दसिक्वाचित्कसम्भवकार्यभेदविषयमितोया नेवविशेषोऽवसेयः ॥ ६४॥ अतएवच---व्यत्ययोबहुलमिति

सूत्रभाष्ये—युक्तामातासीद्धुरिदक्षिणायाइत्यत्रदक्षिणायामि
तिप्राप्तेसुप्प्रत्ययव्यत्ययः—चषालंयेअश्वयूपायतक्षतीत्यत्र
तक्षन्तीतिप्राप्तेतिङ्वचनव्यत्ययः—इत्यादयोबहवोव्यत्यया
विधानान्तरानिर्व्यूढानिदर्शिताःपतञ्जलिना ॥ ६५ ॥ नचैवंछ
न्दसिस्वैरंव्यत्ययस्वीकारप्रसङ्गोदुर्वारइतिवाच्यम्—प्रकरणा
दिभिःप्रतीयमानार्थोपपत्तिस्वारस्यादिभिरुपबृंहणप्रमाणान्तरै
श्वतन्निरोधसम्भवात् ॥ ६६ ॥ इहतूपबृंहणप्रमाणान्तरानुगु
ण्यमुपपत्तिस्वारस्यादिकंचोपलभ्यते ॥ ६७ ॥ गोविन्दस्यायु
धान्यङ्गविभ्रत्सुश्रोणिवैद्विजः । तुरीयंधामतद्विष्णोर्महिष्ठःप्राप्नु
यादिति । चमूषच्छ्येनश्शकुनोविभृत्वेतिऋगब्रवीदितिस्कान्द
वचनेनास्यमन्त्रस्यसुदर्शनादिधारणपरत्वम्—गोविन्दुरित्यस्य
षष्ठ्यन्तत्वंचहिस्फुटंप्रतीयते ॥ ६८ ॥ द्रप्सइत्यत्रकस्यद्रप्स
इति—आयुधानीत्यत्रकस्यायुधानीतिचसम्भवदाकाङ्क्षावार
कत्वादिनिबन्धनमुपपत्तिस्वारस्यादिकमप्यास्ति ॥ ६९ ॥ एव
म्—श्रीपञ्चरात्रशास्त्रेपारमेश्वरसंहितायांप्रतिष्ठाध्यायेचक्रप्र
तिष्ठायाम्—तत्तत्स्थापनकालेतुतत्तत्सञ्ज्ञान्मनून्जपेत् । वि
द्यांगदामित्यादींयत्पाठयेत्तद्विदोजनान् । चमूषच्छ्येनइतिच
प्रतोविष्णोइतितदृचौ । पाठयेद्बह्वृचान्पश्चाच्छाकुनंसूक्तमेवच ।

धृतोर्ध्वपुण्ड्रः कृतचक्रेतिमन्त्रंकठान्परम् । पवित्रंतेविततमित्ये तन्मन्त्रंयजुर्मयान् । क्षुरोहरेतिसामज्ञान्पवित्रमित्यग्निरित्यपि। एभिर्वयमुरुक्रमस्येतिचाथर्वणान्द्विजान् । एवंसंस्थाप्यवि धिवन्नवभिःकलशैस्ततः । स्नापयेद्बलसूक्तस्थैर्मन्त्रैरष्टाभिरेव चेत्यत्रप्रथमम्——तत्तत्स्थापनकालेतुतत्तत्सञ्ज्ञान्मनूञ्जपेदि तिप्रसिद्धतत्तद्विषयशब्दरूपतत्तत्सञ्ज्ञाशब्दघटितमन्त्राणांतत्त त्स्थापनेविनियोगंविधायचक्रप्रतिष्ठांप्रस्तुत्यविनियुज्यमानेषु सौदर्शनेषुमन्त्रेष्वन्तर्भूततयाचमूपच्छेयेनइतिमन्त्रस्यापिविनि युक्ततयातस्यसौदर्शनमन्त्ररूपतायाःस्पष्टतयासुदर्शनपरत्वमेवा स्यमन्त्रस्यस्वीकर्तुंयुक्तम् ॥ ७० ॥ अतएवच——गोवि न्दुरायुधानीत्यन्वयावश्यकत्वंगोविन्दुरित्यस्यषष्ठ्यन्तत्वंचज्ञा पितंभवति——अन्यथाऽस्यमन्त्रस्यसुदर्शनादिप्रसिद्धगोविन्दा युधपरशब्दघटितत्वासिद्ध्या——तत्तत्सञ्ज्ञान्मनूञ्जपेदितिप्र थमंविधायचक्रप्रतिष्ठायांविनियोगासाङ्गत्यस्यवज्रलेपायमान त्वात्॥७१॥नचगोविन्दुरित्यस्यषष्ठ्यन्ततायाः——गोविन्दुरा युधानीत्यन्वयस्यचस्वीकारेपिगोविन्दुरायुधानीत्यस्यभगवदा युधपञ्चकविषयस्यसुदर्शनसञ्ज्ञात्वासिद्ध्यातद्दोषतादवस्थ्यंदु र्वारमितिवाच्यम्——सञ्ज्ञाशब्दस्यात्रतत्परतयाप्रसिद्धशब्दमा

त्रविषयत्वेनगोविन्दायुधशब्दस्यसुदर्शनेप्रसिद्धप्रयोगतयादोषा भावात्——सुदर्शनस्यभगवदायुधराजतयाऽन्येषांभगवदायुधा नांतदभिमानान्तःपातित्वेनराजभृत्यशासनस्यराजशासनान्तः पातित्वेनराजान्तरशासनकोटयप्रवेशात्तद्राजासाधारणशासन रूपतासिद्धिवत्-भगवदायुधान्तरमात्रसाधारणप्रशंसायास्सुदर्श नासाधारणप्रशंसारूपत्वसिद्धेर्निष्प्रत्यूहत्वात्——प्रत्युतसपरि वारस्वमहिमप्रदर्शिनोमन्त्रस्यदेवताप्रसन्नतातिशयावहत्वाच्च ॥ ॥७२॥ अतएवहि—भगवदनन्ययाजित्वलक्षणाःपरमैकान्तिनो भगवदसाधारणमहिषीपरिजनादियाजिनोपिभगवदनन्ययाजि त्वान्नप्रच्यवन्तइतिसर्वाविगीतम् ॥७३॥ नचैवमपिमन्त्रस्यमो क्षगामिपुरुषस्यैवमुख्यप्रतिपाद्यतयासुदर्शनस्यातथात्वेनचक्रप्र तिष्ठायामस्यनमुख्योविनियोगोयुज्यतइतिवाच्यम्——महिमप्र तिपादकतयातत्तद्देवताप्रसन्नतापादकमन्त्राणामेवतत्तत्कर्माणि विनियोगस्यमुख्यतयामन्त्रजन्यशाब्दबोधमुख्यविशेष्यतायाः स्तत्तद्देवतायामभावमात्रस्याकिञ्चित्करत्वात्——अन्यथा- अत्रैव——धृतोर्ध्वपुण्ड्रःकृतचक्रधारीतिमन्त्रस्यचक्रप्रतिष्ठाविं नियोगासाङ्गत्यापत्तेः——देवतामुख्याविशेष्यकबोधाजनकानां प्रसिद्धमन्त्राणामपिबहूनांतत्तद्देवतार्चनादिकर्मसुविनियुज्यमा

नानांतन्त्राविनियोऽयत्वप्रसङ्गाच्च ७४॥एतेन-चमूषच्छ्येनइत्य
स्याजर्चेनैवचक्रप्रतिष्ठाविनियोगानुसारिसुदर्शनपरत्वसम्भवेकि
मितिसुदर्शनधारणाविधिपरत्वमाश्रीयते——तथाहि——चमूः—
असुरचमूःसीदतीतिचमूषत्——षद्लृविशरणार्थः——हिनस्ती
तियावत्——श्येनः——शंसनीयः——यद्वा——श्येनवत्——श्ये
नः——यथाश्येनोदुर्ग्रहानपिमत्स्यान्गृहीत्वापीडयति——त
थाऽसौदेवशत्रूंन्पीडयतीतिश्येनतुल्यः——यतोऽयंशकुनश्श
कः——अतएवलोककण्टकोद्धारणेन——बिभृत्वा——जगद्भर
णशीलः——जगद्रक्षकइतियावत्——क्विबन्तोभृञ्धातुनिष्प
न्नोऽयंशब्दः——गोविन्दुः——गोविन्दस्य——इन्दुः——अंशभू
तः——सुदर्शनस्यविष्ण्वंशत्वंचप्रसिद्धम्—एवंभूतस्सुदर्शनदेवः—
आयुधानि——सुदर्शनकल्पोक्तानिस्वान्यायुधानि—बिभ्रत्——
अपामूर्मिंरसभूतम्——समुद्रम्——क्षीरार्णवमितियावत्——स
चमानः——श्वेतद्वीपनिवासीतियावत्——नकेवलंश्वेतद्वीपेवर्त
ते——किन्तुविष्णोस्तुरीयंधाम——महिषः——महनीयाभूत्वा—
विवर्ति——विशेषेणतत्रवर्ततइतियावत्—चक्रधारणपरत्वेतु—
चमूषादित्यादिपदनिरुक्तगुणयुक्तस्सन्तुरीयंधामविवक्तीत्य
र्थाङ्गीकारात्क्वाविवृत्त्याश्रयणदोषप्रसङ्गः——किञ्च——गोवि

न्दुरित्यस्यांशवाचिनासन्निहितेनदर्पसपदेनान्वयेसम्भवतिन
व्यवहितायुधशब्देनान्वयोयुक्तइत्यर्वाचीनभास्करोक्तंनिरस्तं
म्—उक्तरीत्यासुदर्शनमहिमप्रतिपादनपरत्वेनाप्यस्यमन्त्र
स्यसुदर्शनप्रतिष्ठाविनियोगसम्भवेबाधकाभावेनयोजनान्तरा
नावश्यकत्वात्—प्रागस्मदुक्तयोजनयाप्रागस्मदुदाहृतस्कान्द
वचनरूपोपबृंहणस्याप्यनुगुण्यैवचक्रप्रतिष्ठाविनियोगस्यापि
निर्वाहेतदुपेक्षायांबीजाभावाच्च ॥ ७५ ॥ गोविन्दुरित्यस्य
सन्निहितपदेनान्वयंविनैवान्यत्राकर्षणेसत्यन्वयास्वारस्यस्यसं
भवदुक्तिकत्वेपि—दर्पसइतिसन्निहितपदेनलब्धान्वयस्यैवतस्या
काङ्क्षावशादन्यत्राप्यनुषङ्गेणान्वयस्वीकारेहिनाकिञ्चिदस्वा
रस्यंसुवचम्—यस्ययेनार्थसम्बन्धोदूरस्थेनापितेनसइतितन्त्र
वार्तिकोक्तरीत्याप्रसक्ताकाङ्क्षावारकतयाऽऽवश्यकान्वय
स्यपदस्यव्यवहितस्याप्यन्यत्रान्वयस्वीकारस्यन्याय्यत्वात्—
तादृशान्वयस्योपबृंहणानुगुण्याच्चसुतरामेवनतादितिनात्रदोषले
शशङ्कावकाशः ॥ ७६ ॥ किञ्चास्यमन्त्रस्यचक्रप्रतिष्ठावि
नियोगानुरोधेनचक्रप्रकाशकत्वेऽवश्यंवक्तव्ये—गोविन्दुरायु
धानीतिमन्त्रघटकतयाश्रुतयोरेवशब्दयोरन्वयस्वीकारस म्भवेण
सम्भवतितन्निर्वाहेऽश्रुतसुदर्शनवाचिविशेष्यवाचकप दाध्याहारे

गतान्निर्वाहकल्पनंरात्रिसत्राधिकरणाविरुद्धम् ॥ श्रुतहानाश्रुतकल्पनाप्रसंगात्-रात्रिसत्राधिकरणे-श्रुतहानाश्रुतकल्पनाप्रसङ्गलक्षणदोषपरिहारायरात्रिसत्राणांविश्वजिन्न्यायेनप्राप्नुवदपिस्वर्गफलकत्वमुपेक्ष्य——प्रतितिष्ठन्तिहवायएतारात्रीरुपयन्तीत्यर्थवादवाक्येश्रूयमाणप्रतितिष्ठन्तिपदप्रतिपन्नप्रतिष्ठाफलकत्वस्यैवस्थापितत्वात् ॥७७॥ सुदर्शनवाचिविशेष्यवाचकपदाध्याहारंविनाचनास्यमन्त्रस्यभवदुक्तयोजनायांसुदर्शनप्रकाशकत्वंनिर्वहति——गोविन्दुर्द्रप्सइत्यस्यसर्वसाधारणांशभावमात्रवाचित्वात् ॥७८॥ वेदस्यप्रवृत्तिनिवृत्त्यन्यतरप्रयोजनपर्यवसानेनैववक्तव्यसार्थक्यस्यसम्भवात्तादृशप्रयोजनपर्यवसाय्यर्थपरत्वेतादृशपर्यवसानाविधुरार्थपरत्वस्वीकारस्यान्याय्यत्वादस्यमन्त्रस्यास्मदुक्तरीत्याचक्रादिभगवदायुधधारणप्रवृत्तिपर्यवसाय्यर्थपरत्वंसम्भवद्विहाय——श्वेतद्वीपेपरमपदेचसुदर्शनदेवोऽस्तीत्यर्थपरत्वस्यप्रवृत्तिनिवृत्त्यन्यतरप्रयोजनपर्यवसानाविरहेणवैय्यर्थ्यापरपर्यायस्यस्वीकारोनकथञ्चिदपियुक्तः। ७९। अपामूर्मिंसचमानस्समुद्रमित्यस्यक्षीरार्णवसम्बन्धपरतयाश्वेतद्वीपवासित्वपरत्ववर्णनस्यातिक्लिष्टत्वेनास्वारसिकत्वात्——अस्मदुक्तरीत्यातस्यसंसारसागरसम्बन्धपरत्वस्यैव——पञ्चम्यामाहुतावापः

पुरुषवचसोभवन्तीतिपञ्चाग्निविद्याश्रुत्यानुगुण्येनात्यन्तस्वार
सिकत्वात्——चमूषदित्यत्रसीदतेर्विशरणार्थकस्याकर्मकत्वेना
ण्यन्तस्यनाशकत्वार्थकत्वासम्भवात्——ण्यन्तत्वस्वीकारेचमू
षदितिरूपासिद्धेश्चासमञ्जसमेवभवद्व्याख्यानम् ॥ ८० ॥ त
स्मादस्मदुक्तमेवव्याख्यानंयुक्तमाश्रयितुंसारासारकोविदैः ॥
॥ ८१ ॥ यत्तु—विवक्तीत्यत्रभाविवृत्त्याश्रयणप्रसङ्गइत्यस्म
त्पक्षेदूषणमुक्तम् ॥ ८२ ॥ तत्तुच्छम्——वर्तमानकालवृ
त्तिवाचिनोलटोभविष्यत्कालवृत्तिलाक्षणिकत्वस्वीकाररूपस्य
भाविवृत्त्याश्रयणस्येहास्माकमनावश्यकत्वात् ॥ ८३ ॥ न
चप्रकृतशब्दप्रयोगाधिकरणकालवृत्तित्वस्यैववर्तमानकालवृत्ति
त्वरूपतया——यदायदैतद्वाक्यप्रयोगः—तदातदाकस्यचिच्चक्रा
दिधारिणःपरमपदप्राप्तौप्रमाणाभावेनविवक्तीत्यत्रलटोवर्तमान
कालवृत्त्यर्थकत्वेऽस्यवाक्यस्यबाधितार्थकत्वंदुर्वारमितिवाच्य
म्——मुक्तिंगतानांबहूनांचक्रधारिणांसर्वदैवसत्त्वेनतदीयपरमपद
प्राप्तेः प्रतितद्वाक्यप्रयोगाधिकरणकालंवर्त्तमानतयातद्विषयत्व
सम्भवेनास्यवाक्यस्यबाधितार्थकत्वप्रसङ्गाभावात् ॥ ८४ ॥
धनवान्सुखीत्यादौधनेसुखप्रयोजकत्वभानवत्—अस्यवाक्य
स्यमुक्तविषयत्वेपिचक्रादिधारणेपरमपदप्राप्तिप्रयोजकत्वभाने

नचक्रादिधारणेप्रवर्तकत्वोपपत्तिर्निराबाधैवेतिनकश्चिद्दोषः ॥
॥ ८५ ॥ एवमस्वीकारेहि—ब्रह्मविदाप्नोतिपरमित्यादीनाम
प्यनन्तानांवाक्यानांलाक्षणिकत्वप्रसङ्गोदुर्वारस्स्यात्॥ ८६ ॥
वस्तुतस्तु—प्रकृतधातूपस्थापितक्रियायाःपूर्वोत्तरकालसम्बन्धि
न्यामध्यकालासम्बन्धेपितत्कालेनिरवशेषंविरतत्वाभावेनवर्त
मानताहिन्याय्याऽभ्युपगन्तुम्—अन्यथा—इहविप्रायथाविधि
सन्ध्यामुपासते-वेदानधीयते—अग्निहोत्राणिजुह्वति—सोमेनयज
न्ते—अतएषश्रोत्रियदेशइत्यादिप्रयोगाणांसर्वसम्प्रतिपन्नानाम
निर्वाहप्रसङ्गात् ॥ ८७ ॥ नहितत्रत्योलट्प्रयोगोवाक्यप्रयो
गकालेसन्ध्योपासनादिसद्भावनियमसापेक्षः ॥ ८८ ॥ नचत
त्रसंध्योपासनादीनिसर्वाणितदायुगपत्सम्भवितुमर्हन्ति॥८९॥
इत्थम्मध्येविरामसम्भवेपिपूर्वोत्तरकालयोर्धातवर्थक्रियासम्भव
मात्रेणलट्प्रयोगास्वीकारेलट्प्रयोगमुख्योदाहरणाभिमतेषु—भु
ङ्क्तेदेवदत्तइत्यादिष्वपिवाक्येषुलट्प्रयोगोऽसम्बद्धोभवेत्—भो
जनक्रियायाअपिमध्येहसनजल्पनपानीयपानादिभिर्विरामसम्भ
वेनतत्कालेसाक्षात्सम्बन्धस्यदुरुपपादत्वात्—हसनादिकाले
पिभुङ्क्तइतिनिर्देशस्यसर्वाविगीतत्वाच्च ॥९०॥ तदिदंसर्वं—वर्त
मानेलट्—३—२—१२३—इतिसूत्रभाष्येभगवतापतञ्जलिनैवप्र

स्फुटंभाषितम् ॥९१ तत्रह्युक्तम्—न्याय्यात्वारम्भानपवर्गात्—न्याय्यात्वेषावर्तमानकालता-कुतः—आरम्भानपवर्गात्—आरम्भोत्रानपवृक्तः—एषएवचनामन्याय्योवर्त्तमानकालः—यत्रारम्भोऽनपवृक्तः—अस्तिचमुक्तसंशयेविरामः—यंखल्वपिभवान्मुक्तसंशयंवर्तमानकालंन्याय्यंम्मन्यते-भुङ्क्तेदेवदत्तइति—तेनैतत्तुल्यम्—सोपिह्यवश्यम्भुञ्जानोहसतिवाजल्पतिवापानीयंवापिबति—यद्यत्रयुक्तावर्तमानकालताहश्यते—इहापियुक्ताहश्यतामिति ॥ ९२ ॥ तथाचचक्रधारीपरमपदंप्राप्नोतीत्युक्तौतत्कालेचक्रधारिकर्तृकपरमपदप्राप्तेरसत्त्वेपिपूर्वोत्तरकालयोस्सत्त्वेनयथोक्तरीत्यावर्तमानतासूपपादेतिनकश्चिद्दोषः ॥ ९३ ॥ इत्थंच—नारायणाद्ब्रह्माजायते—नारायणाद्रुद्रोजायते—इत्यादिश्रौतनिर्देशाअपिनिरूढाः—नारायणापादानकब्रह्मरुद्रादुत्पत्तिलक्षणक्रियायाःप्रतिकल्पभावित्वेनसम्प्रत्यसमाप्ततयायथोक्तरीत्यावर्तमानतोपपत्तेः ॥ ९४ ॥ नचवर्तमानत्वंनामतत्कालवृत्तित्वम्—तदेवचलडर्थइतिवक्तव्यम्—इत्थंचधात्वर्थक्रियायाःपूर्वोत्तरकालयोरसद्भावेपितत्कालवृत्तित्वाभावेकथंवर्तमानत्वमुपपादयितुंशक्यमितिवाच्यम्—उदाहृतमहाभाष्यग्रन्थेन—क्रियासमूहरूपधात्वर्थान्वयिनः—तत्कालवृत्तिसमुदायत्वपर्या

त्तिमत्कालवृत्तिसमुदायत्वपर्याप्तिमत्त्वरूपवर्तमानत्वस्यैवलडर्थ
तायाःप्रतिपन्नत्वेनसाक्षात्तत्कालवृत्तित्वस्यासत्त्वेऽपिक्षत्यभावा
त् ॥ १५ ॥ समुदायत्वेतत्कालवृत्तित्वंचस्वाश्रयकालध्वंसा
धिकरणत्वस्वाश्रयकालप्रागभावाधिकरणत्वस्वाश्रयत्वैतत्त्रि
तयसम्बन्धेन ॥ १६ ॥ कालवृत्तित्वंचसमुदायत्वेस्वाश्रयप्रति
योगिकप्रागभावसमुदायानधिकरणत्वस्वाश्रयप्रतियोगिकध्वंस
समुदायानधिकरणत्वोभयसम्बन्धेन—यद्वा-स्वाश्रयक्रियाप्राग
भावध्वंसस्वाश्रयक्रियाध्वंसप्रागभावोभयाधिकरणत्वसम्बन्धे
नेतिबोध्यम् ॥१७॥ तथाच—भुङ्क्तेदेवदत्तइत्यत्रशब्दप्रयोगका
लेहसनजल्पनादिनाभोजनक्रियायाःप्रतिरुद्धत्वेऽपि—पूर्वोत्तरका
लवृत्तिक्रियासमूहस्यैवतत्रभुजिधात्वर्थभोजनक्रियारूपतया
विवक्षिततयातत्पर्याप्तसमुदायत्वाश्रयक्रियाप्रागभावसमुदायाधि
करणत्वस्यतादृशक्रियासमुदायघटकप्रथमक्रियापूर्वकालएवस
त्त्वेन——तादृशसमुदायत्वाश्रयक्रियाध्वंससमुदायाधिकरण
त्वस्यतादृशक्रियासमुदायघटकचरमक्रियोत्तरकालएवसत्त्वेन
च——तादृशक्रियासमुदायघटकप्रथमक्रियाकालप्रभृतिचरम
क्रियाकालपर्यन्तकालसमुदायेतत्कालवृत्तिसमुदायत्वपर्याप्ति
मत्कालरूपेनिरुक्तानधिकरणत्वद्वयस्यानिर्बाधत्वात्प्रथमकल्पे

तादृशक्रियासमुदायेप्रथमक्रियाप्रागभावध्वंसस्यचरमक्रिया
ध्वंसप्रागभावस्यचद्वयोर्दर्शितकालेसत्त्वाच्चद्वितीयकल्पेचधात्व
र्थभूतभोजनक्रियायायथावर्तमानत्वोपपत्तिस्सम्भवति—तथै
वचक्राद्यायुधधारिकर्तृकतुरीयधामप्राप्तेरपिप्रकृतशब्दप्रयोगका
लेकदाचिदसत्त्वेपिपूर्वमुत्तरंचसत्त्वेनवर्तमानत्वमुपपद्यतइतिनक
श्चिद्दोषइत्यवधेयम् ॥१८॥ एतेन—प्राप्तेःप्राथमिकसंयोगरू
पत्वेन—प्रागेवतुरीयधामप्राप्यवर्तमाने—प्राप्नोतीतिव्यवहार
स्यामुख्यतयाप्राप्तेःकेवलसंयोगरूपतामाश्रित्यप्रागुक्तरीत्यानि
र्वाहस्यकिञ्चिदस्वारसिकत्वेपिनक्षतिः—भिन्नाभिन्नचक्राद्यायुध
धारिकर्तृकप्राथमिकसंयोगरूपपरमपदप्राप्तेरेवतदातदासम्भवेना
ऽनुपदोक्तरीत्यामुख्यतयाएवतादृशव्यवहारस्यसम्भवात्—ब्र
ह्मविदाप्नोतिपरम्—नारायणाद्ब्रह्माजायते—नारायणाद्रुद्रो
जायते—इत्यादिश्रौतव्यवहाराणांप्रतिकल्पंतत्तत्समयविशे
षभावितत्तत्क्रियाविशेषविषयाणांयथोक्तरीत्यास्वरसतएवनि
र्वाहसम्भवाच्च ॥ १९ ॥ ईदृशस्थलेषुसर्वत्रपूर्वोत्तरकालभावि
क्रियासमुदायस्यप्रकृतधात्वर्थतयाविवक्षणेनैवलट्प्रयोगः—
पूर्वकालभाविक्रियामात्रस्यतथाविवक्षणेलङ्लिडादिप्रयोगः—
उत्तरकालभाविक्रियामात्रस्यतथाविवक्षणेलुडादिप्रयोगश्चावि

वक्षाभेदेनयथायथंसम्भवत्येव—यथा—तिष्ठन्तिपर्वताः—स्थास्यन्तिपर्वताः-तस्थुःपर्वताइतित्रिविधःप्रयोगोभाष्येनिर्व्यूढः-तस्मान्नास्मत्पक्षेकश्चिदपिदोषलेशइतिविद्वांसोविदांकुर्वन्तु ॥ १०० ॥ प्रत्युत—सुदर्शनदेवस्यश्वेतद्वीपेपरमपदेचतत्कालेपिवर्तमानतापरतयामन्त्रंव्याकुर्वतोभवतएवपक्षे—अपामूर्मिंसमुद्रंसचमानइतिशानच्प्रत्ययानुपपत्तिर्दुर्वारा-लटश्शतृशानचावप्रथमासमानाधिकरणे—३-२-१२४-इत्यनुशासनेन—अप्रथमान्तसामानाधिकरण्येसत्येवशतृशानजादेशविधानेन—इह—गोविन्दुर्द्रप्सइतिप्रथमान्तेनैव—सचमानइत्यस्यसामानाधिकरण्यसत्त्वेनशानजासिद्धेः ॥ १०१ ॥अस्माकंतु—लक्षणहेत्वोःक्रियायाः ३—२—१२६—इत्यनुशासनेन—सचमानइतिशानजुपपत्तिस्सम्भवति—सचमानइत्यत्रविवक्षितक्रियायाः—बिभ्रदित्याद्युक्तभरणादिक्रियांप्रतिहेतुत्वसम्भवात् ॥ १०२ ॥ लक्षणहेत्वोःक्रियायाइतिसूत्रभाष्ये—सदादयश्चबहुलमित्यादिकंवार्तिकमुदाहरताभाष्यकारेण—लटश्शतृशानचावित्यादिसूत्रे—लडितिवर्तमानेपुनर्लड्ग्रहणस्याधिकविधानार्थतामाश्रयद्भिर्वृत्तिकारादिभिश्च—सन्ब्राह्मणः-विद्यमानोब्राह्मणः-इत्यादिप्रयोगसमर्थनमपिप्रसिद्धानन्यथासिद्धकतिपयप्रयोगमात्रसाधुताविषयम्

नतुसर्वत्रतादृशप्रयोगसाधुताव्यवस्थापनपरम्——बाहुलकादी
नांसार्वत्रिकव्यवस्थापनपरत्वासम्भवात्—१०३तथाच——प्र
कृतस्थलेसचमानइत्यस्यप्रकारान्तरेणसम्भवदुपपत्तिकस्यान
न्यथासिद्धत्वासम्भवेनबाहुलकादितस्समर्थनासम्भवाद्भवत्पक्षे
शानजनुपपत्तिर्दुर्वारैव ॥ १०४ ॥ वस्तुतस्तु——सुदर्शनप
रयोजनान्तरसत्त्वेपिनास्माकंकाचिदस्तिक्षतिः—स्वरसतस्सम्भ
वद्यावदर्थकत्वस्यदुरपह्नवत्वात्—तदनुगुणविनियोगभेदसत्वे
योजनाभेदस्यापिसम्भवेतदनङ्गीकारनिर्बन्धस्यानावश्यकत्वा
च्च॥ १०५॥ इत्थंच—अस्यमन्त्रस्यार्वाचीनभास्करोक्तंरामकृ
ष्णादिभगवदवतारपरयोजनान्तरमपिदत्तोत्तरम् ॥ १०६ ॥
अतएवहि—महाभाष्येप्रथमाह्निके—चत्वारिशृङ्गात्रयोअस्यपा
दाद्वेशीर्षेसप्तहस्तासोअस्य—त्रिधाबद्धोवृषभोरोरवीतिमहोदेवो
मर्त्यां२ऽआविवेश——इतिमन्त्रस्याग्निपरतयाऽग्निसम्बन्धिकर्म
णिविनियोज्यतयाचान्यतस्सिद्धस्यशब्दपरत्वंभगवतापतञ्ज
लिनाव्याख्यातंसङ्गच्छते ॥ १०७ ॥ इदंपुनरत्रावधेयम्—आ
युधानिबिभ्रत्—आयुधानिपोषयन्—आयुधराजइतियावत्—
गोविन्दुर्द्रप्सः—गोविन्दस्यांशः—दिव्यायुधराजभूतोभगवदंशः—
सुदर्शनदेवइतियावत्—अपामूर्मिंसमुद्रम्——पञ्चाग्निविद्योक्तरी

त्याभूतसूक्ष्मपरिणामभूतंसंसारसागरम्—लीलाविभूत्यात्मकंप्रा
कृतलोकमण्डलीमितियावत्—सचमानः—लोकरक्षार्थंतदातदाप्र
विशन्—श्येनश्शकुनस्सन्—श्येनशकुनतुल्यवृत्तिस्सन्—चमूषत्—
अरिसेनासञ्चारी—श्येनोयथापक्षियूथंप्रविश्यपक्षिणोनिरस्यति—
तथादैत्यादिविरोधिसेनांप्रविश्यविरोधिनोनिरस्यन्नितियावत्—
विभूत्वासाधुजनरक्षणशीलः—ततश्चमहिषः—तैस्तैस्साधुजनैर्म
ह्यमानस्सन्—तुरीयंधामविवक्ति—साधुरक्षणकार्यानन्तरंतदात
दापरमपदंगच्छति—विरोधिनिरसनैकप्रयोजनायुधराजपदाभिषि
क्तत्वेनविरोधिनिरसनकार्याधिकृतत्वाद्धेतोरेवतदातदालीला
विभूतिंप्रविश्यविरोधिनिरसनंकरोतिसुदर्शनदेवइत्याभिप्रायस्येह
विवक्षितत्वाद्विभ्रदित्यत्र—लक्षणहेत्वोःक्रियायाइत्यनुशासने
नशतृप्रत्ययनिर्वाहोबोध्यः—एवमादिरूपासुदर्शनपरयोजनाप्य
स्यमन्त्रस्यकथञ्चित्सम्भवति—एषाहियोजनापञ्चरात्रसंहिता
विशेषासिद्धचक्रप्रतिष्ठादिकर्मविनियोगस्यक्वचित्स्मर्यमाणाभि
चारिककर्मविनियोगस्यचानुगुणा—गोविन्दुर्द्रप्सः—भगवदवता
रस्वरूपोरामकृष्णादिः—आयुधानिबिभ्रत्—चक्रादीनिनिजानिप
ञ्चायुधानिधारयन्—अन्यत्सर्वंपूर्ववत्—इतियोजनेऽस्यमन्त्रस्य
भगवदवतारविषयापियोजनाकथंचित्सम्भवत्येव—नचेदंयो

जनाद्वयंसत्यपिप्रमाणानुगुण्येर्थानुगुण्येचावश्यंनिषेद्धव्यमिति
कश्चिदस्त्यस्माकंनिर्बन्धः—परन्तुप्रमाणानुगुण्यादबाधितस्वा
रसिकार्थानुगुण्याच्चसंसारमण्डलान्तःपातिचक्रादिभगवद्दिव्या
युधचिह्नधारिमुमुक्षुचेतनाविषयांस्वरसतस्सम्भवन्तींमुख्ययोज
नांनकोपिनिरोद्धुंक्षमेतेत्यतोऽस्यमन्त्रस्यचक्रादिधारणविधि
पर्यवसायित्वंनकेनाप्यपह्नोतुंशक्यमित्येवास्माकमाशयइति
॥ १०८ ॥ चमूषन्मन्त्रस्यात्रहैकमूलार्वाचीनभास्करोक्त्यो
जनान्तराणिविदुषांपरिहासमात्रपात्राण्युद्धृत्यपरिहर्तुमप्ययो
ग्यानीतितद्विचारादुपरतास्स्मः ॥ १०९ ॥ चमूषन्मन्त्रस्यचक्रा
दिभगवद्दिव्यायुधधारणविधिपर्यवसायिनीयोजनापुनरेवमपिस
म्भवितुमर्हति—अपामूर्मिंसमुद्रम्-पञ्चाग्निविद्योक्तरीत्याऽब्छब्द
निर्दिष्टभूतसूक्ष्मकार्यभूतंसंसारसागरम्—सचमानः—सेवमानः—
गोविन्दुः—गोविन्दस्य—द्रप्सः—अंशभूतोजीवः—सचमानोद्रप्स
इतिविशेषणद्वयंवक्ष्यमाणभगवद्दिव्यायुधचिह्नधारणावश्यक
त्वप्रापकहेतुगर्भम्-गोविन्दुरायुधानिबिभ्रत्-अतएव—चमूषद
व—श्येनःशकुनोविभूत्वाचसन्—चमूषदेव—निजानुबन्धि
सांसारिकाज्ञजनसमाजेवर्तमानएव—श्येनः—शंसनीयगति
शाली—शास्त्रीयपरमपुरुषार्थौपयिकसदाचारवर्त्मनासञ्चरण

शीलइतियावत—शकुनः—आत्मानमुत्कृष्टपदंगमयितुंशक्तः—
शीघ्रोर्ध्वगमनसामर्थ्येनश्येनशकुनसाम्यमपीहाविवक्षितम्——
बिभृत्वा——अन्येषामपिभरणसमर्थस्सन्——सांसारिकाज्ञ
जनसमाजमध्यसञ्चार्यपिभगवद्दिव्यायुधधारणमहिम्नायथोक्त
लक्षणमहिमाऽस्यसम्पद्यतइतिभावः—भृञोधातोः—अन्येभ्योऽ
पिदृश्यन्ते—३—२—७५—इत्यनुशासनेन—मनिन्क्वनिप्वनिप्
विच्—एतेप्रत्ययाअनाकारान्तेभ्योपिधातुभ्योभवन्तीत्यर्थकेन
क्वनिपि—छन्दस्युभयथा—३—४—११७—इत्यनुशासनेन—धा
त्वधिकारोक्तःप्रत्ययस्सार्वधातुकार्धधातुकोभयसञ्ज्ञस्स्याच्छ
न्दसीत्यर्थकेनतस्यसार्वधातुकसञ्ज्ञायाम्—कर्तरिशप्—३—१
—६८—इत्यनुशासनेन—कर्त्रर्थकेसार्वधातुकेपरेधातोश्शप्स्या
दित्यर्थकेन—शपि—जुहोत्यादिभ्यश्श्लुः—२—४—७५—इत्य
नुशासनेन—तस्यश्लौ—श्लौ—६—१—१०—इत्यनुशासनेन—
श्लौधातोर्द्वित्वइत्यर्थकेनाभ्यासे—उरत्—७—४—६६—इत्यनु
शासनेन—अभ्यासऋवर्णस्यात्स्यात्प्रत्ययेपरे—इत्यर्थकेन—अ
भ्यासऋकारस्याकारे—उरण्रपरः—१-१—५१—इत्यनुशासने
नतस्यरपरत्वे—हलादिश्शेषः७—४-६०—इत्यनुशासनेनरेफलो
पे—भृञामित्—७-४-७५—इत्यनुशासनेन—भृञ्माङ्ओहाङ्

त्येतेषांत्रयाणांधातूनामभ्यासस्येकारस्यादित्यर्थकेन—अभ्या
साकारस्येकारेबिभृत्वेतिरूपंभवति-विभृत्वेतिपाठेतुरूपंसुगमम्
—महिषः—अर्चिरादिनातिवाहिकैर्नित्यसूरिभिश्चलब्धसत्कारस्स
न्—यद्वा—महिषः—अतिशयेनमहान्—सचानन्त्यायकल्पतइ
तिश्रुत्युक्तमानन्त्यंप्राप्तः—मुक्तस्सन्नितियावत्—अथवा—सच
मानः—अतएव—महिषः—महिषतुल्यः—अतीवमुग्धइतियावत्
—दुर्विनीतोवा—गोविन्दुर्द्रप्सइतियोजना—अस्मिन्पक्षेच्छन्दव्य
नुसारोपिकृतोभवति—व्यवहितान्वयनिबन्धनमस्वारस्यन्तुसो
ढव्यम्—यस्ययेनार्थसम्बन्धोदूरस्थेनापितेनसइतितन्त्रवार्तिका
नुरोधात्—तुरीयंधामविवक्ति—तद्विप्रासोविपन्यवोजागृवांस्स
स्समिन्धते—विष्णोर्यत्परमंपदमिति—सामगायन्नास्तइतिचश्रु
त्युक्तरीत्यासकलवैभवसम्पन्नभगवद्विशिष्टपरमपदंस्तुत्यादिभि
स्सदानुभवन्नास्तइत्यर्थः—विवक्तीत्यत्र—वचपरिभाषणइतिधा
तोः—बहुलंछन्दसि—२-४-७६—इत्यनुशासनेन—छन्दसिवि
षयेबहुलंशपःश्लुर्भवतीत्यर्थकेन—शपश्लौजाते—श्लौ-६
—१—१०—इत्यनुशासनेनाभ्यासे—बहुलंछन्दसि—
७—४—७८—इत्यनुशासनेन—छन्दसिविषयेऽभ्यास
स्यश्लौबहुलमिकारादेशोभवतीत्यर्थकेनेकारादेशेविवक्तीतिरूप

भवति—विवर्तीतिपाठेऽपि—वृतुवर्तनइतिधातोर्यथोक्तरीत्यै
वरूपनिष्पत्तिर्बोद्धव्या——पदव्यत्ययस्तु——व्यत्ययोब
हुलम्—३—१—८२—इत्यनुशासनेनबोध्यः—तदानीम्
—तुरीयंधामेत्यत्रद्वितीया—अकथितञ्च—१—४—५१—इति
सूत्रभाष्योक्तात्देशश्चाकर्मकाणांकर्मसञ्ज्ञोभवतीतिवक्तव्यमि
तिवचनात्सम्पद्यतइतिपरमपदेवर्ततइत्यर्थइतिचबोद्धव्यम्—
—वस्तुतःविवर्तीत्यत्रपदव्यत्ययस्यछान्दसत्वाश्रयणमप्यनाव
श्यकम्—वृतुभाषार्थेदीप्तौचेतिधातोर्विकल्पतश्चौरादिकस्यपक्षे
परस्मैपदाण्यन्तत्वयोस्सम्भवेनोक्तरीत्यारूपसम्भवात्—दीप्य
तीत्यर्थस्वीकारसम्भवाच्च—अथवा—चमूषत्—चम्वौरोदसीइ
तिवेदनिघण्टुवशात्—दिविभुविचपुनःपुनस्सञ्चरणशीलः—मोक्ष
मार्गालाभेन स्वकृतसुकृतदुष्कृतपरिपाकबलात्पुनःपुनस्संसारमं
डलएवबंभ्रम्यमाणइतियावत्—श्येनश्शकुनःश्येनपक्षितुल्यः—
श्येनोयथापरान्हिनस्ति—परेभ्यआमिषादिकंप्रसह्यापहरति—
तद्वदेवपरहिंसापरद्रव्यापहारपरायणः—विभृत्वा—यथोक्तक्रमे
णस्वोदरभरणशीलः—गोविन्दुर्द्रप्सः—भगवदंशोजीवः—गोवि
न्दुरायुधानिबिभ्रत्—भगवद्दिव्यायुधधारीसन्—अतएव—तन्म
हिमबलेन—समुद्रम्——मुद्रयासहितंसंसारमण्डलरूपलीलावि
भूतिमोक्षस्थानभूतवैष्णवपरमपदरूपनित्यविभूत्योर्मध्यसीमा

त्वेन—परमपदप्राप्तिनियतपूर्वभाविसंसारमूलकन्दवासनारेणु निर्मूलीकरणहेतुचरमावभृथस्नानकरणत्वेनचभगवताकृतव्यव स्थम्—अपामूर्मिम्—विरजानदीप्रवाहमितियावत्—सचमानः सेवमानः—स्वात्मनि सिञ्चन्वा—षचसेवनेसेचनेचेतिहि धातुः—सर्वथा—तमासाद्यतत्रकृताभिषेकःप्रक्षालितवासनारेणु स्तमतिलङ्घयन्नितियावत्—माहिषः—सूरिभिर्महयमानः—यद्वा —अतिशयेनमहान्—मुक्तस्सन्नितियावत्—तुरीयंधामेत्यादि पूर्ववत्—तथाचसुकृतदुष्कृतवशात्प्राकृतमण्डलएवारोहणावरो हणाभ्यांपुनःपुनःपरिभ्रमणशीलस्संसारिजीवस्सञ्जातमुमुक्षोर्भ गवद्दिव्यायुधचिह्नधारीचेत्तन्महिम्नासंसारमण्डलसीमांविरजा मवगाह्यनिर्मूलितवासनारेणुःपरमंपदंवैष्णवंमुक्तिस्थानंप्राप्नोती तिफलितोर्थइति॥ ११० ॥ अत्रवक्तव्यविशेषान्तराणिचप्रागु क्तानि ॥ १११ ॥ तथाच—चमूषन्मन्त्रस्यस्वरसतः—प्रति पन्नमुपबृंहणतश्चप्राप्तम्मुमुक्षोश्चक्रादिधारणविधिपरत्वंसर्वथैव दुर्वारमितितस्यासम्भवाद्विरोध्यर्थान्तरपरत्वंबलादभिधायसुदर्श नादिभगवद्दिव्यायुधधारणविधिपरत्वापलपनंदुराग्रहमूलमेवेति सिद्धम् ॥ ११२ ॥ देवासःपितरोयेनेत्यादिशतपथश्रुतश्चान्या र्थकत्वकल्पनंनकेनापिकृतंदृश्यते—प्रत्युतरामनामसमाह्व यपञ्चप्रकरणे—अच्युताश्रमसन्यासोस्मात्तैमतस्थएवइमामे

वश्रुतिमथर्वपरिशिष्टगतांशाखाभेदेनाकिञ्चिद्भिन्नानुपूर्वीकाम्—
देवासोयेनविधृतेनबाहुनासुदर्शनेनप्रयतास्स्वर्गंलोकमायन्।ये
नाङ्कितामनवोलोकसृष्टिंवितन्वतेब्राह्मणास्तद्वहन्तीत्येवंरूपां
चक्रधारणप्रमाणतयोदाजहारेतिनात्रकिञ्चित्प्रतिवक्तव्यमस्ति
॥ ॥ ११३ ॥ यत्पुनरर्वाचीनःकश्चित्पाश्चात्यःकौलेयकोऽ
स्मृत्कृतबहुलोपन्यासपरिभ्रमितचेतादिङ्मोहमापन्नोऽनधिगत
वर्त्माकेवलंबुक्कति—अस्मदुदाहृतश्रुतिवचनेषुकेषांचित्स्वमत
स्थैःकैश्चिदन्यथाकृतंव्याख्यानमालम्ब्यास्मत्कृतव्याख्यानंबा
ध्यतइति ॥ ११४ ॥ तत्तुच्छम्—समीचीनन्यायंशब्दस्वा
रस्यमुपबृंहणप्रमाणान्तरानुगुण्यंचानालोचयद्भिस्तन्मतस्थैःकै
श्चिद्वैदिकाभासैरर्वाचीनैस्स्वमतिमात्रकल्पितानांव्याख्यानानां
समीचीनन्यायशब्दस्वारस्योपबृंहणप्रमाणान्तराविरोधैरेवनिर
स्ततायाज्ञापितत्वात्—प्रतिपक्षवादस्यप्रतिकोटिभूतन्यायप्रमा
णाद्युपन्यासेनविनास्वमतस्थव्याख्यानाविरोधमात्रेणानङ्गीका
रकथनस्यातिमूर्खजल्पितत्वाच्च ॥ ११५ ॥ अन्यदस्मीयमस
दस्यंजल्पितजालमनिरूपककृत्यमपहास्यंचेतिविलोकयतांवि
दुषांस्वतएवाविशदंभवतीतिनात्रकिञ्चित्प्रतिकर्तव्यमित्युपेक्षा
महे॥ ११६॥ इतिश्रीभगवद्धर्मदर्पणेचरणादिश्रुतिचक्रधारणपर
त्वविरोध्यन्यार्थकत्ववादप्रतिक्षेपोनामाष्टमःपरिच्छेदः समाप्तः

भगवद्धर्मदर्पण—६—७—८—परिच्छेद

शुद्धाशुद्ध पत्रिका.

पुठे	पङ्क्ती	असुद्धं	सुद्धं
३	१८	दयस	दयास
४	८	मूलं	मूल
४	१२	थस्यपर	थपर
५	६	पन्हवा	पह्नवा
७	७	त्वप्रे	त्वेप्र
१२	१२	दाखिद	दाक्खिद
१२	१६	तखे	तक्खे
१२	१८	दाखिद	दक्खिद
१२	१९	तखे	तक्खे
१२	२०	तखे	तक्खे
१५	३	ञ्ञक्तितामितिंहि	ञ्ञीकतामितिहि
१५	१३	तखे	तक्खे
२१	११	न्हव	ह्नव

शुद्धाशुद्ध पत्रिका.

पुष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
२१	१५	न्हव	ह्लव
२८	१०	करणा	कारणा
३१	१४	त्थं	इत्थं
३५	९	नामानं	नामानि
३६	१४	बन्धका	बन्धनका
३७	४	मिनि	मिति
३९	६	पापत्त्वल	पापत्वल
४२	१५	तासुप	तासुचप
४४	९	घर्म	धर्म
५७	१५	षेधाद्द	षेधद्द
५८	१	चिन्ह	चिह्न
५९	७	वषम्य	वैषम्य
५९	१२	षंध	षेधा
५९	१४	स्यापिकल्प	स्यापि
६२	४	नान्न	नान्न
६५	१९	गेरवनं	गेरवंन

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
८४	१२	स्याग्र	त्याग्र
८६	७	भाष्य	भाष्ये
८७	५	श्रीवेङ्कश्रीवेङ्क	श्रीवेङ्क
९५	१५	ब्लाताग्मलाफकथायाअग्रा	ब्लताग्र
९८	१०	बन्धना	बन्धन
१०८	१०	३२	—
११२	१२	यवबा	यविबा
११२	१५	त्प	त
११४	२	व्यर्थेम	व्यर्थेमे
११५	३	गवाह्न	गवाह्नि
१२३	१०	त्रवधीर	त्रधारि
१२३	१३	आम	आमः
१२५	४	सुतङ्गत	सुसङ्गत
१२८	९	प्रतायि	प्रतीय
१३६	७	त्यवो	त्यवो
१४०	३	यस्सर्व	यस्सर्वज्ञस्सर्व

शुद्धाशुद्ध पत्रिका.

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
१४२	१४	सामे	सोम
१४३	१५	तामस्र	तमिस्र
१४४	६	अविष्ट	अविष्ट
१४४	८	विष्ट	विष्ट
१४५	१५	विष्ट	विष्ट
१४६	१२	विनयो	विनियो
१४६	१३	मत्राणा	मन्त्राणा
१४७	१३	पुष्पवती	पुष्पावती
१५१	८	कारण	करण
१५४	१२	घानं	धानं
१५४	१३	तिएवं	ति—एवं
१५५	११	न्तुवच	न्तु—वच
१५६	५	भवाद	भवद
१५९	१२	कङ्क्षा	काङ्क्षां
१६३	१४	सनने	सेनन
१७८	१८	ते ॥ दव	ति ॥ देव
१९३	५	स्वाकार	स्वीकार

पुठे	पङ्क्तौ	अशुद्धं	शुद्धं
११४	१२	तादृशं	तादृशा
११६	६	कर्तरिक	कर्तरिक्त
११८	१०	गात्र्शं	गात्—शं
२०२	११	क्रिया	क्रिया
२०३	१३	घण्टा	घण्ट्वा
२०६	७	ङन्तत्व	ङन्तत्वं
२०७	८	र्त्तिवावि	र्त्तिचावि
२०७	१८	महत्स	महस्स
२०८	१३	याजिल	याजित्व
२१०	३	ग्राय्ह्र्थं	ग्राह्य
२११	३	क्रियाःमन्द	क्रियाः । मन्द
२१२	५	म्मृआस्तिसु	म्मृ—अस्ति—सु
२१२	१०	चिन्ह	चिह्न
२१३	१	तासम्भ	ता—सम्भ
२१६	१४	स्त्यश्वान	स्त्यश्व । न
२१७	३	स्यत	स्य—त
२१८	१६	द्योते	द्योत

शुद्धाशुद्ध पत्रिका.

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
२२१	१५	र्णां पि	र्णामपि
२२६	१२	मैथा	मेथ
२२७	८	त्सरुय	त्सत्य
२२८	३	स्मना	स्मनो
२३१	११	ष्ठाक्या	वाक्या
२३१	१५	तिअथ	ति--अथ
२३३	१४	त्परप्र	त्परत्व
२३४	१७	क्किंकमू	क्किकमू — २ --
२३६	१२	सदशर्नावैंष	सुदर्शनाविष
२३६	१४	स्वीदाति	स्वादिति
२३६	१७	एवस	एवंस
२४२	१	ताय	तीय
२४२	३	वाद्दो	वोद्द
२४५	१७	तमू—राम	तंराम
२४७	१०	ताहशि	ताहश
२४८	१४	वौधा	वोधा
२६१	१६	प्रातष्ठावि	प्रतिष्ठावि

S. K. [illegible]

Vedantha Vidwan

Mysore.

शुद्धाशुद्ध पत्रिका.

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
२६१	१०	त्रापस	त्राप्य
२६३	१७	मुख	सुख
२६५	७	त । मि	तामि
२६६	१२	वक्षित	विवक्षित
२७२	८	कनिपि	क्कनिपि
२७३	८	छन्नस्यु	छन्दस्यु
२७२	९	रोकप्र	रोक्तः प्र
२७३	१३	त्र स्त	त्रास्त
२७३	१८	दशोमे	देशोभ
२७४	१८	भुति	भूति
२७४	१८	भूत	भूत
२७४	१८	भूत्यो	भूत्यो
२७५	१८	यपे	त्यप
२७६	४	मारि	मास्ति
२७६	९	शब्दस्व	शब्दस्वा
२७६	१७	रणप	रणपर
२७६	१८	समाप्त	समाप्तः

जाहिरात ।

वाल्मीकियरामायण (भाषाटीका सहित) और केवल भाषावार्तिक ।

श्रीवाल्मीकीय रामायण २४००० ग्रंथका सरल सुबोध व्रजभाषाटीका बनवायाहै जिसके बीचमें मूल और नीचे ऊपर भाषाटीका है. और एक वाल्मीकीय रामायणका भाषा वार्तिक. ऐसे दोनों तरहके छापके तैयारहैं. जिसमें मूलके अनुसार यथावत् भाषाटीका करके मूल श्लोकोंके अंकभी लगा दियेगयेहैं रामायणकी कथा पढनेवालोंको पुराण बांचनेमें बहुत उपयोगी होगा. जिनमहाशयोंको लेना हो वे २३ रु० भेज देनेसे भाषाटीका सहित इस पुस्तकको अपने स्थानपर पासकेंगे और भाषावार्तिकको १० रु० भेजनेसे पासकेंगे. पश्चात् मूल्य बढाया जायगा. और डाकमहसूलभी अलग पडेंगा. इसवास्ते महाशयो! इस अलभ्य लाभको शीघ्रता करिये.

पुस्तक मिलनेका ठिकाना-

खेमराज श्रीकृष्णदास

श्रीवेंकटेश्वर छापाखाना मुंबई.